cūḍāmaṇi, he should have lived in the middle of the 17th century A. D. The Keraḷābharaṇa is represented by Nos. 4031—34.

APPĀDĪKṢITA

Appādhvarin, a contemporary of Tryambakarāya and protegé of Śāhaji (1684—1710) is one of the famous names in the literary history of South India. His Ācāranavanīta is a marvel of Smṛti scholarship. The present work Gaurīmāyūramāhātmya campūḥ. (No. 4035) deals with the greatness of the tituler deities of Māyavaram, the town near which he was living. His native place was Kilayūr in the Tanjore District. An informing article on Appādhvarin, has appeared in the Journal of Oriental Research Vol. III.

NṚSIHMĀMĀTYA.

Nṛsihma, brother of Tryambakarāyamakhin is the author of the Tripuravijayacampūḥ described under No. 4036.

ATIRĀTRAYĀJIN.

Atirātrayājin is the younger brother of Śri Nīlakaṇṭha Dīkṣita. He is the author of the Tripuravijayacampūḥ described under No. 4037, and the Kuśakumadvatīya, described under Nos. 4346 and 4347. His literary activities fall in the middle of the 17th century A. D.

VEṆKAṬEŚVARA.

A Veṅkaṭeśvara, son of Muttāmbā has commented upon the Nīlakaṇṭhavijayacampu. Who this Veṅkaṭeśvara is, is not clear at present.

Among the Nṛsihmacampūs preserved in this library there are three different works. They are:—

1. By Daivajñasūrya paṇḍita (Nos. 4063—64).
2. By Saṅkarṣaṇa (No. 4065).
3. By Keśavabhatta (No. 4066).

With the first of these writers we are familiar as the author of the Ramakṛṣṇavilomakāvya (No. 3843)

We do not know whether the Saṅkarṣaṇa already referred to as the author of the Satyanāthābhyudaya, described under No. 3740 is identical with this Saṅkarṣaṇa the author of the Nṛsihma-campūḥ.

The identity of Keśavabhaṭṭa too is doubtful, for there have been many Keśavas.

RAGHUNĀTHA.

The Raghunātha, whose work, Mārutivijayacampūḥ is described under No. 4106 was the pupil of one Raghunandana and seems to have been a native of Northern India.

Bhoja's Rāmāyaṇacampūḥ was composed, it is said, during the course of a single night. Rājacūḍāmaṇi Dīkṣita gives the information. And during the night he probably found time to write out the portion to the end of the Sundarakāṇḍa alone. Since then several writers have composed the further portions. Among them, one Lakṣmaṇa seems to have been the oldest. Rājacūḍāmaṇi Dīkṣita took upon himself the task of finishing it and wrote out the Yuddhakāṇḍa portion (No. 4139). Ghanaśyāma wrote another (No. 3143). Except Lakṣmaṇa's the rest have not yet been published. An anonymous writer has composed the Uttarakāṇḍa portion (No. 4140).

KĀLAHASTI.

The work called Vasucaritracampu described under Nos.

4146 and 4147, by Kālahasti represents a Sanskrit rendering of the Vasucarita, a famous Telugu work by Śrīnātha, one of the greatest of Telugu poets in the 16th century. This Kālahasti, probably a native of Kālahasti and later a domicile in Kāñcīpuram, was one of the pupils of Śrī Appayya Dīkṣita and consequently he belongs to the middle of the 16th century.

DHARMARĀJA.

The Veṅkaṭeśacampu, described under No. 4158 is the work of this author. He tells us here that he is the son of one Raghunātha. Perhaps this is the same Dharmarāja referred to as the author of the Sabhāpativilāsa Nāṭaka. The author belongs to the Tanjore District and lived in the 17th and 18th centuries.

VIRŪPĀKṢA.

Virūpākṣa is the author of two works, Colacampu and Śivavilāsacampu. The former is described under No. 4213 and it deals with the life of Kulottuṅga Cola. The second is described under No. 4160 and deals with the greatness of Śiva. The author is the son of Śivaguru and Gotami. We know of a Virūpākṣa in the 18th century and it is not known whether they are identical with each other.

VIṢṆUŚARMAN.

Among the Mss. on Kathā is to be noted that in this library are preserved both the Northern and the Southern recensions of the Pañcatantra.

Among the Bhojaprabandhas preserved in this library, two different texts are to be seen, one completely at variance with the other. The most common text is represented by Nos. 4181—86. No. 4187 represents the new text, evidently by a Jain writer.

PURURĀJAVAMŚAKRAMA.

In this anonymous work, (No. 4207) we find a list of the Purāṇic kings, beginning from Puru. The list fairly corresponds to the one found in the Mahābhārata, but in details of names a divergence is noticeable. The date of the compilation is not known.

GOVINDANĀTHA.

Among the Śaṅkaravijayas preserved in this library, special mention may be made of the work of Govindanātha (No. 4208) which deals with the life of Śri Śaṅkara in 9 chapters. It is likely that this Govindanātha is later than Vyāsācalayati who too composed a Śaṅkaravijaya. (Nos. 4209-10).

PADMAGUPTA.

Parimalakālidāsa, alias Padmagupta is the author of the Navasāhasāṅkacarita (No. 4214) a historical romance, published in the Bombay Sanskrit Series. It may be noted that the manuscript of this library was mainly utilized in publishing the text in that Series. Padmagupta was a contemporary of Muñja—alias Vākpati and the Cālukya King Tailapa II. So he belongs to the end of the 10th century A. D. and probably also to the beginning of the 11th century A. D.

RĀJANĀTHA.

Rājanātha's Acyutarāyābhyudaya Nos. (4216-19) is a historical Kāvya, dealing with the life of Acyutarāya, Emperor Vijayanagar in particular and the whole kingdom with its dependencies in general. It gives us a good idea of the conditions of South India in the 16th century. The author was a contemporary of Appayya Dīkṣita.

TIRUMALĀMBĀ.

Tirumalāmbā is one of the poetesses of South India. Like Gangādevī and others, she has firmly established the fact that Hindu ladies are not so illiterate as they are made out to be by the outside world. The Varadāmbikāpariṇaya (No. 4220) of this lady is a historical Kāvya dealing with the life of Acyutadevarāya, the successor of Kṛṣṇadevarāya.

YAJÑANĀRĀYANA DĪKṢITA.

The Sāhityaratnākara (Nos. 4221-22) and the Raghunāthābhyudayanāṭaka (No. 4487) of this author, the son of the famous Govinda Dīkṣita perpetuate the memory of the great Raghunātha Nāyaka, the most liberal patron of Sanskrit and Telugu learning, in Tanjore in the 17th century. For a summary of the contents of this work, please refer to the "Sources of Vijayanagar History" Pages 269-74.

PARAMĀNANDAKAVĪNDRA.

The Śivabhārata, a work dealing with the life of the greatest of Maharaṭha rulers of South India, Śivāji, is by one of his contemporaries and is therefore an authentic source of information regarding that person and the troubulous times in which he was living. Recently the book was published in Poona and their only source was the manuscripts deposited in this library (Nos. 4223-26.)

JAYARĀMA.

Jayarāma's Parṇālaparvatagrahaṇa (Nos. 4227-28) deals with one of the military exploits of Śivāji. Parnālaparvata was one of the hill fortresses which he captured. Jayarāma too seems to have been a contemporary of his.

KEŚAVAPAṆḌITA.

Śivāji's son was one Rājārām and his military exploits have been made the subject of the work, Rājārāmacarita by his contemporary, Keśavapaṇḍita. The work is described under No. 4229.

ŚRĪDHARAVEṄKAṬEŚA.

Śrīdhara Veṅkaṭeśa, otherwise known as Ayyāvāḷ was one of the donees of the village of Śāhajirājapuram, now known as Tiruviśanallūr. He was a contemporary of Śāhaji who reigned in Tanjore between 1684–1710 A. D. The Śāhendravilāsakāvya of this author (No. 4280) deals with the life of his patron Śāhaji.

NALLĀ DĪKṢITA.

Nallā Dīkṣita's Dharmavijayacampū (No. 4231) deals with the same topic as the last. He was otherwise known as Bhūmināthakavi and he was a near kinsman of Rāmabhadra Dīkṣita.

GAṄGĀDHARA.

The Bhosalvamśāvali (No. 4232) is by Gaṅgādhara and deals with the same topic as the last. This forms the opening portion of the author's Rasikarañjani, a commentary on the Kuvalayānanda. He too was a contemporary of Śāhaji (1684–1710 A. D).

ŚEṢĀCALAPATI.

A work similar to the last is by Śeṣācalapati and it is noticed under No. 4233.

Beside these there are some minor historical works dealing with some aspect or other of the Maharāṭha Court of Tanjore and the Maharāṭha Kings of Tanjore. They are all described under Nos. 4234–4242.

॥ संदेशकाव्यानि ॥

SAMDEŚAKĀVYAS.

A

DESCRIPTIVE CATALOGUE

OF THE

SANSKRIT MANUSCRIPTS

IN THE

TANJORE MAHĀRĀJA SERFOJI'S

SARASVATĪ MAHĀL LIBRARY.

॥ कोकिलसन्देशः ॥

3862. KOKILASANDEŚAḤ.

Burnell's Catalogue No. 10166. Page 157. Right column. Substance—Palm leaf. Size—15⅓ × 1½ inches. Leaves—20. Lines—6 to a Page. Script—Grantha. No. of Granthas—300. Author—Veṅkaṭācārya. Complete.

Beginning:

पितरं तातयार्चायं मातरं मौक्तिकाम्बिकाम् ।
त्रयीचूडागुरुमुखानपि वन्देय देशिकान् ॥ १ ॥

भव्यसन्दर्भसम्भाव्यं काव्यं सन्देशसंज्ञकम् ।
करोति वेङ्कटाचार्यश्चरितं कमलापतेः ॥ २ ॥

मगधेष्वतवीर्यासौ कौतुकीकमलेक्षणः ।
वियोगाभिनयानन्दी सन्दिदेश वनप्रियम् ॥ ३ ॥

कुर्वन्नविनयं शौरिः कोपयन् कुम्भसम्भवम् ।
वधूविरहवानासीन्मर्त्यवन्मदनातुरः ॥ ४ ॥

षोडशस्त्रीसहस्राणि भुक्त्वा नर्मभिरुज्वलैः ।
मर्त्येष्ववततारासौ विप्रलम्भरसेच्छया ॥ ५ ॥

स महेन्द्रे वसन् कृष्णो मगधेश्वरताङ्कृतः ।
प्राणत्राणाय कान्तायाः प्राहिणोत्स्वां पुरीं पिकम् ॥ ६ ॥

तातार्यस्य क्रतुशतसमुज्जृम्भितानन्दकीर्ते-
विंद्याराशेर्विनयजलधेर्वीतगर्वस्तनूजः ।
सन्देशाख्यं कलयति कृतिं सादरं वेङ्कटार्यः
तत्पादाब्जप्रणमनफलं प्राप्य वाणीविलासम् ॥ १ ॥

वेलातीतस्मरणमहिमा वेदचूडावतंसो
वेधः सूनुप्रभृतिसततस्तूयमानापदानः ।
निर्मग्नानां भवजलनिधौ नित्यमस्मादृशाना-
मस्तु श्रीमानखिलदुरितोच्छित्तते(ये) श्रीनिवासः ॥ २ ॥

वीरः सम्राडसमविशिखस्पर्धिलावण्यभूमा
सीमा कापि प्रचुरवयसामाकरः सज्जनानाम् ।
वाहा तेजः प्रशमितरिपुर्मागधीनां प्रजानां
मूर्तः पुण्योदय इव जयत्युत्तमश्लोक एकः ॥ २ ॥

स क्षोणीशः सरसमनसा सारसाक्ष्या वियोगं
सम्मोहाय प्रतिविहितया माययेव स्मरेण ।
कोपारोपादवि(षय)भवादात्तभूयस्तराधेः
काले शापादभजत मुनेर्दक्षिणाशालयस्य ॥ ३ ॥

End:

एकी भूतावपि शिथिलिताश्लेषबन्धौ नियत्या
मोहापन्नौ मुहुरपिरुतैराह्वयन्तौ रथाङ्गौ ।
पश्यान्योन्यप्रणयतटिनी वीचितुङ्गैरपाङ्गैः
पश्यन्तावप्यहरुपरतौ सङ्गमं नोप यातः ॥ ५७ ॥

हित्वादित्येधनपति दिशं दक्षिणस्यामुदीते
शापस्यान्तं मुनिरचकथत्कुम्भयोनिः प्रसीदन् ।
तेन स्तोका तरुणि भविता विप्रयोगव्यथेयं
मा सन्ताप्सीर्नियतिरियती भाविनी तादृशी च ॥ ५८ ॥

आमीलन्ती कथमपि दृशा माधवं यापयेथाः
पश्चादावां बहुगुणमितं प्रार्थितं निर्विशावः ।
सम्भोगादप्यधिकमुभयोरेधयन्प्रेम यूनोः
प्रीतिग्रन्थिं द्रढयति सकृत्सम्भवन् विप्रलम्भः ॥ ५९ ॥

इत्यालापैः प्रणयपिशुनैः प्रेयसीं प्रीणयन्मे
भैमीं दिव्यः सितगरुदिव प्रेषितो नैषधेन ।
तत्रारामे सफलतरुभिः संवृते सञ्चरिष्णुः
कान्तायुक्तः परभृत परं प्राप्नुया मङ्गलानि ॥ ६० ॥

इत्थं शौरिः स्वयमभिनयन्नध्वनीनापदानं(स्वभावं)
शापस्यान्ते दिवमिव हरिः प्राप्य तां राजधानीम् ।
अन्यानर्हैरनुपमरसैर्दिव्यभोगैर्विजह्ले
कालं दीर्घं सरसिजदृशा सङ्गतः सत्य(ये)एव ॥ ६१ ॥

Colophon:

इति श्रीशैलपूर्णकुलतिलकशतक्रतुतातयाचार्यसूनुना

श्रीवेङ्कटाचार्येण कृते रामायणकथासरसोदये
कोकिलसन्देशे द्वितीयाश्वास: ॥
हरि: ओम् ॥ समाप्तश्चायं ग्रन्थ: ॥
श्रीवीरराघवाय नम: ॥
ஸ்ரீ ருக்ஷ்நாராயணரெழுத்து.

Subject: Kokilasandeśa 1-2 Āśvāsas.

Introductory verses		7.
I.	Āśvāsa	60.
II.	„	61.

Remarks:—The Ms. is in a fairly good condition. A transcribed copy of the Ms. in paper is also available in the Library. See transcript Volume No 50.

The author of the work is one Venkaṭācārya, son of Tātācārya and Mauktikāmbikā. The date of the work is not known. Probably it belongs to the 17th century.

This poem deals with the separation of Rāma from Sīta and the consequent message of love which Rāma sends to her through a Kokila or Cuckoo.

॥ चकोरसन्देशः ॥

3863. CAKORASANDESAḤ.

Burnell's Catalogue No. 10168. Page 158. Right column. Substance—Palm leaf. Size—16¼ × 1½ inches. Leaves—10. Lines—6 to a Page. Script—Telugu. No. of Granthas—200. Author—Perusūriḥ (1st part only). Incomplete.

Beginning:

कर्तुं सेवामुपगतवता सुन्दरेणोपकण्ठं
  प्रत्युत्थानप्रणतिविधुरो व्याघ्रपादेन शप्तः ।
कामी कश्चित्पशुपतिपदाम्भोजविन्यासधन्ये
  कैलासाद्रौ स्थितिमतनुत प्रेयसीविप्रयुक्तः ॥ १ ॥

तेनात्यर्थं स्मरशरपराभूयमानेन भूय-
  श्चिन्तातन्तुग्रथितमनसा जातु जातादरेण ।
अच्छोदाख्ये सरसि ददृशे कान्तयान्वीयमान-
  श्चश्चच्चञ्चूशकलितशरत्कौमुदीकश्चकोरः ॥ २ ॥

आलोक्यैनं स्मृतनिजवधूदृग्विलासस्तदानी-
  मश्रूण्यक्ष्णोर्दधदतितरामाललम्बे सदैन्यम् ।
नालङ्कं वा व्यथयितुमतिक्लिश्यमानान् वियोगाद-
  त्युद्रिक्ते मदनहतके मन्यमाने प्रतीपम् ॥ ३ ॥

शापस्यान्तं क्षमधनगिरामासमाप्तावशेषा-
  न्निश्चिन्वानः कथमपि निरुद्धोरुधारालबाष्पः ।
आनर्चैनं मधुरवचनैः सन्दिदिक्षुः प्रियायै
  हस्ते भूर्जत्वचमुपनयन् धातुलेखोपपन्नाम् ॥ ४ ॥

भद्रं भ्रातर्भवतु भवतस्त्वं हि तार्क्ष्यस्यबन्धु-
  र्विख्यातस्त्वं त्रिजगतिगतिर्मादृशामार्तिभाजाम् ।
(गच्छामि त्वां) शरणमधुना तेन दीनोऽहमेवं
  नैव व्यर्थी भवति हि कृताभ्यर्थना सज्जनेषु ॥ ५ ॥

End:

निम्ना नाभिस्तदुपरिगता रोमराजिर्मनोज्ञा

वीचीभङ्गी त्रिवलिरचनामन्तरन्तर्वहन्ति ।

वक्षोजाभ्यामनघतर···लकूलङ्कषाभ्या-

माश्लिष्टाग्रा मदमधुकरश्रेणिकान्तिश्च तस्याः ॥ ३९ ॥

सा चन्द्रास्या चपलनयना कम्बुकण्ठी सुकेशी

मुग्धालापा मधुरहसिता मन्दयाना न ....: ।

बिम्बोष्ठीति व्यवहृतगुणास्तत्र सर्वेऽपि शब्दाः

साजात्येन त्वितरवनितास्त्वेकशस्तत्प्रयोगः ॥ ४० ॥

सैषा साध्वी मम विरहतः साम्प्रतं खिद्यमाना

सन्देशोक्त्या प्र······जीवनीया यदास्ते ।

याथा स्तस्मदुचितसमये माकृथास्त्वं विलम्बं

कालक्षेपं न खलु सहते चित्तजन्मा कठोरः ॥ ४१ ॥

तत्र स्थाने न तव पतगाधीश सा ·····

Colophon: (Leaf No. 6)

इति श्रीश्रीधरवंशशिखावतंसवैदुष्यसिंहासनाधीश्वरपदवाक्यप्रमाण कूलङ्कषसाहित्यमर्यादाधुरन्धरनवीनपतञ्जलिमहाबिरुदसम्पादित पेरुसूरिविरचिते चकोरसन्देशे महाकाव्ये पूर्वसन्देशः समाप्तः ॥

Subject: Cakorasandeśa.

Pūrvasandesā. 68 ślokas.

Uttarasandesā. 42 ,,

Remarks:—The Ms is in a decaying condition. The Ms. abruptly ends with the beginning of the 42nd śloka of the Uttarasandeśa. A transcribed copy of the Ms. in paper is also available in the Library. See Transcript Volume No. 359.

We know of a Peru bhaṭṭa, who was the father of Jagannātha Paṇḍita. The name of the author given in this Ms. is Perusūri. It is not known whether this Perusūri was the same as the father of Jagannātha Paṇḍita. The colophon very strongly induces one to suggest the identity. This Perusūri had the title Abhinavapatañjali, which in other words means that he was a great Vaiyākaraṇa.

The poem deals with the love message sent to his beloved by a person who was cursed by Vyāghrapāda while the former came to Kailāsa to pay his respects to God Sundareśa. The messenger is a cakora bird.

॥ मेघसन्देशः ॥

3864. MEGHASANDEŚAḤ.

Burnell's Catalogue No. 4785. Page 160. Right column. Substance—Paper. Size—7¾×4½ inches. Sheets—14. Lines—9 to a Page.. Script—Devanāgarī. No. of Granthas—270. Author—Kālidāsa. Complete.

Beginning:

कश्चित्कान्ता विरहगुरुणा स्वाधिकारात्प्रमत्तः
शापेनास्तङ्गमितमहिमा वर्षभोग्येन भर्तुः ।
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ॥ १ ॥

End:

एतत्कृत्वा प्रियमनुचितप्रार्थनादात्मनो मे
सौहार्दाद्वा विधुर इति वा मय्यनुक्रोशबुद्ध्या ।
इष्टान् देशान् विचर जलद प्रावृषा सम्भृतश्री-
र्माभूदेवं क्षणमपि च ते विद्युता विप्रयोगः ॥ ५४ ॥

Colophon:

इति श्रीकालिदासकृतौ मेघसन्देशे उत्तरसन्देशः ॥

Subject: Meghasandeśa.

Pūrvasandeśa	67	ślokas
Uttarasandeśa	54	,,

Remarks:—The Ms. is in good condition.

There are several editions of this work.

॥ मेघसन्देशः ॥

3865. MEGHASANDEŚAḤ.

Burnell's Catalogue No. 4786. Page 161. Left column. Substance—Paper. Size—$14\frac{1}{2} \times 4\frac{1}{4}$ inches. Sheets—8. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—157. Author—Kālidāsa. Incomplete. Wants end.

Beginning—Same as No. 3864.

End:

यत्रोन्मत्तभ्रमरमुखराः पादपा नित्यपुष्पा
हंसश्रेणीरचितरशना नित्यपद्मा नलिन्यः ।
केकोत्कण्ठा भवनशिखिनो नित्यभास्वत्कलापा
नित्यज्योत्स्ना प्रतिहततमोवृत्तिरम्याः प्रदोषाः ॥ ७ ॥

नेतानीवाः सः..................

Colophon : (Sheet No. 7.)

कालिदासकृतौ मेघसन्देशे पूर्वमेघः समाप्तः ।

Subject : Meghasandeśa.

Pūrvamegha 67 ślokas.

Uttaramegha 7 ,,

Remarks:—The Ms. is in good condition. This Ms. abruptly ends with the beginning of the 8th stanza of the Uttaramegha.

॥ मेघसन्देशः ॥

3866. MEGHASANDEŚAḤ.

Burnell's Catalogue No. 4787. Page 161. Left column.

Substance—Paper. Size—10×4⅜ inches. Sheets—8. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—136. Author—Kālidāsa. Pūrvamegha only.

Beginning—Same as No. 3865.

End:

तस्योत्सङ्गे प्रणयिन इव स्रस्तगङ्गादुकूलां
स त्वं दृष्ट्वा न पुनरलकां ज्ञास्यसे कामचारिन् ।
या वः काले वहति सलिलोद्गारमुच्चैर्विमाना
मुक्ताजालग्रथितमलकं कामिनीवाभ्रवृन्दम् ॥ ६८ ॥

Colophon—Same as No. 3865.

Subject : Meghasandeśa.

Pūrvamegha. 64 ślokas.

Remarks:—The Ms. is in good condition.

॥ मेघसन्देशः ॥

3867. MEGHASANDEŚAḤ.

Burnell's Catalogue No. 4788. Page 161. Left column. Substance—Paper. Size—9¾×4 inches. Sheets —15. Lines—6 to 8 to Page. Script—Devanāgarī. No. of Granthas—136. Author—Kālidāsa. Pūrvamegha only.

Beginning, end and colophon—Same as No. 3866.

Subject: Meghasandeśa.

Pūrvamegha 67 ślokas.

Remarks:—The Ms. is in good condition.

॥ मेघसन्देशः ॥

3868. MEGHASANDEŚAḤ.

Burnell's Catalogue No. 10160. Page 161. Left column. Substance—Palm leaf. Size —15¾×1¼ inches. Leaves—22. Lines—3 or 4 to a Page. Script—Grantha. No. of Granthas—178. Author—Kālidāsa. Incomplete. Wants end.

Beginning—Same as No. 3864.

End:

मन्दाकिन्याः पयसि शिशिरैः सेव्यमाना मरुद्भि-
र्मन्दाराणामनुतटरुहां छायया वारितोष्णाः ।
अन्वेष्टव्यैः कनकसिकतामुष्टिनिक्षेपगूढैः
सङ्क्रीडन्ते मणिभिरमरप्रार्थिता यत्र कन्याः ॥ ६ ॥

Colophon—Same, as No. 3865.

Subject: Meghasandeśa.

Pūrvamegha. 67 Ślokas

Uttaramegha. 6 ,,

Remarks:—The Ms. is in a fairly good condition. This Ms. abruptly ends with the 6th śloka of the Uttaramegha.

॥ मेघसन्देशः ॥

3869. MEGHASANDEŚAḤ.

Burnell's Catalogue No. 10161. Page 161. Left column. Substance—Palm Leaf. Size—16×1¼ inches. Leaves—21 (12th missing). Lines—4 or 5 to a Page. Script—Telugu. No. of Granthas—250. Author—Kālidāsa. Complete.

Beginning, end, colophon and subject—Same as No. 3873.

Remarks:—

After the colophon we find:

प्रमाथिवत्सरे भाद्रशुक्ले पक्षे गणेशितुः ।

साम्बेन लिखितो मेघसन्देशोऽयं भृगौ दिने ॥

The work was copied by Sāmba on Friday, bright fortnight, Bhādrapada month, and Pramāthi year.

॥ मेघसन्देशः ॥

3870. MEGHASANDEŚAḤ.

J. L. Collection No. 551. Substance—Paper. Size—9×4 inches. Sheets—12. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—136. Author—Kālidāsa.

Pūrvamegha only.

Beginning, end and subject—Same as No. 3866.

Colophon:

इति श्रीकालिदासकृतौ पूर्वमेघः समाप्तः ॥

शक १७५५ नन्दनसंवत्सरवैशाखशुद्धदशमी सौम्यवासरे समाप्तः ॥

Remarks:—The Ms. is in good condition. This Ms. was copied in the śaka year 1755 Cyclic year, Nandana, Vaiśākha month Daśamī, and Monday. It corresponds to A. D. 1833.

॥ मेघसन्देशः ॥

3871. MEGHASANDEŚAḤ.

J. L. Collection No. 552. Substance- Paper. Size—6½×4 inches. Sheets—23 (2-24). Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—260. Author—Kālidāsa. Incomplete. Wants beginning.

Beginning:

....

............जने किंपुनर्दूरसंस्थे ॥ ३ ॥

प्रत्यासन्ने नभसि दयिता जीवितालम्बनार्थी
जीमूतेन स्वकुशलमयीं हारयिष्यन्प्रवृत्तिम् ।
सप्रत्यग्रैः कुटजकुसुमैः कल्पितार्घाय तस्मै
प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार ॥ ४ ॥

End—Same as No. 3864.

Colophon:

इति श्रीकालिदासस्य कृतौ मेघसन्देशः समाप्तः ॥

Subject: Meghasandeśa. 122 ślokas.

Remarks:—The Ms. is in a fairly good condition. After the colophon is given the following śloka.

यः पूतनामारणलब्धवर्णः काकोदरो येन विनीतदर्पः ।
यशोदयालङ्कृतमूर्तिरव्यान्नाथो यदूनामथवा रघूणाम् ॥

॥ मेघसन्देशः ॥

3872. MEGHASANDEŚAḤ.

J. L. Collection No. 553. Substance—Paper. Size—10¼×4 inches. Sheets—15. Lines—6 to a Page. Script—Devanāgarī. No. of Granthas—136. Author—Kālidāsa. Pūrvamegha only.

Beginning, end and subject—Same as No. 3866.

Colophon:

इति श्रीकालिदासस्य कृतौ मेघसन्देशे पूर्वमेघः समाप्तः ॥
इदं पुस्तकं श्रीनिवासचक्रपाणिलिखितं भवेत् ॥
श्रीरामप्रसन्न । श्रीगणेशाय नमः ॥ श्रीगुरुभ्यो नमः ॥
रामो विराजते रामो भूमण्डलमपालयत् ।
रामेणोपार्जिताकीर्ती रामचन्द्रेण भूयते ।
रामचन्द्रो दशग्रीवं परलोकमनीनयत् ॥

Remarks:—The Ms. is in a fairly good condition.

॥ मेघसन्देशः ॥

3873. MEGHASANDEŚAḤ.

J.L. Collection No. 554. Substance—Paper. Size—9½×4

inches. Sheets—8. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—113. Author—Kālidāsa. Uttaramegha only.

Beginning:

श्रीगणाधिपतये नमः ॥

विद्युत्वन्तं ललितवनिताः सेन्द्रचापं सचित्राः
संगीताय प्रहतमुरजाः स्निग्धगंभीरघोषम् ।
अन्तस्तोयं मणिमयभुवस्तुङ्गमभ्रंलिहाग्राः
प्रासादास्त्वां तुलयितुमलं यत्र तैस्तैर्विशेषैः ॥ १ ॥

End:

श्रुत्वा वार्तां जलदकथितां तां धनेशोपि सद्यः
शापस्यान्ते सदयहृदयस्संविधायास्तकोपः ।
संयोज्यैतौ विगलितशुचौ दम्पती हृष्टचित्तौ
भोगानिष्टान् विरहगुणितान्प्रापयामास शश्वत् ॥ ५३ ॥

Colophon:

इति श्रीकालिदासस्य कृतौ महाकाव्ये मेघसन्देशे उत्तरमेघः समाप्तः ॥

श्रीरस्तु ॥

भग्नपृष्ठ + प्रतिपालयेत् ॥

श्रीलक्ष्मीनृसिंहार्पणमस्तु ॥

तुङ्गारोपनाम्ना वासुदेवभट्टेन लिखितम् ॥

श्रीरस्तु ॥ शुभमस्तु ॥

Subject: Meghasandeśa Uttaramegha only.

Remarks:—The Ms. is in a fairly good condition.

॥ मेघसन्देशव्याख्या ॥

3874. MEGHASANDEŚAVYĀKHYĀ.

J. L. Collection. No. 555. Substance—Paper. Size —9¾ × 4½ inches. Sheets—61. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—1750. Author—Mallinātha. Complete.

Beginning, end, colophon and subject—Same as No. 3875.

Remarks:—The Ms. is in a fairly good condition.

॥ मेघसन्देशव्याख्या ॥

3875. MEGHASANDEŚAVYĀKHYĀ.

Burnell's Catalogue No. 4784. Page 160. Right column. Substance—Paper. Size—14 × 6 inches. Sheets—84. Lines—6 to 10 to a Page. Script—Devanāgarī. No. of Granthas—1750. Author—Mallinātha. Complete.

Beginning:

श्रीगणेशाय नमः ॥

मातापितृभ्यां जगतो नमो वामार्धजानये ।

सद्यो दक्षिणदृक्पातसङ्कुचद्वामदृष्टये ॥

अन्तारयतिमिरोपशान्तये

शान्तपावनमचिन्त्यवैभवम् ।

तन्नरं वपुषि कुञ्जरं मुखे

मन्महे किमपि तुन्दिलं महः ॥

शरणं करवाणि शर्मदं ते
　　चरणं वाणि चराचरोपजीव्यम् ।
करुणामसृणैः कटाक्षपातैः
　　कुरु मामम्ब कृतार्थसार्थवाहम् ॥

भारतीं कालिदासस्य दुर्व्याख्याविषमूर्छिताम् ।
एषा सञ्जीवनी पीता सद्य उज्जीवयिष्यति ॥

इहान्वयमुखेनैव सर्वं व्याख्यास्यते मया ।
नामूलं लिख्यते किञ्चिन्नानपेक्षितमुच्यते ॥

अथ तत्रभवान् कालिदासो मेघसन्देशाख्यं काव्यं चिकीर्षुः "आशीर्नमस्क्रिया वस्तुर्देशो वापि तन्मुखम्" इति शास्त्रात् काव्यारम्भे वस्तुनिर्देशकथनं प्रस्तौति ॥ कश्चिदिति ॥

End:

सम्प्रति स्वापराधसमाधानपूर्वकं स्वकार्यस्यावश्यकरणं प्रार्थयमानो मेघं विसृजति । हे जलद * *
काव्यान्ते नायकेच्छानुरूपोऽयमाशीर्वादः प्रयुक्त इत्यनुसन्धेयम् ॥

Colophon:

इति श्रीपदवाक्यप्रमाणपारीणमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां मेघसन्देशव्याख्यायां सञ्जीवन्यामुत्तरमेघः समाप्तः ॥

Subject: Sañjivanī a commentary on Meghasandeśa by Mallinātha

Pūrvamegha. 66 ślokas.
Uttaramegha. 54 „

Remarks:—The Ms. is in very good condition. Alternate sheets are sulpherated. In this Ms. the text also is given.

Several editions of the Meghasandeśa with Mallinātha's vyākhyā have been published up till now, the most important of them being the Nirṇayasāgar edition.

॥ मेघसन्देशव्याख्या ॥

3876. MEGHASANDEŚAVYĀKHYĀ.

Burnell's Catalogue No. 4789. Page 161. Left column. Substance—Paper. Size—$10\frac{1}{2} \times 4\frac{1}{4}$ inches. Sheets—36. Lines—8 to 10 to a Page. Script—Devanāgarī. No. of Granthas—875. Author—Mallinātha. Pūrvamegha only.

Beginning—Same as No. 3875.

End:

तस्येति ॥ हे मेघ । तस्य कैलासस्य प्रणयिनः प्रियतमस्येव उत्सङ्गे । * * *

अत्र कैलासस्य अनुकूलनायकत्वं अलकायाश्च स्वाधीनपतिकाख्यनायिकात्वं व्यन्यते । "एकायत्तोऽनुकूलस्यात्" इति । "प्रियोपलालिता नित्यं स्वाधीनपतिकामता" इत्युदाहरन्ति ।

'लालयन्नलकप्रान्तां रचयन्पत्रमञ्जलिः (रीः) ।
एनां विनोदयन्कान्तां छायावदनुवर्तते ॥' इति ॥ ६७ ॥

Colophon:

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां सञ्जीवनीसमाख्यायां मेघसन्देशव्याख्यायां पूर्वमेघः समाप्तः ॥

श्रीरामार्पणमस्तु ॥

Subject : Sañjivanī a commentary on the Meghasandeśa by Mallinātha Pūrvamegha 67 ślokas.

Remarks :—The Ms. is in a fairly good condition.

॥ मेघसन्देशव्याख्या ॥

3877. MEGHASANDEŚAVYĀKHYĀ.

Burnell's Catalogue No. 4790. Page 161. Left column. Substance—Paper. Size—9×4 inches. Sheets—35. Lines—8 to 10 to a Page. Script—Devanāgarī. No. of Granthas—800. Author—Mallinātha. Incomplete. (wants beginning).

Beginning :

रत्नेति ॥ रत्नच्छायानां पद्मरागमणिकान्तीनाम् ।
"छाया सूर्यप्रिया कान्तिः" इत्यमरः ॥

End and colophon—same as No. 3876.

Subject: Sañjīvanī a commentary on Meghasandeśa by Mallinātha Pūrvamegha verses 15 to 67.

Remarks :—The Ms. is in good condition, This Ms. abruptly begins with the 15th śloka of the Pūrvamegha.

॥ मेघसन्देशव्याख्या ॥

3878. MEGHASANDEŚAVYĀKHYĀ.

Burnell's Catalogue No. 4791. Page 161. Left column. Substance—Paper. Size—9¼×4 inches. Sheets—30. Lines—8 or 10 to a Page. Script—Devanāgarī. No. of

Granthas—680. Author—Mallinātha. Complete. Uttara-megha only.

Beginning:

॥ विद्युत्वन्तमिति ॥ यत्रालकायां ललिता रम्या वनिता स्त्रियो येषु ते सहचित्रेण वर्तन्त इति सचित्राः सालेख्याः ॥ "आश्चर्यालेख्ययोश्चित्रम्" इत्यमरः ॥

End and colophon—Same as No. 3875.

Subject: Sañjīvanī. A commentary on Meghasandeśa by Mallinātha. Uttaramegha 54 ślokas.

Remarks:—The Ms. is in good condition.

॥ मेघसन्देशव्याख्या ॥

3879. MEGHASANDEŚAVYĀKHYĀ.

Burnell's Catalogue No. 10159. Page 161. Left column. Substance—Palm leaf Size—$7\frac{1}{4} \times 1\frac{1}{4}$ inches. Leaves—11. Lines—6 to a Page. Script—Telugu. No. of Granthas—150. Author—Mallinātha. Incomplete. Pūrva-megha only.

Beginning—Same as No. 3875.

End:

॥ नीचैरिति ॥ हे मेघ तत्र विदिशासमीपे विश्रामो विश्रमः खेदापनय इत्यर्थः ॥ * *

पण्याः क्रेयाः स्त्रियः वेश्या इत्यर्थः । "वारस्त्री गणिका वेश्या पण्यस्त्री रूपजीवनी" इति शब्दार्णवे । तासां रतिषु क्रीडासु यः परिमलो गन्धविशेषः । विमर्दोत्थे परिम...

Colophon: Nil.

Subject: Sañjīvanī. A commentary on Meghasandeśa by Mallinātha. Pūrvamegha only. 25 ślokas.

Remarks:—The Ms. is in a decaying condition. On the title page is given:—

एक्कोजिहवल्दारिगुजकूबालकवितम्भुडु नरसय तेचिन्ति पुस्तकम् ।

This Ms. belonged to Narasaya brother of Gujakbalakavi and Hauldar to King Ekkoji.

॥ मेघसन्देशव्याख्या ॥

3880. MEGHASANDEŚAVYĀKHYĀ.

Burnell's Catalogue No. 10162. Page 161. Left column. Substance—Palm leaf. Size—16⅛ × 1⅝ inches. Leaves—24. Lines—8 or 9 to a Page. Script—Telugu. No. of Granthas—800. Author—Mallinātha. Incomplete.

Beginning—Same as No. 3875.

End:

सम्प्रति सर्वदा सम्पत्तिमाह । हस्त इति । यत्रालका-
यां वधूनां स्त्रीणां हस्ते लीलार्थं कमललीला कमलं स्मर-
लिङ्गमेतत् * * * *
पाण्डुतां नीता श्रीः शोभाचूडापाशे केशपाशे नवकुरवकम्
.... ॥

Colophon—Same as No. 3875.

Subject: Sañjīvanī. A commentary on Kālidāsa's, Meghasandeśa by Mallinātha.

Pūrvamegha. 67 ślokas.

Uttaramegha. 2 ,,

Remarks:—The Ms. is in a fairly good condition.

॥ मेघसन्देशव्याख्या ॥

3881. MEGHASANDEŚAVYĀKHYĀ.

Burnell's Catalogue No. 10163. Page 161. Left column. Substance—Palm leaf. Size—$14\frac{1}{4} \times 1\frac{3}{8}$ inches. Leaves—24. (38-64). Lines—6 or 7 to a Page. Script—Telugu. No. of Granthas—560. Author—Mallināthа. Incomplete. Uttaramegha only.

Beginning:

...(तुला)श्शब्दात्तत्करो(ती)तिण्यन्तात्तुमुन्प्रत्ययः । अलं पर्याप्ताः । "अलं भूषणपर्याप्तिशक्तिवारणवाचकम्" इत्यमरः। अत्रोपमानोपमेयभूतमेघप्रासादधर्माणां विद्युद्वनितादीनां यथासङ्ख्यमन्योऽन्यसादृश्यान्मेघप्रासादसादृश्यसिद्धिरिति बिम्बप्रतिबिम्बभावेनेयमुपमा पूर्णोपमा ॥ १ ॥

End and colophon—Same as No. 3875.

Subject: Sañjīvanī. A commentary on Meghasandeśa by Mallinātha

Uttaramegha. 54 ślokas.

Remarks:—The Ms. is in a fairly good condition. In the last page is given a few lines of Telugu subhāṣita verses.

॥ मेघसन्देशव्याख्या ॥

3882. MEGHASANDEŚAVYĀKHYĀ.

Burnell's Catalogue No. 10164. Page 161. Left column. Substance—Palm leaf. Size—$14\frac{1}{2} \times 1\frac{1}{4}$ inches. Leaves—61. Lines—6 to a Page. Script—Grantha. No. of Granthas—1750. Author—Mallinātha. Complete.

Beginning, end, colophon and subject—Same as No. 3875.

Remarks:—The Ms. is in a fairly good condition. After the colophon is given:

"रामेण लिखितम्"

॥ मेघसन्देशव्याख्या ॥

3883. MEGHASANDEŚAVYĀKHYĀ.

Burnell's Catalogue No. 10165. Page 161. Left column. Substance—Palm leaf. Size—$16\frac{3}{4} \times 1\frac{1}{8}$ inches. Leaves—43. Lines—5 or 6 to a Page. Script—Grantha. No. of Granthas—675. Author—Mallinātha. Incomplete. Uttaramegha only.

Beginning—Same as No. 3878.

End—Same as No. 3875. But the last few lines are missing.

Subject: Sañjīvanī. A commentary on Meghasandeśa by Mallinātha with the text.
Uttaramegha. 53 ślokas.

Remarks:—The Ms. is in a fairly good condition. Only the last śloka is wanting herein.

॥ मेघसन्देशव्याख्या ॥

3884. MEGHASANDEŚAVYĀKHYĀ.

J. L. Collection No. 556. Substance—Paper. Size—9×4 inches. Sheets—58. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—875. Author—Mallinātha. Pūrvamegha only.

Beginning, end and subject—Same as No. 3876.

Colophon:

इति श्रीमहोपाध्याय+पूर्वमेघः समाप्तः ।

विजयसंवत्सराधिकभाद्रपदबाष्टमीस्थिरवारे पूर्वमेघसन्देशव्याख्यानं समाप्तम् ॥

Remarks:—The Ms. is in good condition. This Ms. was copied in the cyclic year Vijaya, Bhādrapada month, aṣṭamī and Saturday.

॥ मेघसन्देशव्याख्या ॥

3885. MEGHASANDEŚAVYĀKHYĀ.

S. S. Collection No. 77. Substance—Paper. Size—$9\frac{1}{4} \times 3\frac{5}{8}$ inches. Sheets—54 (2-55). Lines—10 to 13 to a Page. Script—Devanāgarī. No. of Granthas—1500. Author—Sthiradeva. Complete.

Beginning:

श्रीगणपतये नमः ॥

शृङ्गारिणः ॥ ततः कविर्यक्षं यथानामत्वेनोपात्तवान् । कालिदासश्च स्वयं शृङ्गारी । तदसौ शृङ्गाररसप्रधानं

मेघदूताभिधानं क्रीडाकाव्यमेतदुपनिबद्धवान् । ननु गिरिनगरादिव्यतिरेकेण कथमस्य महाकाव्यत्वम् । तत्रोच्यते । विदिशा विशालालका स्वःसिन्धुः निर्विंध्याशिप्राप्रभृतिसमुद्रगामिनदीनिगदनेनौपचारात्तस्य प्रतिपादनम् । गिरिश्वशैलादिशैलश्लाधा "हस्ते लीलाकमलम्" इत्यनेन घनसमयपुरःसराणां षड्तूनां निरूपणम् । "यत्र स्त्रीणाम्" इति चन्द्रोदयसमर्थनम् "अप्यन्यस्मिन् जलधरः" इति, तथा "तां कस्याश्चिद्भवनवलभौ" इति आभ्यां भानूदयनिवेदनम् । "विश्रान्तः सन्" "तत्रागारम्" इत्याभ्यामुद्यानस्तुतिनिगदनम् । "भर्तुः केशच्छविः" इति अमुना जलकेलिकथनम् । "यस्याः पक्षाः" इति मधुपानाभिधानम् । "सम्भोगान्ते" तथा "(नीता)रात्रिः" इति सुरतव्यापारवर्णनम् । "जालोद्गीर्णैः" तथा "दिङ्नागानाम्" इत्याभ्यां हिताहितप्राप्तिपरिहारापदेशिमन्त्रचिन्ता । दूतो मेघ एव । "मार्गन्तावत्" इतिप्रयाणनिरूपणम् । "ये त्वाम्" इत्यनेन बुद्धबोधनम् । "शापान्तः" इति नायकाभ्युदय...विप्रलम्भकथयैव समर्पितः । "ताश्चावश्यम्" इत्यत्र पत्नीपदेन "पत्युर्नो यज्ञसंयोगे" इति विवाहसूचनम् । "तत्र स्कन्दम्" इति कुमारवचनमेवमेतैर्नयनादिनगरसागरर्तुचन्द्रोदयार्कोदयोद्यानजलक्रीडामधुपानसुरतमन्त्रदूतप्रणयोक्तिनायकाभ्युदयाविवाहविप्रलम्भकुमारवर्णनैः स्पष्टैरष्टादशभिर्महाकाव्यलक्षणैरुपेतत्वादस्य महाकाव्यत्वम् । तथेदमाद्यवृत्तम् ॥

कश्चिदिति ॥ कश्चिदाश्चर्यकारि महनीय(?)स यद-स्तङ्गमितमहिमेति वचनादनिश्चितनामा । यतः प्रकृतेऽनु-पयोगि....त्यद्येवास्मिकेळिवाक्ये पुराणकथनानुवादसन्दे-हमावहतीति कविर्याह........मनभिधाय सामान्येन नि-र्देशः । यः कोपि रक्षः पुण्यजनः वसतिश्चक्रे स्थितिश्च-कार । रामगिरिः दण्डक इति प्रसिद्धः । तस्याश्रमेषु मुनि-वासोचितस्थानेषु रागवलितान्तःकरणस्य एकप्रस्थानस-म्भवादाश्रमेष्विति बहुवचनम् । किम्भूतेषु जनकतनयास्न-नपुण्योदकेषु विदेहदुहित्राप्लवनपावनपानीयेषु । अत्रालघु-राघवसन्निधानेऽपि सीतायाः श्लाघा महासतीत्वप्रति-पादनार्थं तत्स्पृष्टानां देशानां तीर्थप्रतननार्थम् । तथा च "यदध्यासितमर्हद्भिस्तद्धि तीर्थं प्रचक्षते" इति । अथ वा लिङ्गान्तरसम्भवेऽपि श्रृङ्गाराङ्गत्वात् स्त्रिया निर्देशः । पुनः कीदृशेषु स्निग्धच्छायातरुषु स्निग्धा आरक्तातिलक्ष-णया सान्द्रेत्यर्थः । छाया आतपप्रत्यनीकावपो लाक्षितास्तर-वः पादपा येषु ते नद्यः । यद्वा स्निग्धसरसपल्लवोष्णा(?)तत्वे नारूक्षाः छायातरवो निश्चलछायाः पादपाः विशेषणद्वयम-पि सुखस्थितिकथनार्थम् । केन कारणेन पुनः असौ यक्षः स्वां पुरीं परिहृत्य तत्र निवासमकार्षीत् ? । शापेन कोप-वचसा । कस्य ? भर्तुः स्वामिनः । किम्भूतेन? वर्षभोग्येन वर्षेण भुज्यते वर्षभोग्यः संवत्सरपरिसमाप्यः । यद्वा वर्षे

भोग्यः "कालाध्वनोरत्यन्तसंयोगे" इति द्वितीयासमासः। वर्षे स कर्तुः(?) समुदायरूपमुद्दीपनविभावनभूयस्त्वेन वियोगहृदयदुःखोत्पादनसमर्थनमिति तत्पदापादनम् । पुनः किम्भूतेन? कान्ताविरहगुरुणा वल्लभाविप्रलम्भाद्गुरुणा। कुतः? स प्रभुणा शप्तः अतः स्वाधिकारप्रमत्तः निजनियोगप्रयत्नपरः तस्यालकाधिपविधीयमानेश्वरसपर्योपकरणनवनलिनानयनमधिकारः। तत्र कदाचिदसौ प्रेयसीप्रेमवशः प्रत्युषसि गन्तुमनीशो निशायामेव कमलमुकुलान्यानिनाय। तैश्च धनाधिनाथोऽथ पार्वतीपतिं अपूजयन् अन्यतमकमलकलिकामध्यबद्धमधुकरेण दष्टः तेनायं शशाप। यस्त्वं मुहूर्तमपि निजजायाया विरहमसहमानोऽपराधवानसीत्यतः तवानयैव वर्षं वियोगोऽस्त्विति तेनास्तङ्गतमहिमा प्रतिहतमाहात्म्यः तस्य दिव्यानुभावसन्दर्शिनी दूरदर्शनश्रवणादिशक्तिः प्रतिहता। तत एवामुना जीमूतो दूत्ये प्रवर्तितः। स्थानान्तरेषु सुलभेष्वपि अत्र किल मैथिलीपतिरुषित्वा दैवाद्वियुक्तोऽपि पुनः सीतया सह सङ्गममगमत्। स्वयमपि प्रियासंयोगकामुकं कमनीयलक्षणधरममुमेव भूधरमध्युवास। विप्रलम्भः शृङ्गारः। मन्दाक्रान्तावृत्तम्। "मन्दाक्रान्ताम्भनततमगाः सम्युद्रर्तुलोकैः।" अत्र स्वभावोक्तिरलङ्कृतिः। तथा च तल्लक्षणम्।

"नानावस्थपदार्थानां रूपंसाक्षाद्विवृण्वती।

स्वभावोक्तिश्च जातिश्चेत्याद्या सालङ्कृतिर्मता ॥"

प्रियासन्देशप्रापकाधिगमार्थमाह ॥

End:

कृतोपकारं वारिदमाशिषाभिनन्दयन्नाह। एतादि-
त्यादि ॥ एतत्सन्देशप्रयाणलक्षणं प्रियमिष्टं कृत्वा वि-
धाय मे मम कीदृशस्यानुचितप्रार्थनावर्त्मना दिव्यानुभावा-
त्तमसमस्तवाञ्छितवस्तुत्वात् अनुरूपायाश्च ...जलदपयो-
दसाहाय्यान्मित्रभावाद्वा विधुरो दुःखितोऽहमिति धिया
मम विषयेऽनुक्रोशबुध्या कृपया धिया वा त्वया महदुपकृ-
तम्। अतस्त्वमिष्टान् देशान् विषयान् विचर विहर। कीदृशः
सन्? सम्भृतश्रीः उपचितलक्ष्मीकः। प्रावृषा वर्षासमये
माभूत् मास्म भवान् क्षणमपि मुहूर्तमपि ते तव विद्युता
तडिता प्रियया विप्रयोगोऽयं त्वा(?)ममेति दृष्टान्तस्याशिषो
वा विषयो भवतीति। अत्रोर्जस्वि समुच्चयाशीर्दृष्टान्तानां
सङ्करस्तथा च।

यत्रैकानेक....वस्त्वपरस्यासुखावहाद्यैव।
ज्ञेयः समुच्चयोऽसौ त्रेधान्यः सदसतोर्योगः ॥
आशीर्नामाभिलषितवस्तुन्याशंसनम् ॥ १०६ ॥

उद्भावितखिलपदामिह मेघदूते
काव्यप्रबन्धरसबन्धुरभावभाजि।
मज्जीभवद्गुणकथं स्थिरदेवनामा
टीकामिमामकृत कीर्तिमिव प्रसन्नाम् ॥ १ ॥

आरोहन्ति पतत्रिणोऽपि न कटप्रस्थे तटोत्तुङ्गतां
जानीते पुनरस्य मन्दरगिरेर्मूर्ध्ना धुनानो रविः ।
भूयांसो रचयन्ति वाचमुदितव्युत्पत्तिसारं गिरां
बध्नाति स्थिरदेव एव हि कविः वागर्थविज्ञो गुरुः ॥ २ ॥

शृङ्गारे स्थिरदेव एव हि कविः प्राक्कालिदासोऽथवा
यद्वाचाममृतप्रसादसुहृदामास्वाद्य सद्यो रसम् ।
कर्णोद्भिन्नकपोलपालिपुलकाकीर्तिश्चलत्कुण्डलं
मूर्धानं विधुनोति निश्चितमिदं देवी सरस्वत्यपि ॥ ३ ॥

Colophon:

इति श्रीसरस्वतीशृङ्गारहारापरनाम्नो महाकविश्रीस्थिरदेवकृतिर्महाकविकालिदासकृतस्य महाकाव्यमेघदूतस्य टीका समाप्ता ॥

संवत् १६५६ कार्तिकशुद्धत्रयोदशी वाराणस्यां शुकोषनाम्ना गोविन्देनेदं पुस्तकं लिखितम् ।

श्रीरस्तु ॥ विश्वेश्वराय नमः शुभमस्तु ॥

भग्नपृष्ठ + प्रतिपालयेत ॥

शुभं भवतु ॥

मेघदूतकाव्यटीका पुस्तकं वासुदेवस्य बालंभट्टस्येदम् । गोविन्दभट्ट ॥

Subject: Meghadūtaṭīkā. A commentary on Meghadūta by Sthiradeva. Pūrvamegha and Uttaramegha. 106 ślokas.

Remarks:—The Ms. is fairly old and worn out. It is full of scriptorial blunders. There is also a paper transcript of this Ms. in this Library. See T. V. No. 479

Sthiradeva, the author of this commentary, evidently a Jaina

as the name suggests, has the confidence to assert that he perhaps is the only poet who can handle the sentiment Śṛṅgāra succesfully. With reluctance he accepts that Kālidāsa preceded him in that art and was equally clever at it.

The Ms. is dated samvat 1656 or 1600 A. D. The owner of the Ms. was Bālambhaṭṭa.

॥ हंससन्देशः ॥

3886. HAṂSASANDEŚAḤ.

Burnell's Catalogue No. 10167. Page 163. Left column. Substance—Palm leaf. Size—$15\frac{1}{2} \times 1\frac{1}{2}$ inches. Leaves—18. Lines—5 to a Page. Script—Grantha. No. of Granthas—200. Author—Śrī Vedāntadeśika. Incomplete. (Wants end)

Beginning:

श्रीरामाय नमः ॥

वंशे जातः सवितुरनघे मानयन् मानुषत्वं
देवः श्रीमान् जनकतनयान्वेषणे जागरूकः ।
प्रत्यायाते पवनतनये निश्चितार्थः स कामी
कल्पाकारां कथमपि निशामाविभातं विषेहे ॥ १ ॥

काल्ये सेनां कपिकुलपतेस्तूर्णमुद्योजयिष्यन्
दूरीभावाज्जनकदुहितुर्दूयमानान्तरात्मा ।
क्रीडाखेलं कमपि सरसि क्वापि कालोपयातं
राकाचन्द्रद्युतिसहचरं राजहंसं ददर्श ॥ १ ॥

तस्मिन् सीतागतिमनुगते तद्दुकूलाङ्कमूर्वौं
तन्मञ्जीरप्रतिमनिनदे न्यस्तनिष्पन्ददृष्टिः ।
वीरश्चेतो विलयमगमत्तन्मयात्मा मुहूर्तं
शङ्केतीव्रं भवति समये शासनं मीनकेतोः ॥ ३ ॥

End:

मत्प्रस्तावप्रणवमाधि सा मैथिली मानये त्वां
म्लानं शोकाद्वदनकमलं मन्दमुन्नम्य भीरु ।
अन्तस्तोषादमृतलहरीलब्धसब्रह्मचर्यै-
रम्भोजानामुषसि मुषिता मन्दरागैः कटाक्षैः ॥ २९ ॥
विश्वस्ता सा रघुकुलवधूस्त्वामशेषावदातं
प्रत्याश्वासादधिगतरुचिप्रक्तनीवेन्दुलेखा ।
मत्सन्देशे तदनु सुमुखी सावधाना भवित्री
किं न स्त्रीणां जनयति मुदं कान्तवार्तागमोऽपि ॥ ३० ॥

Colophon:

इति श्रीवेदान्ताचार्यविरचिते हंससन्देशे पूर्वार्धं समाप्तम् ॥

Subject: Hamsasandesa.

Purvārdha. 60 ślokas.
Uttarārdha. 30 ,,

Remarks:—The Ms. is in a fairly good condition. This Ms. abruptly ends with the 30th śloka of the Uttarārdha.

The author of this work is the same as the famous Viśiṣṭādvaita philosopher who lived between 1200 and 1300. A. D. His other works on kāvya are the Pādukāsahasra, Yādavā-

bhyudaya etc. The life and times of Vedānta Deśika have been well set forth in the Introduction to the Yādavābhyudaya, published in the Śrī Vāṇī Vilās Press, Srirangam. The present work is available in print, having been published in Grantha characters from Kumbhakonam.

The Haṃsadūta is a poem embodying the love message sent by Rāma to his lost Sītā, through a Hamsa or the celestial swan.

॥ हंससन्देशः ॥

3887. HAṂSASANDEŚAḤ.

Burnell's Catalogue No. 4862. Page 163. Left column.

Substance—Paper. Size—$9\frac{1}{4} \times 3\frac{3}{4}$ inches. Sheets—28. Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—300. Author—?. Complete.

Beginning:

दुकूलं बिभ्राणो दलितहरितालद्युतिहरं
जपापुष्पश्रेणीरुचिरुचिरपादाम्बुजतलः ।
तमालश्यामाङ्गोदरहसितलीलाश्चितमुखः
परानन्दाभोगः स्फुरतु हृदि मे कोऽपि पुरुषः ॥ १ ॥

यदा यातो गोपीहृदयमदनो नन्दसद्मना-
न्मुकुन्दो गान्दिन्यास्तनयमनुरुन्धन्मधुपुरीम् ।
तदा माङ्क्षीच्चिन्तासरिति धनघूर्णापरिचयै-
रगाधायां बाधामयपयसि राधाविरहिणी ॥ २ ॥

कदाचित्खेदाग्निं विघटयतुमन्तर्गतमसौ
सहालीभिर्लेभे तरलितमना यां वनतटीम् ।

चिरादस्याश्चित्तं परिचितकुटीरावकलना-
दवस्थान्तास्तरस्फुटमियमसुप्तेः प्रियसखी ॥ ३ ॥

तदा निस्पन्दाक्षी कलितनलिनीपल्लवकुलैः
परीणाहात्प्रेम्णामकुशलशताशङ्कि हृदयैः ।
दृगम्भोगम्भीरीकृतमिहिरपुत्रीलहरिभि-
र्विलीना धूलीनामुपरिपरिवव्रे परिजनैः ॥ ४ ॥

ततस्तां न्यस्ताङ्गीमुरसि ललितायाः कमलिनी-
पलाशैः कालिन्दीसलिलशिशिरैर्वीजिततनुम् ।
परावृत्तश्वासाङ्कुरलालितकण्ठी कलयतां
सखीसन्दोहानां प्रमदभरशाली ध्वनिरभूत् ॥ ५ ॥

विधायाङ्कं पङ्करुहदलाश्लिष्टङ्गस्य ललिता
ततो राधां नीराहरणसरणौ न्यस्तचरणाम् ।
मिलन्तं कालिन्दीपुलिनभुवि लीलाश्चितगति-
र्ददर्शाग्रे कश्चिन्मधुरविरुतं श्वेतगरुतम् ॥ ६ ॥

तदालोकात्स्तोकोल्लसितहृदया सादरमसौ
प्रणामं शंसन्ती लघु लघु समासाद्य सविधम् ।
धृतोत्कण्ठा सद्यो हरिसदसि सन्देशहरणे
वरं दूतं मेने तमतिललितं हन्त ललिता ॥ ७ ॥

अमर्षात्प्रेमेर्ष्यां सपदि दधती कंसमथने
प्रवृत्ता हंसाय स्वमभिलषितं शंसितुमसौ ।
न तस्या दोषोऽयं यदिह विहगं प्रार्थितवती
न कस्मिन् विश्वासं दिशति हरिभक्तिप्रणयिता ॥ ८ ॥

पवित्रेषु प्रायो विरचयसि तोयेषु वसतिं
प्रमोदं नालीके वहसि विशदात्मा स्वयमसि ।
अतोऽहं दुःखार्ता शरणमबला त्वां गतवती
न याच्ञा सत्पक्षे व्रजति हि कदाचिद्विफलताम् ॥ ९ ॥

चिरं विस्मृत्यास्मान्विरहदहनज्वालविकला-
कलावान्सानन्दं वसति मधुरायां मधुरिपुः ।
तदेवं सन्देशं स्वमनसि समारोप्य निखिलं
भवाञ्क्षिप्रं तस्य श्रवणपदवीं सङ्गमयतु ॥ १० ॥

End:

अपूर्वा यस्यान्तर्विलसति सदा सारसरुचि-
र्विभक्तुं शक्येते सपदि मिलिते येन पयसी ।
कथङ्कारं युक्तो भवतु कृतिनस्तस्य भवतो
विलम्बः कादम्बीरमण मधुरासङ्गमविधौ ॥ ३८ ॥

प्रपन्नः प्रेमाणं भगवति सदा भागवतभा-
कपराचीनो जन्मावधि भवरसाद्भक्तिमधुरः ।
चिरञ्जीवोऽपि श्रीमान् जगति विदितः शङ्करतया
धुरीणो धीराणामभिधराणि वैयासकिरिव ॥ ३९ ॥

रसानामाधारैरपरिचितदोषः सहृदयैः
मुरारातिक्रीडानिबिडघटनारूपसहितः ।
प्रबन्धोऽयं बन्धोरखिलजगतां तस्य सहसा
प्रभोरन्तःसान्द्रां प्रमदलहरीं पल्लवयतु ॥ ४० ॥

Colophon:

इति श्रीहंसदूताख्यं काव्यं समाप्तम् ॥

Subject:— Hamsasandeśa 140 ślokas.

Remarks:—The Ms. is in good condition. After the colophon is given the following:—

'यमाधारं सर्वागमनमणिगणानां सुकृतिनो
विदुर्गोपालाख्यं सकलविबुधालङ्कृतिवरम् ।
तदङ्गोत्थश्रीमानवनिसुरविख्यातमहिमा
महाचार्यः कृष्णोत्तरगपदरामाभिध इदम् ॥

खबाणाङ्क्षोणीगणितशरदिश्यामदलगा
मधोः षष्ठीवारो हिमकरसुतस्यापि शुभदः ।
मतःकालो यत्र प्रगुणहृदयानन्दजननं
व्यलेखीत्सत्काव्यं परमरमणीयं परमुदा ॥ युग्मम् ॥'

and on the title page is given:

श्रीसर्वविद्यानिधानकवीन्द्राचार्य सरस्वतीनां हंसदूताख्यं काव्यम् ॥

The author of the work is unknown. The information given on the title page leads us to believe that this Ms. should have formed part of the collection of the famous Kavindrācārya who was living in Benares in the 17th century.

The Ms. is dated 1650-but whether it is Śaka or Saṃvat, we cannot say. Probably it was saṃvat. The scribe was one Rāmakṛṣṇa.

This Haṃsasandeśa, otherwise known as Haṃsadūta embodies the love message sent by Śrī Kṛṣṇa to his beloved Rādhā.

॥ शतकानि ॥

ŚATAKAS.

॥ अन्यापदेशशतकम् ॥

3888. ANYĀPADEŚAŚATAKAM.

Burnell's Catalogue No. 5010 c.

Substance—Paper. Size—10¼ × 4¼ inches. Sheets—10 (10-20). Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—250. Author—Nīlakaṇṭhadīkṣita. Complete.

Beginning:

छायावृक्षमुपाश्रयन्ति पथिषु श्रान्ता हि पान्थाः समं
तेष्वेकोऽस्य शुभं शुभेन मनसा हृष्यन्ननुध्यायति ।
अन्यो भङ्कुमवेक्षतेऽस्यविटपानाधारयष्टेः कृते
कश्चिच्चिच्छुनुते कवाटफलकं कर्तुं तमेव क्षणात् ॥ १ ॥

End:

भूतानां प्रभवस्थितिप्रविलयास्त्वय्येव विश्वम्भरे
त्वद्गर्भे ननु ते रसातलजुषो दैत्याः फणीन्द्राश्च ये ।
त्वं सर्वैरुपजीव्यसे दिविचरैस्त्वत्तोऽपि किञ्चित्परं
न स्यात्स्यादपि वा निरस्तविभवं ब्रह्मत्वमेवासि नः ॥ १०१ ॥

Colophon:

अन्यापदेशः समाप्तः ॥

Subject: Anyāpadeśaśataka.

1-101 ślokas.

Remarks:—The Ms. is in good condition. The other works contained herein are:—

1. Śāntivilāsa (51 ślokas).
2. Sabhārañjanaśatakam (105 ślokas)
3. Kaliviḍambanam (102 ślokas.)

The Anyāpadeśaśataka of Nīlakaṇṭhadīkṣita has been published many times over. The Nirnayasagara and the Śrī Vāni Vilās Press editions are worthy of note. This work does not seem to have been noticed separately by Dr. Burnell.

॥ अन्यापदेशशतकम् ॥

3889. ANYĀPADEŚAŚATAKAM.

J. L. Collection No. 557. Substance—Paper. Size—7 × 4¾ inches. Sheet—1 (5th sheet only). Lines—17 to a page. Script—Devanāgarī. No. of Granthas—20. Author—Ghanaśyāma. Incomplete. (Wants beginning.)

Beginning:

....जनमयि शैविलिति त्वदीयशार्द्धि धिक् ॥ ९० ॥

पुरा मौलौ वसामीति दर्पोऽभूत्तव कैतक ।

मृषावादि सदेतर्हि स्थाने भ्रष्टपसीश्वरात् ॥ ९१ ॥

उत्तंसीकरणधिया कैतकनिकटं न यावदाप्तोऽहम् ।

शिव शिव तावत्कठिनैः कण्टकपटलैरतीव भिन्नोऽसि ॥ ९२ ॥

धुत्तूरयज्वपतिबिम्बविडम्बकत्वं

पुष्पं प्रदर्शयसि हन्त यतस्ततस्त्वाम् ।

उन्मत्त एष कितवोऽयमितीव सर्वे

लोका वदन्ति न भजन्ति फलं त्वदीयम् ॥ ९३ ॥

End:

नक्षत्राधिपतिं निलिम्पतटिनीं धुत्तूरपुष्पं पशुं

व्यालव्यूहमहार्यराजतनयां हालाहलं कर्परम् ।

भूतान् भस्ममृगं मदोक्षमजिनं साधारणत्वेन यः
श्रीमान्विश्वमिदं बिभर्ति सततं वन्द्यः स एको विभुः ॥१००॥

यस्येशोग्रभवः पिता किल महादेवः सकाशीप्रसूः
साधुः श्रेयसि सुन्दरीप्रियतमा शाकम्भरी च स्वसा ।
तस्याशोः सुकवेः कृता भुवि शतश्लोकी चिरं वर्धता-
माख्यातप्रतिवस्तुपद्ययुगला सेयं चतुर्ग्रन्थवत् ॥

Colophon:

संपूर्णोऽसावन्यापदेशशतश्लोकीप्रबन्धः ॥

Subject: Anyapadeśaśataka.

Remarks:—The Ms. is in a fairly good condition. This is one of the many unpublished works of this author, who adorned the Tanjore Court in the 18th century. For detailed information regarding the author, please refer to the article on Ghanaśyāma in the Journal of Oriental Research, Madras Vol. III Part iii.

॥ अन्यापदेशशतकम् ॥

3890. ANYĀPADEŚAŚATAKAM.

Burnell's Catalogue No. 4989. Page 163. Right column. Substance—Paper. Size—10×3¾ inches. Sheets—12. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—238. Author—?. Complete.

Beginning:

श्रीगणेशो विजयते । श्रीवेङ्कटेश ॥

सौरभ्यस्य पराश्रयं सुमनसां मूर्ध्नि स्फुरद्भूषणं
स्वर्णं वर्णगुणेन चम्पकमहो भृङ्गा न चेदाययुः ।

लोके ग्राह्यतमस्य तस्य गुणिनः का हानिरेतावता
वैधेयाः मधुपास्त एव विधिना सर्वात्मना वञ्चिताः ॥

सौरभ्यशालिनि मनोहरवर्णभाजि
मूर्ध्निस्थिते सुमनसामपि कैतकेऽस्मिन् ।
सर्वज्ञ तन्मृड भवाननपेक्षमाणः
सम्मन्य(?)से कथमसत्तरमर्कपुष्पम् ॥ २ ॥

बन्धुत्वेन दिने दिने दिनमणिः कान्ति विकासं तथा
सौरभ्यं दिशतीति चम्पकसखेर्गर्वस्तवायं वृथा ।
स्थानान्मत्तमतङ्गजेन रभसादुन्मूलितं त्वं निजैः
पादैर्न ग्लपयेत चेदनुपमो बन्धुस्तवायं तदा ॥ ३ ॥

End:

सम्भवः श्रुतिगतस्तव यस्मा-
त्वं कथं जल विलुम्बासि वह्निम् ।
आश्रयाशजनितस्य तदेत-
द्युक्तमेव किमिवात्र विचित्रम् ॥ ९९ ॥

श्रक्रं वाजिवरामरद्रुमगजश्रेष्ठैः समुच्छ्राययन्
लक्ष्मीकौस्तुभयोः प्रधानविधिना नारायणं प्रीणयन् ।
पीयूषेण सुरान् जगन्ति विधुना नित्यं समाश्वासयन्
जीयादत्र भवानसीमगरिमा दुग्धाम्बुराशे चिरम् ॥ १०० ॥

Colophon: Nil.

Subject: Anyāpadeśaśataka. 1-100 ślokas.

Remarks:—The Ms. is in a fairly good condition. The author of this work is unknown.

॥ अन्यापदेशशतकम् ॥

3891. ANYĀPADEŚAŚATAKAM.

Burnell's Catalogue No. 4990. Page 163. Right column.
Substance—Paper. Size—8½ × 4 inches. Sheets—24.
Lines—6 to a Page. Script—Devanāgarī. No of Granthas—200. Author—?. Complete. Wants end.

Beginning—Same as No. 3890.

End:

धावं धावमतिश्रमाकुलातनुः कान्तारभागेषु यः
त्वां दैवादवलोक्यनिर्वृतिकृते पान्थः समाशिश्रिये ।
प्राणैर्ग्राहयता तमद्य भवता हा हन्त पद्माकरः
श्रेयो यच्छरणागता वनकृतां सम्यक् तदासादितम् ॥ ९५ ॥

अनपायमपास्य पुष्पवृक्षं
करिणं नाश्रयश्च‍ृङ्गदानलोभात् ।
अयि मूढ स एष कर्णतालै-
रभिहन्याद्यदि जीवितं कुतस्ते ॥ ९६ ॥

हैमस्तम्ब इवावभाति परितो विश्वत्रयं व्याप्य यः
कल्पद्रूनपि यो बिभर्ति............... ।

Subject: Anyāpadeśaśataka. 1-96 ślokas.

Remarks:—The Ms. is in good condition.

॥ अन्यापदेशशतकम् ॥

3892. ANYĀPADEŚAŚATAKAM.

Not noticed by Burnell. Ms. No. 15733.
Substance—Paper. Size—10¾ × 4¼ inches. Sheets—10.

Lines—28 to a Page. Script—Devanāgarī. No. of Granthas—280. Author—?. Complete.

Beginning:

अन्यापदेशसङ्ग्रहो लिख्यते ॥

ध्वनिम(र)तिमधुरश्चुचित्व(?)मुच्चैर्जनैरपि शङ्खनदीपतेस्तवाभूत् ।
अवगतमखिलं बहिस्तवैतत्कुटिलतरं पुनरन्तरं न विद्मः ॥ १ ॥

याचकान्योक्तयः—

देहीति वक्तुकामस्य यद्दुःखमुपजायते ।
दाता चेत्तद्विजानीयाद्द्यात्स्वपिशितान्यपि ॥ २ ॥

विद्यावतां दातरि दीनता चेत्किं भारतीविभ्रमकैतवेन ।
दैन्यं यदि प्रेयसि सुन्दरीणां धिग्जीवितं तत्कुसुमायुधस्य ॥ ३ ॥

बालकः स्त्रीजनो राजा जामातार्थी च पञ्चमः ।
वित्तावित्तं न जानन्ति निसर्गादेव भूपतिः ॥ ४ ॥

किं नो परेण बहुना परिजल्पितेन
संसर्ग एष महतां महते फलाय ।
अम्भोनिधेस्तटरुहास्तरवोऽपि येन
वेलातलोच्चलितरत्नकृतालवालाः ॥ ५ ॥

रे रे रसालफलसारवचो विधेहि
वासन्तिकीं स्वफलपल्लवपुष्पलक्ष्मीम् ।
तावद्विकस्वरपिकद्विजसात्कुरु द्राक्
न व्यग्रितोऽसि चपलैः प्लवगैश्च यावत् ॥ ६ ॥

प्रासाद्गलितसिक्थस्य करिणः किं गतं भवेत् ।
पिपीलिकस्तु तेनैव सकुटुम्बो हि जीवति ॥ ७ ॥

किन्तेनानुपयुक्तेन पूर्णेन लवणाब्धिना ।
जानुमात्रावरा वापी यत्र तृष्णा निवार्यते ॥ ८ ॥

End:

कोऽहं कौ देशकालौ समविषमगुणाः के द्विषः के सहायाः
का शक्तिः कोऽभ्युपायः फलमपि च कियत्कीदृशी दैवसम्पत् ।
सम्पत्तौ कोऽतिबन्धुः प्रतिहतवचनस्योत्तरं वा कियत्स्या-
दित्येवङ्कर्मसिद्धावहितमनसः सम्पदो हस्तसंस्थाः ॥ ८४ ॥

उत्खातान्प्रतिरोपयन्कुसुमिताश्चिन्वन् लघून् वर्धयन्
प्रोत्तुङ्गान्नमयन् न तान्समुदयन्प्रग्लानमुत्सेकयन् ।
अन्तः कण्टकिनो बहिर्निरसयन्विश्लेषयन्संहतान्
मालाकार इव प्रपञ्चचतुरो राजा चिरं नन्दति ॥ ८५ ॥

त्वं पद्मेऽधिकभागधेयविभवायं नेत्रयोरञ्चले
नित्यं तिष्ठसि रामभद्रनृपतेः सेवेऽहमन्ते दिशाम् ।
कीर्तेऽलं हसितेन दूरगतयाप्याकृष्टचित्तस्त्वया
मामप्यङ्कगता... तृणलघुप्रायामयं मन्यते ॥ ८६ ॥

नौश्च दुर्जनजिह्वा च प्रतिकूलं विसर्पिणी ।
परप्रतारणायैव निर्मिता केन दारुणा ॥ ८७ ॥

Subject: Anyāpadeśaśataka. 1-87 ślokas.

Remarks:—The Ms. is in a fairly good condition. The author of this composition is unknown.

॥ अन्यापदेशशतकम् ॥

3893. ANYĀPADEŚAŚATAKAM.

Burnell's Catalogue No. 4987. Page 163. Right column.
Substance—Paper. Size—9¾ × 4⅛ inches. Sheets—10. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—192. Author—?. Incomplete.

Beginning:

श्रीगणेशाय नमः ॥ अविघ्नमस्तु ॥

लक्ष्मीं तनोतु महतीं जगतां त्रयाणां
कात्यायनीरमणमौलिशशाङ्करेखा ।
मन्दाकिनीसलिलशीकरिणी विधत्ते
या सा विभिन्ननवमौक्तिकशुक्तिशङ्काम् ॥ १ ॥

अर्थो न केवलमिह प्रकृतोपयोगी
दृश्येत वश्यवचसां हि गिरा कवीनाम् ।
अर्थान्तराणि च यथा निधयोऽतिगुप्ताः
सिद्धाञ्जनेन बहवः प्रकटीभवन्ति ॥ २ ॥

आनन्दमुद्वहचकोरसुधारसार्द्रै-
रक्षीणकैरवसुगन्धिभिरिन्दुपादैः ।
नाङ्गीकरोति यदि तानिह चक्रवाकः
का ते व्यथा रटतु निःसह एव कामम् ॥ ३ ॥

दूरे गिरां हि महिमा पथि दुर्जनाना-
मेते यतो भगवतापि पुरा निहन्त्रा ।
कण्ठादधो गमयितुं यदशक्यमासी-
त्त्रायस्तदेव गरळं हृदये वहन्ति ॥ ४ ॥

End:

श्रेयांसि सन्तु भूयांसि यावत्कल्पं पयोमुचाम् ।
विश्वेषामुपभोगाय जीवनं यैरुपार्जितम् ॥ ९२ ॥

सभङ्गः सञ्चारः सततमखिलं जीवनमिदं
दुरापं वाराशेरपि च सहवासो विषधरैः ।
अथाप्येतद्भाग्यं ननु भवति वाचामविषयं
यदस्मादप्यासन्नं मृतशशिसन्तानतरवः ॥ ९३ ॥

Colophon: Nil.

Subject: Anyāpadeaśaśataka. 1-93 ślokas.

Remarks:—The Ms. is in a fairly good condition. The author of this work is unknown.

॥ अन्यापदेशशतकम् ॥

3894. ANYĀPADEŚAŚATAKAM.

Burnell's Catalogue No. 4919. Page 163. Right column. Substance—Paper. Size—10×4 inches. Sheets—9. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—191. Author—?. Incomplete.

Beginning, end, colophon and subject—Same as No. 3893.

Remarks:—The Ms. is in good condition.

॥ अमरुकशतकम् ॥

3895. AMARUKAŚATAKAM.

Burnell's Catalogue No. 4975. Page 163. Right column. Substance—Paper. Size—10$\frac{3}{8}$×4$\frac{7}{8}$ inches. Sheets—21.

Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—300. Author—Śaṅkarācārya. Complete.

Beginning:

श्रीगणेशाय नमः ॥

चिन्ताशताकुलस्वान्तसन्तापततिशान्तये ।
हन्तारमन्तरायाणां दन्तावलमहं भजे ॥ १ ॥

ज्याकृष्टिबद्धकटकामुखपाणिपृष्ठ-
प्रेङ्खन्नखांशुचयसंवलितो मृडान्याः ।
त्वाम्पातु मञ्जरितपल्लवकर्णपूर-
लोभभ्रमद्भ्रमरविभ्रमभृत्कटाक्षः ॥ २ ॥

End:

॥ कवेर्वाक्यम् ॥

प्रियकृतपटस्तेयक्रीडाविडम्बनविह्वलां
किमपि करुणालापां तन्वीमुदीक्ष्य ससम्भ्रमम् ।
अपि विगलितैः स्कन्धावारे गते सुरताहवे
त्रिभुवनमहाधन्वी स्थाने व्यवर्तत मन्मथः ॥ १०० ॥

॥ कवेर्वाक्यम् ॥

सालक्तकेन नवपल्लवकोमलेन
पादेन नूपुरवता मदलालसेन ।
यस्ताड्यते दयितया प्रणयापराधे
सोऽङ्गीकृतो भगवता मकरध्वजेन ॥ १०१ ॥

Colophon:

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमच्छङ्कराचार्यविरचितमरुकशतकं सम्पूर्णम् ॥

Subject: Āmarukaśataka. 101 ślokas.

Remarks:—The Ms. is in good condition. The work is ascribed to a Śaṅkara and there is a tradition that seeks to identify this Śaṅkara with the famous author of the Bhāṣya on the Brahma sūtras.

The Śataka itself is very old,—older than Ānandavardhana, the author of the Dhvanyāloka. Some other copies give the name of the author as Amarukakavi. Amaruka was a King, according to tradition. The śataka deals with the sentiment of Śṛṅgāra. In No. 3905 the commentator Vemabhūpāla cites the author as Amaruka.

॥ अमरुकशतकम् ॥

3896. AMARUKAŚATAKAM.

Burnell's Catalogue No. 4976. Page 103. Right column. Substance—Paper. Size—$9\frac{1}{4} \times 5\frac{1}{2}$ inches. Sheets —8. Lines—14 to a Page. Script—Devanāgarī. No. of Granthas—300. Author—Śaṅkarācārya. Complete.

Beginning:

ज्याकृष्टिबद्ध॰ Same as No. 3895.

End:

कान्ते तल्पमुपागते विगलिता नीवी स्वयं बन्धनात्
वासो विश्लथमेखलागुणधृतं किञ्चिन्नितम्बे स्थितम् ।
एतावत्सखि वेद्मि साम्प्रतमहं तस्याङ्गसंयोगतः
कोऽयं कास्मि कथन्नु वासहमिति स्वल्पापि मे न स्मृतिः ॥

प्रासादे सा दिशि दिशि च सा पृष्ठतः सा पुरः सा
पर्यङ्के सा पथि पथि च सा तद्वियोगातुरस्य ।

हंहो चेतः प्रकृतिरपरा नास्ति मे कापि सा सा
सा सा सा सा जयति सकले कोऽप्यमद्वैतवादः ॥ १०२ ॥

Colophon and subject—Same as No. 3895.

Remarks :—The Ms. is in a fairly good condition.

॥ अमरुकशतकम् ॥

3897. AMARUKAŚATAKAM.

Burnell's Catalogue No. 4977. Page 163. Right column. Substance—Paper. Size—9×4½ inches. Sheets—13. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—300. Author—Śaṅkarācārya Complete

Beginning—Same as No. 3896.

End and subject—Same as No. 3895.

Colophon:

इति वीरनारायणसकलविद्याविशारदवेमभूपालविरचिता शृङ्गारदीपिका समाप्ता ।

इदं पुस्तकं परमचतुरश्रीमन्माणकोजिपण्डितात्मजदेवाजिपण्डितानामेव ॥

Remarks:—The colophon is misleading. The copy is not that of the commentary but only of the text. The pratīkas from the Śṛṅgāradīpikā are given here and hence the colophon.

॥ अमरुकशतकम् ॥

3898. AMARUKAŚATAKAM.

Burnell's Catalogue No. 4978. Page 163. Right column. Substance—Paper. Size—8×4¼ inches. Sheets—17.

Lines—8 or 9 to a Page. Script—Devanāgarī. No. of Granthas—280. Author—Śaṅkarācārya. Complete.

Beginning, colophon and subject—Same as No. 3895.

End:

कान्ते तल्पमुपागेत * * न स्मृतिः ॥ १०० ॥

Remarks:—The Ms. is in a fairly good condition.

॥ अमरुकशतकम् ॥

3899. AMARUKAŚATAKAM.

Burnell's Catalogue No. 4979. Page 163. Right column. Substance—Paper. Size—$10\frac{3}{4} \times 4\frac{3}{4}$ inches. Sheets—17. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—260. Author—Śaṅkarācārya. Complete.

Beginning—Same as No. 3895.

End, colophon and subject—Same as No. 3895.

Remarks:—The Ms. is in a fairly good condition.

॥ अमरुकशतकम् ॥

3900. AMARUKAŚATAKAM.

Burnell's Catalogue No. 4981. Page 163. Right column. Substance—Paper. Size—$9\frac{3}{8} \times 4$ inches. Sheets—14. Lines—9 or 10 to a Page. Script—Devanāgarī. No. of Granthas—300. Author—Śaṅkarācārya. Complete.

Beginning, end and subject—Same as No. 3897.

Colophon: Nil.

Remarks:—The Ms. is in a fairly good condition.

॥ अमरुकशतकम् ॥

3901. AMARUKAŚATAKAM.

Burnell's Catalogue No. 4982. Page 168. Right column. Substance—Paper. Size—$8\frac{1}{2} \times 5\frac{1}{8}$ inches. Sheets—16. Lines—9 to 12 to a Page. Script—Devanāgarī. No. of Granthas—280. Author—Śaṅkarācārya. Complete.

Beginning, end and subject—Same as No. 3897.

Colophon:

इति अमरुककविविरचितं शृङ्गारशतकं सम्पूर्णम् ॥

Remarks:—The Ms. is in a fairly good condition.

॥ अमरुकशतकम् ॥

3902. AMARUKAŚATAKAM.

J. L. Collection No. 558. Substance—Paper. Size—$7 \times 4\frac{3}{4}$ inches. Sheets—2. Lines—21 to a Page. Script—Devanāgarī. No. of Granthas—95. Author—Śaṅkarācārya ?. Incomplete.

Beginning—Same as No. 3895.

End:

दीर्घा वन्दनमालिका विरचिता दृष्ट्यैव नेन्दीवरैः
पुष्पाणां प्रकरः स्मितेन रचितो नो कुन्दजात्यादिभिः ।
दत्तः स्वेदमुचा पयोधरभरेणार्घ्यो न कुम्भाम्भसा
स्वैरेवावयवैः प्रियस्य विशतस्तन्व्या कृतं मङ्गलम् ॥ ४५ ॥

Colophon: Nil.

Subject: Amaruśataka. 1-45 ślokas only.

Remarks:—The Ms. is in good condition.

॥ अमरुकशतकम् ॥

3903. AMARUKAŚATAKAM.

T. S. Collection No. 717. Substance—Paper. Size—10×3¾ inches. Sheets—17. Lines—7 or 8 to a Page. Script—Devanāgarī. No. of Granthas—250. Author Śaṅkarācārya. Complete.

Beginning, end and subject—Same as No. 3895.

Colophon:

इति श्रीशङ्कराचार्यकृतं अमरुकशतकं सम्पूर्णम ॥ शक १७०९ प्लवंगसंवत्सर अधिकश्रावणशुद्धपौर्णिमा भानुवासरे दिवा तुर्ये यामे देवनायकपुरपुलियंगुडिग्रामे राक्षसभुवनकरकमलाकरभट्टसूनुना लिखितमिदं सम्पूर्णम् ॥

The date of this Ms. is 1787 A. D. The Ms. was copied at Puḷiyaṅguḍi by Kamalākarabhaṭṭasūnu.

॥ अमरुकशतकम् ॥

3904. AMARUKAŚATAKAM.

S. K. Collection No. 181. Substance—Paper. Size—10×4½ inches. Sheets—10. Lines—10 or 11 to a Page. Script—Devanāgarī. No. of Granthas—300. Author—Śaṅkarācārya. Complete.

Beginning, end, colophon and subject—Same as No. 3895.

॥ अमरुकशतकव्याख्या ॥

3905. AMARUKAŚATAKAVYĀKHYĀ.

Burnell's Catalogue No. 10223. Page 163. Right column. Substance—Palm Leaf. Size—$13\frac{1}{2} \times 1\frac{1}{8}$ inches. Leaves—259. Lines—3 to a Page. Script—Grantha. No. of Granthas—1200. Author—Vemabhūpāla. Complete.

Beginning:

आसीच्चतुर्थान्वयचक्रवर्ती
वेमक्षितीशो जगदेकपालः ।
एकादशेति प्रतिभाति सङ्ख्या
येनावतारः प्रथमस्य पुंसः ॥

अमरुककविना रचितां शृङ्गाररसात्मिकां शतश्लोकीम् ।
श्रुत्वा विकसितचेतास्तदभिप्रायं प्रकाशते नेतुम् ॥

मूलश्लोकान् समाहृत्य प्रक्षिप्तान्परिहृत्य च ।
विधत्ते विदुषामिष्टां टीकां शृङ्गारदीपिकाम् ॥

अवतारोऽथ सम्बन्धबन्धोभिप्रायलक्षणम् ।
नायिकामदवस्था च नायकश्च ततो रसः ॥

अङ्गानि कैशिके(?)वृत्तेरलङ्कारास्ततः क्रमात् ।
इत्येतानि प्रवक्ष्यन्ते यथासम्भवमञ्जसा ।

अत्र कविस्तावदविघ्नेन ग्रन्थपरिसमाप्त्यर्थमिष्टदेवतास्मरणद्वारेणाशिषं प्रयुङ्क्ते ॥ हरिः ओम् ॥

ज्याकृष्टबद्धकटकामुखपाणिपृष्ठ-
प्रेङ्खन्नखांशुचयसंवलितो मृडान्याः ।

त्वां पातु मञ्जरितपल्लवकर्णपूर-

लोलभ्रमद्भ्रमरविभ्रमभृत्कटाक्षः ॥ १ ॥

ज्याकृष्टेति । मृडान्याः दुर्गायाः कटाक्षः अपाङ्ग-दर्शनं त्वां पात्विति सम्बन्धः । स कीदृशः । ज्याकृष्ट-बद्धकटकामुखपाणिपृष्ठप्रेङ्खन्नखांशुचयसंवलितः ज्याकृष्टः ज्याबद्धः कटकामुखपाणिः कटकामुखो नाम धनुराकर्षण-हस्तविशेषः

"तर्जनीमध्यमामध्यपुङ्खोऽङ्गुष्ठेन पीड्यते ।

यस्मिन्ननामिकायोगात्स हस्तः कटकामुखः" ॥ इति

तस्य पृष्ठे पश्चाद्भागे प्रेङ्खन्तश्चलन्तो नखानामंशवो न-खांशवः तेषां चयः समूहः तेन संवलितः मिश्रितः । पुनः कीदृशः ? मञ्जरितपल्लवकर्णपूरलोभभ्रमद्भ्रमरविभ्रम-भृत्, मञ्जरितः सञ्जातमञ्जरीकः "तदस्य सञ्जातं तारका-दिभ्य इतच्" इतीतच् प्रत्ययः । मञ्जरितश्चासौ पल्ल-वश्च स एव कर्णपूरः तत्र लोभेन स्पृहया भ्रमत् भ्रमरस्त-स्य विभ्रमं विलासं बिभर्तीति विभ्रमभृत् । अत्रोपमालङ्कारः । नखांशुचयमञ्जर्योः पाणिपल्लवयोः कटाक्षभ्रमरयोश्च सादृ-श्यप्रतीतेर्विद्यमानत्वात् यथाकथञ्चित्सादृश्यम् । 'यत्रोद्भूतं प्रतीयत उपमा सा' इत्युक्तत्वात् । अत्र कविः शृङ्गाररसात्मकं काव्यं प्रारभमाण आदौ वीररसाभिव्यञ्जकां धनुराकर्षण-

क्रियां किमर्थमुक्तवानिति नाशङ्कनीयम्। यतः। शृङ्गाररसात्मिकाया एव अवश्यमुखीसंज्ञया देव्या ध्यानं विवक्षितवान्। उक्तञ्च त्रिपुरसारसिन्धौ—

" सन्धाय सुमनोबाणं कर्षन्तीमैक्षवं धनुः।
जगज्जेत्राजपारक्तां देवीं वश्यमुखीं भज " इति॥

End:

कवेर्वाक्यम्—

सालक्तकेन * * मकरध्वजेन॥ स्पष्टोऽर्थः। अत्र दयितया पादेन ताडितोऽपि भगवता मकरध्वजेनाङ्गीकृत इत्यनेन नानाविधैरुपलालितां किमुतेत्ययमर्थः सूचितः। एतावता कामपुरुषार्थस्योपादेयत्वमुक्तं भवति। ॐ॥

Colophon:

इति वीरनारायण सकलविद्याविशारदपेद्दकोमट्टि वेमभूपाल विरचिता शृङ्गारदीपिका समाप्ता॥

बिन्दुदुर्लिपि+सज्जनः॥

Subject: Amarukaśatakavyākhyā otherwise known as Śṛṅgāradīpikā, a commentary on Amarukaśataka with the text.

Remarks:—The Ms. is in a fairly good condition.

The author of the commentary is Vemabhūpāla, the patron of the famous Vāmanabhaṭṭabāṇa. He was living in the middle of the 15th century. This work has been published by the Nirṇayasāgara Press, Bombay.

॥ अमरुकशतकव्याख्या ॥

3906. AMARUKAŚATAKAVYĀKHYĀ.

Burnell's Catalogue No. 10230. Page 163. Right column. Substance—Palm leaf. Size —$16 \times 1\frac{1}{8}$ inches. Leaves—65. Lines—6 to a Page. Script—Grantha. No. of Granthas—1300. Author—Vemabhūpāla. Complete.

Beginning:

वागर्थाविव सम्पृक्तौ + परमेश्वरौ ॥

सरस्वत्यै नमः ।

अन्योन्यमेलनवशात्प्रथमं प्रवृद्धं
पञ्चात्मना व्यवहितश्च कुतोऽपि हेतोः ।
पायं दशां मदमनोरथलाभयोग्यं
पायाच्चिरं रतिमनोभवयोः सुखं वः ॥

ज्याकृष्टिबद्ध० Same as No. 3904

End:

मानं कुरुष्व तत्र गुणोऽस्तीति सख्या बोधिता नायिका तांप्रत्याह—

॥ मू ॥ चरणपतनं + करोम्यहम् ॥

चरणपतनं प्रणामः सास्त्रालापाः सबाष्पभाषितानि दीनवचनानीत्यर्थः । मनोहरचाटवः प्रियोक्तयः कृशतरतनोः क्षीणगात्रस्य प्रियस्य.... ॥

Colophon: Nil.

Subject: Amarukaśatakavyākhyā—otherwise known as Śṛṅgāradīpikā a commentary on Amarukaśataka 1—96 ślokas.

Remarks:—The Ms. is in a fairly good condition. This Ms. abruptly ends in the middle of the commentary on the 96th śloka. The text also is given in this Ms. The index of ślokas is given in the 1st leaf in this Ms.

॥ अमरुकशतकव्याख्या ॥

3907. AMARUKAŚATAKAVYĀKHYĀ.

J. L. Collection No. 559. Substance—Paper. Size—10×4½ inches. Sheets—53. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—1190. Author—Vemabhūpāla. Complete.

Beginning:

ज्याकृष्टि Same as No. 3904.

End:

कवेर्वाक्यम् ॥

प्रियकृतपट + मन्मथः ॥

Colophon: Nil.

Subject—Same as No. 3905.

Remarks:—The Ms. is well preserved.

॥ अमरुकशतकव्याख्या ॥

3908. AMARUKAŚATAKAVYĀKHYĀ.

Burnell's Catalogue No. 1022. Page 163 Right column. Substance—Palm leaf. Size—13¾×1¼ inches. Leaves—79. Lines—6 or 7 to a Page. Script—Grantha. No. of

Granthas—1140. Author—Vemabhūpāla Incomplete. Wants end.

Beginning—Same as No. 3905.

End:

सखीप्रेरणया गृहीतमानानुनयं तं प्रियं निरस्य पश्चात्तापं गतवती नायिका तामुपालभते—

॥ मू ॥ निश्वासा वदनं + मानं वयं कारितः ॥९८॥

Colophon: Nil.

Subject: Amarukaśatakavyākhyā. Otherwise known as Śṛṅgāradīpikā a commentary on Amarukaśataka 1—98 ślokas.

Remarks:—The Ms. is in a fairly good condition. On the title page is given:

ரகுபதி அய்யங்கார் அமருகம் எடுத்தவர் கொடுக்கவேணும். அமருகம் மன்னாரய்யங்கார் கையி எழுத்து. இந்த எழுத்து கோபாலன் எழுதினேன். மாசிமீ 2 அதி ரகுபதி அய்யங்காரவர்க்கு கொடுத்தது. திருவாமி வீராரகவய்யங்காருக்கு.........

There are some fragmentary leaves containing the following ślokas:—

सोपानपङ्क्तौ खचितं मणीनां यस्य प्रभाचक्रमुदं तनोति ।
तत्तीर्थमालोक्य सदा प्रमोदः गोपालबालः कुशलं तनोतु ॥

श्रीवासभूतोपमनेत्रयुग्मः श्रीवासभूतोरुविशालवक्षाः ।
श्रीवासवक्षस्थलशोभिकौस्तुभः श्रीवासयोगः पदमावदातु ॥

गोपीजनायौवनभाग्यचोरं गोपीजनानन्दकरं सुचन्द्रम् ।
गोपीजनानां हृदयं हरन् सः गोपीजने लोलकरः पुनातु ॥

वञ्चितयोषितमन्मथरूपं आश्रितपण्डितवन्दितपादम् ।
मारुतकम्पितनीरदरूपं रक्षि....मद्य भजामि ॥

कुण्डलमण्डितकर्णं पण्डितमण्डलवान्दितपादम् ।
खण्डितपाण्डवशत्रुं मण्डलमण्डनमद्य भजामि ॥

सकृदपि सरसि श्रीरङ्गराजस्य मज्जन्
सकलनदनदीनां स्नानपुण्यं प्रयायात् ।
इति किल निवसन्तस्ते नगर्यां महान्तः
प्रतिदिनमवगाहन्ते तदीये तटाके ॥

स्नानं सरस्यनुदिनं सकलञ्च कर्म
श्रीरङ्गराजविदुषो दिशि विश्रुतस्य ।
वासस्तदीयनगरे महितानुभावैः
श्रीवैष्णवैः सह ततो मम जन्मधाम ॥

श्रीरङ्गराजसरासि प्रतिवासरं यः
स्नानं करोति पुरुषः स तु मुक्त एव ।
यश्चैकवारमपि मज्जति तस्य पुण्यं
सङ्ख्यातुमब्जभवनोऽपि न शक्तिमीयात् ॥
(अब्जासनोऽपि कथितुं क्षमते न सर्वम् ॥)

॥ अमरुकशतकव्याख्या ॥

3909. AMARUKAŚATAKAVYĀKHYĀ.

Burnell's Catalogue No. 10225. Page 163. Right column.
Substance—Palm leaf, Size—15¾×1¼ inches. Leaves—

45. Lines—7 to a Page. Script—Nandināgarī. No. of Granthas—1050. Author—Vemabhūpāla. Incomplete. Wants end.

Beginning—Same as No. 3905.

End:

नायको नायिकां सान्त्वयन्नाह ॥

॥ मू ॥ कठिनहृदये मुञ्च भ्रान्तिं + सुखमास्यताम् ॥

Subject: Amarukaśatakavyākhyā, otherwise known as Śṛṅgāradīpikā a commentary on Amarukaśataka. 1-93 ślokas.

Remarks:— The Ms. is in a fairly good condition. This Ms. abruptly ends in the middle of the commentary on the 93rd śloka. On the title page is given

'चिन्तामणिकृष्णाचार्यारवरपुस्तकं अमरुक'

There is one more fragmentary leaf containing the following śloka.

क्षोणीधरतनये तव वेणीरुचिचौर्यसंशयाद्रुष्टी ।
अत्याहिताद्विधत्ते सत्यापनमेव फणधरग्रहणम् ॥

छायाभिः प्रथमं ततस्तु कुसुमैः पश्चात्फलैः प्रीतये
भूयादेष तरुर्महानिति पथि श्रान्तो जनः सेवते ।
को जानाति तदीयकोटरतले प्रत्यग्रहालाहल-
ज्वालाजालजटालपाटलफणः क्रूरः फणी वर्तते ॥

॥ अमरुकशतकव्याख्या ॥

3910. AMARUKAŚATAKAVYĀKHYĀ.

Burnell's Catalogue No. 10226. Page 163. Right column.

Substance—Palm leaf. Size—17 × 1¼ inches. Leaves—47 (1-14 and 26-58). Lines—7 or 8 to a Page. Script—Grantha. No. of Granthas—1000. Author—Vemabhūpāla. Incomplete.

Beginning :

शुक्लाम्बरधरं + शान्तये ॥

अत्र कविस्तावदविघ्नेन परिसमाप्त्यर्थं॰

Same as No. 3905.

End, colophon and subject—Same as No. 3905.

Remarks:—The Ms. is in a fairly good condition. Commentary on ślokas 23-28 is missing. There are four fragmentary leaves at the end dealing with Kaliviḍambanam, Durgāstotra and some list of books.

॥ अमरुकशतकव्याख्या ॥

3911. AMARUKAŚATAKAVYĀKHYĀ.

Burnell's Catalogue No. 10227. Page 163. Right column. Substance—Palm leaf. Size—16½ × 1¼ inches. Leaves—61. Lines—6 to a Page. Script—Telugu. No. of Granthas—1400. Author—Vemabhūpāla. Complete.

Beginning :

ज्याकृष्ट + कटाक्षः

Same as No. 3905.

End, colophon and subject—Same as No. 3905.

Remarks :—The Ms. is in a fairly good condition. After the colophon is given the following śloka.

अविरलकृतवर्णभ्रेषणं पुस्तकेऽस्मिन्

रचितमनवसाने लेखनीदूषणं वा ।

अनुचितमथवा यद्वक्रतावर्णराशेः

करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ॥

॥ अमरुकशतकव्याख्या ॥

3912. AMARUKAŚATAKAVYĀKHYĀ.

Burnell's Catalogue No. 10228. **Page** 163. Right column. **Substance**—Palm leaf. Size—$13\frac{3}{4} \times 1\frac{1}{4}$ inches. Leaves—59. Lines—5 or 6 to a Page. Script—Telugu. No. of Granthas—1400. Author—Vemabhūpāla. Complete.

Beginning, end, colophon and subject—Same as No. 3910.

Remarks:—The Ms. is in a fairly good condition.

॥ अमरुकशतकव्याख्या ॥

3913. AMARUKAŚATAKAVYĀKHYĀ.

Burnell's Catalogue No. 10229. Page 163. Right column. **Substance**—Palm leaf. Size—$17 \times 1\frac{1}{2}$ inches. Leaves—63. Lines—6 to a Page. Script—Telugu. No. of Granthas—1000. Author—Vemabhūpāla. Incomplete.

Beginning—Same as No. 3910.

End:

नायको नायिकामुपालभते ॥

कपोले पत्राली + निरनुरोधेन तव यम् ॥ *

मध्या च नायकः शकः मानकृतविप्रलम्भशृङ्गारः

सोपालम्भवचनं नर्म । अक्षेपोऽलङ्कारः ॥

Subject: Amarukaśatakavyākhyā, otherwise known as Śṛṅ-

gāradīpikā. A commentary on Amarukaśataka 1-85 ślokas.

Remarks:—The Ms. is in a fairly good condition. This Ms. abruptly ends in the middle of the commentary on śloka. On the title page is given

'अमरुकं पंच्याणी श्लोकटीकामूल आहे'

॥ अमरुकशतकव्याख्या ॥

3914. AMARUKAŚATAKAVYĀKHYĀ.

Burnell's Catalogue No. 4083. **Page** 163. Right column. **Substance**—Paper. **Size**—$10\frac{1}{2} \times 4\frac{1}{2}$ inches. **Sheets**—43. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—930. Author—Vemabhūpāla. Incomplete.

Beginning:

ज्याकृष्टिबद्ध + कटाक्षः ॥

मृडान्या दुर्गायाः० Same as No. 3905.

End:

सन्त्येवात्र गृहे + दुःखानुवृत्या यतः ॥ ५९ ॥

अत्रास्मिन्नगरे गृहे गृहे प्रतिगृहं युवतयस्तरुण्यः सन्ति विद्यन्ते । अधुना इदानीं गत्वा ताः पृच्छ । प्रियोपचारप्रकारमिति शेषः । घनाः प्रेयांसः प्रियतमाः प्रणमन्ति किं प्रेयस्या ? तिशेषः । तव प्रेयान् पुनः प्रियतम.... ।

Subject: Amarukaśatakavyākhyā, otherwise known as Śṛṅgāradīpikā a commentary on Amarukaśataka.

Remarks:—The Ms. is in a fairly good condition. This Ms. ab-

ruptly ends in the middle of the commentary of the 60th śloka. On the title page is given,

वेमभूपकृतं अमरुकटीका मूलारम्भः गणेश बाबाजी

The text also is given in this Ms.

॥ अमरुकशतकव्याख्या ॥

3915. AMARUKAŚATAKAVYĀKHYĀ.

Burnell's Catalogue No. 4984. Page 163. Right column.
Substance—Paper. Size—9⅛×4½ inches. Sheets—28. Lines—10 to a Page. Script— Devanāgarī. No. of Granthas—680. Author—Vemabhūpāla. Incomplete.

Beginning:

मृडान्या दुर्गायाः etc. Same as No. 3905.

End:

सखी नायकमुपालभते ॥ कामो मन्मथः विरहविषमः सन् विरहे विप्रयोगे विषमो वक्रः क्रूर इत्यर्थः ॥ * * * एवमित्येवं सति किसलयमृदुः प्रवालकोमलः प्रमदाजनः कान्ताजनः ॥

Colophon: Nil.

Subject: Amarukaśatakavyākhyā otherwise known as Śṛṅgāradīpikā a commentary on Amarukaśataka 1-54 ślokas.

Remarks:—The Ms. is in a fairly good condition. This Ms. abruptly ends in the middle of the commentary on 54th śloka.

॥ अमरुकशतकव्याख्या ॥

3916. AMARUKAŚATAKAVYĀKHYĀ.

Burnell's Catalogue No. 4980. Page 163. Right column. Substance—Paper. Size—$9\frac{3}{4} \times 4\frac{7}{8}$ inches. Sheets—29 (7, 20 and 21 missing out of 32). Lines—12 or 13 to a Page. Script—Devanāgarī. No. of Granthas—660. Author—Vemabhūpāla. Incomplete.

Beginning:

ज्याकृष्टि etc. Same as No. 3905.

End:

॥ मू ॥ श्लिष्टः कण्ठे किमिति न मया मूढया + प्रेम्णि जाते रसज्ञा ॥

तरुणी युवतिः प्रेम्णि जाते सम्भूते सति लज्जावरणं विहाय प्रकाशमाने सतीत्यर्थः । रसज्ञा रुचिज्ञा सती सम्भोगसौख्यं विशेषेण जानातीत्यर्थः । तदानीं मूढयाज्ञया मया प्राणनाथः प्राणेश्वरः किमिति कण्ठेन श्लिष्ट आलिङ्गितः । किञ्च तस्मिन्प्राणनाथे चुम्बति चुम्बनं कुर्वति सति वदननमनं किं कृता किमर्थमाचरिता किञ्च स प्राणनाथः ॥

Colophon: Nil.

Subject: Amarukaśatakavyākhyā otherwise known as Śṛṅgaradīpikā a commentary on Amarukaśataka 1-52 ślokas.

Remarks:—The Ms. is in a fairly good condition. This Ms. abruptly ends in the middle of the commentary of the 52nd śloka.

॥ अमरुकशतकप्राकृतटीका ॥

3917. AMARUKAŚATAKAPRĀKṚTAṬĪKĀ.

Burnell's Catalogue No. 4985. Page 163. Right column. Substance—Paper. Size—10 × 3⅞ inches. Sheets—10. Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—117. Author—? Incomplete. Wants end.

Beginning:

श्रीगणाधिपतये नमः ।

श्रीसाम्बसदाशिवाय नमः । श्रीगुरुचरणारविन्दाभ्यां नमः ॥

चामरचञ्चुरचिकुरां चामरनिकरैः समीड्यमुखमुकुराम् ।
तामरसायितनयनां तामरुणाम्बां प्रणौमि हृच्छयनाम् ॥

गुञ्जत्षट्पदपुञ्जमञ्जुलरणन्मञ्जीररज्यत्पदा-
म्भोजक्षालितनिर्जराम्बुजमुखी नीराजमाराजिताम् ।
उद्यद्विद्युदपारवारविलसज्जाम्बूनदाभाम्बरा-
मानन्दामृतसिन्धुसान्द्रलहरीमानन्दवल्लीं भजे ॥

ज्ञानें सुखें तूं बहु सर्वदा विशी
रूपें सुराचीं मज सर्वदा विशी ।
त्वद्वीक्षणें भारति दिव्यदेवते
प्रसन्नहोती मम दिव्यदेवते ॥

आचार्योक्तकवित्वकल्पतरुच्या छायाश्रयें शोभली जेमोदें अरुणाकृपामृतरसें विस्तारहीं लाभली । श्रीमत्पण्डितरामचित्सुरसहृत् हृद्यालवालींभलीते आनन्दफलें भरोमुकवितावल्लीसुखोज्जृम्भली ॥ ४ ॥

ज्याजेत्या स धनुर्लतामृदुतन वाम भ्रुवांची असे

* *

॥ मू ॥ ज्याकृष्टबद्धखटिकामुख + भ्रमभृत्कटाक्षैः ॥

॥ व्या ॥ ज्याकर्षणीं दृढमुठीवरि खेलवितो

अम्बाकटाक्षनखरद्युतिसीं मिळतो ।

रक्षो तु ह्मा श्रवणपल्लवकर्णपूरीं

जोलोभितभ्रमरविभ्रमरानुकारी ॥ १ ॥

End:

॥ मू ॥ काञ्च्या गूढतराववद्ध + दत्तोवकाशस्तया ॥ २० ॥

कांचीशीं दृढबान्धुनी पदरहे निद्राकरी सुन्दरी

कां ऐसीह्मणुनी स्वयें सखि जनीं भर्ता विचारा करी ।

मायेनीज हि मोडितो ह्मण उनी आरोपुनी को पहा

निद्रेच्या कपाटें फिरो निद्रिधलें ठांयासितीणेपहा ॥ २ ॥

Colophon: Nil.

Subject: Amaruśataka with Marāṭhi Translation.

Remarks:—The Ms. is in good condition.

॥ आर्यासप्तशती ॥

3918. ĀRYĀSAPTAŚATĪ.

Burnell's Catalogue No. 4898. Page 165. Left column. Substance—Paper. Size—10¾ × 4 inches. Sheets—83. Lines—6 or 7 to a Page. Script—Devanāgarī. No. of Granthas—950. Author—Govardhanācārya. Complete.

Beginning:

श्रीगणेशाय नमः ॥ श्रीगुरुचरणारविन्दाभ्यां नमः ।

श्रीमुद्गलेश्वरो जयति ॥ श्रीसाम्बसदाशिवाय नमः ।

पाणिग्रहे पुलकितं वपुरैशं भूतिभूषितं जयति ।

अङ्कुरित इव मनोभूर्यस्मिन्भस्मावशेषोऽपि ॥ १ ॥

मा वमसंवृणु विषमिदमिति सातङ्कं पितामहेनोक्तः ।

प्रातर्जयति स लज्जः कज्जलमलिनाधरः शम्भुः ॥ २ ॥

जयति प्रिया पदान्ते गरलग्रैवेयकः स्मरारातिः ।

विषमविशिखे विशन्निव शरणं गलबद्धकरवालः ॥ ३ ॥

End:

एषा ध्वनिद्वितीया त्रिभुवनसारा स्फुटोक्तिचातुर्या ।

पश्वेषु हिता सस्या शमनं श्रवणस्य सप्तशती ॥ ५३ ॥

कविरमरसिंहनादस्वरानुवादः सुधैकसंवादः ।

विद्वद्विनोदकन्दः सन्दर्भोऽयं मया सृष्टः ॥ ५४ ॥

उदयनबलभद्राभ्यां सप्तशतीशिष्यसोदराभ्याम् ।

द्यौरिव रविचन्द्राभ्यां प्रकाशिता निर्मलीकृत्य ॥ ५५ ॥

हरिचरणवामलीलां वामन इव कविपदं लिप्सुः ।

अकृतार्यासप्तशतीमेकां गोवर्धनाचार्यः ॥ ५६ ॥

Colophon:

इति श्रीगोवर्धनाचार्यविरचितार्यासप्तशती समाप्ता ॥ श्रीः ॥

Subject: Āryāsaptaśatī 1—756 ślokas.

Remarks:—The Ms. is in good condition. On the title page is

given तुळजाराजस्येदं पुस्तकम्

This work by Govardhanācārya has been published by the Nirnayasagara Press, Bombay. Govardhana belonged to the 12th century, A. D. Govardhana wrote and his brother Balabhadra along with Udayana, pupil of Govardhana helped the author to give publicity to the work after duly revising the same.

॥ आर्यासप्तशती ॥

3919. ĀRYĀSAPTAŚATĪ.

Burnell's Catalogue No. 4899. Page 165. Left column. Substance—Paper. Size—$9\frac{1}{2} \times 5\frac{1}{2}$ inches. Sheets —25. Lines—15 to a Page. Script—Devanāgarī. No. of Granthas —850. Author—Govardhanācārya. Complete.

Beginning, end, colophon and subject—Same as No. 3918.

Remarks:—The Ms. is in a good condition.

॥ आर्यासप्तशती ॥

3920. ĀRYĀSAPTAŚATĪ.

Burnell's Catalogue No. 4901. Page 165. Left column. Substance—Paper. Size—$13 \times 5\frac{1}{8}$ inches. Sheets—24. Lines—12 or 13 to a Page. Script—Devanāgarī. No. of Granthas—850. Author—Govardhanācārya. Complete.

Beginning, end, colophon and subject—Same as No. 3918.

But the stanza

हरिचरण + नाचार्यः

is found in this Ms. after the colophon.

Remarks:—The Ms. is in a fairly good condition. On the title page is given.

है पुस्तक श्रीमन्त राजेश्री शरभोजिमहाराजसाहेबांच्या कारकतीन्त काशीदेशाहून खरदीकरून आणिलें असें

After the colophon we find:

संवत् १८३८ श्रीभवानीशङ्करौ जयतः ।

So the date of the Ms. is 1771 A. D.

॥ आर्यासप्तशती ॥

3921. ĀRYĀSAPTAŚATĪ.

J. L. Collection No. 560. Substance—Paper. Size—9×4½ inches Sheets—47. Lines—10 or 11 to a Page. Script—Devanāgarī. No. of Granthas—750. Author—Govardhanācārya. Complete.

Beginning, end, colophon and subject—Same as No. 3918.

Remarks:—The Ms. is in a fairly good condition.

॥ आर्यासप्तशतीटीका ॥

3922. ĀRYĀSAPTAŚATĪṬĪKĀ.

Not noticed by Burnell. Ms. No. 13953.

Substance—Paper. Size—13×5 inches. Sheets—116. Lines—14 or 15 to a Page. Script—Devanāgarī. No. of Granthas—4000. Author—Anantapaṇḍita. Complete.

Beginning:

श्रीगणेशाय नमः ॥

श्रीरामः शरणं मम ॥

सर्वे साधुजनाः सदायतहृदा सत्सम्प्रदायादलं
यज्ज्ञानाय कणादगौतममतान्यालोच्य तत्त्वार्थदाम् ।
वेदान्तान् परिशीलयन्ति रहसि स्वानन्दकन्दाकरं
वन्दे तं जगदीश्वरं दयितया सानन्दमालिङ्गितम् ॥ १ ॥

यत्पादाम्बुजमब्जभूःप्रभृतयो देवाः सदैवान्तरे
ध्यायन्ति ग्लपयन्ति दुःखनिवहं लीलामनुष्याकृतिम् ।
फुल्लेन्दीवरमित्रनेत्रमतसीपुष्पावभासं लसत्
श्रीरामं कलयामि चेतसि चिरं चैतन्यमात्रात्मकम् ॥ २ ॥

पञ्चाशद्वर्णभेदैरपरिमिततरैरर्थजातैश्च युक्ता
नानालङ्काररम्या गणितगुणगणा साधुवृत्तैरुपेता ।
वाक्सृष्टिर्यत्प्रसादात्प्रसरति रसनोपान्तदेशे निमेषात्
नित्यं चित्तेऽनुरक्तेवसतु मम सुखं भारती सा रसाढ्या ॥ ३ ॥

विशिष्टाशिष्टेष्टकर्तव्यतापरिप्राप्तमङ्गलमनुषङ्गतो व्याख्यातृश्रोतृमङ्गलायोपनिबध्नाति ॥ पाणिग्रह इति ॥ भूतिभूषितं भस्मनालङ्कृतं भस्मनो भूषणत्वं मनोभवीयत्वेन । यत्तु भूत्या ऐश्वर्येणेति व्याख्यातं तदैशमित्यनेन गतार्थत्वात् प्रकृतानुपयुक्तत्वाच्चोपेक्ष्यम् । पाणिग्रहे अर्थात् अत्यन्तानुरक्तकामिन्याः पुलकितं जातरोमाञ्चं सात्विकभावोदयादिति भावः ॥

End:

कदाचित्कास्मिंश्चिद्वचसि यदि वार्थे मम भवेत्
भ्रमः सोऽयं सद्भिर्न खलु गणनीयो निजहृदि ।
भ्रमाभावं यस्मिन्निखिलनिगमोऽप्याह सततं
स एवैको यस्यां जयति जगदीशो रघुपतिः ॥

Colophon:

इति श्रीमद्गोदावरीपरिसरालङ्कृतपुण्यस्तम्भस्थितिविराजमान-नीलकण्ठपण्डिततनूजबालोपण्डितात्मजतिम्माजी-पण्डिताङ्गजानन्तपण्डितविरचितं गोवर्धनसप्तशतीव्यङ्ग्यार्थदीपनं समाप्तिमगमत ।

शुभमस्तु ॥ कल्याणमस्तु ॥

संवत् १८४१ वर्षे श्रीमहामाङ्गल्यप्रदे चैत्रमासे कृष्णपक्षे तृतीया भौमवासरे ॥

Subject: Āryāsaptaśatīvyākhyā 1-753 ślokas.

Remarks.—The Ms. is in good condition. On the title page is given

हे पुस्तक श्रीमन्त राजेश्री शरभोजि महाराज साहेबयांच्या कारकतीन्त काशीदेशाहून खरीदीकरून आणिलें असें ॥ ग्रन्थ ४०००

The Nirṇayasāgara Edition of the Āryāsaptaśatī of Govardhana contains the commentary of Anantapaṇḍita. The date of this Ms. is 1784 A. D.

॥ आर्यासप्तशतीटीका ॥

3923. ĀRYĀSAPTAŚATĪṬĪKĀ.

Burnell's Catalogue No. 4900. Page 165. Left column.

Substance—Paper. Size—$10\frac{1}{4} \times 4$ inches. Sheets—110. Lines —7 to a Page. Script—Devanāgarī. No. of Granthas—1400. Author—Anantapaṇḍita. Incomplete.

Beginning—Same as No. 3922.

End :

काचिज्जरठविवाहिता तदीयप्रेमराहित्यखिन्ना सखीं अन्योक्त्या वक्ति ! ऊढेति ॥ हे सर्वसहे वसुमति एवञ्चैतदीयापराधसहनेन न किञ्चित्कठिनमिति व्यज्यते ॥

* * *

एवञ्चैतज्जरठपाणिग्रहणशालिन्या चाञ्चल्यशून्यया त्वया कर्कशतदङ्गेच्छामपहाय सर्वमेतदीयापराधजातमपि सोढ्वावस्थेयमिति ध्वन्यते ॥ ९२ ॥

Colophon:

इति श्रीमद्गोदावरीपरिसरालङ्कृतपुण्यस्तम्भस्थितिविराजमाननीलकण्ठपाण्डिततनूजबालोपाण्डितात्मजतिम्माजीपण्डिताङ्गजानन्तपण्डितकृते गोवर्धनसप्तशतीव्यङ्ग्यार्थदीपने उकारव्रज्याव्याख्या समाप्तिमगात् ॥

Subject: Āryāsaptaśatīvyākhyā otherwise known as Vyaṅgyārthadīpikā.

Remarks:—The Ms. is in a fairly good condition. After the colophon is given

नेदं स्वकटाक्षविक्षेपादिचातुर्यप्रदर्शनस्थलं अतोऽतिसरलतयैवात्रावस्थितिरुचितेति काचित्काञ्चिच्छिक्षयति ऋजुनेति ॥ ऋजुना सरलेन अर्थान्मार्गेण...... ॥

॥ कलिविडम्बनम् ॥

3924. KALIVIDAMBANAM.

Burnell's Catalogue No. 5040 d. Page 157. Left column. Substance—Paper. Size—10¼ × 4¼ inches. Sheets—6 (20-25). Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—102. Author—Nīlakaṇṭhadīkṣita. Complete.

Beginning:

न भेतव्यं न बोद्धव्यं न श्राव्यं वादिनो वचः ।
झटिति प्रतिवक्तव्यं सभासु विजिगीषुभिः ॥ १ ॥
असम्भ्रमोऽविलज्जत्वमवज्ञा प्रतिवादिनि ।
हासो राज्ञस्तवश्चेति पञ्चैते जयहेतवः ॥ २ ॥

End:

काममस्तु जगत्सर्वं कालस्यास्य वशंवदम् ।
कालकालं प्रपन्नानां कालः किं नः करिष्यते ॥ १०१ ॥
कविना नीलकण्ठेन कलेरेतद्विडम्बनम् ।
रचितं विदुषां प्रीत्यै राजस्थानानुमोदनम् ॥ १०२ ॥

Colophon:

इति कलिविडम्बनं समाप्तम् ॥

Subject: Kalividambana. 1-102 ślokas.

Remarks :—The Ms. is in good condition, The other works contained herein are

1 शान्तिविलासः	sheets	1—5
2 सभारञ्जनशतकम्	,,	5—10
3 अन्यापदेशशतकम्	,,	10—20

The Kalividambana is a short poem by Nīlakaṇṭha Dīkṣita. It has been printed both in the Nirṇayasāgara Press, Bombay and the Śrī Vāṇī Vilās Press, Srirangam. The work is a good criticism of life, as seen during the current yuga.

॥ कलिविडम्बनम् ॥

3925. KALIVIḌAMBANAM.

Burnell's Catalogue No. 5038. Page 157. Left column. Substance—Paper. Size—$10\frac{1}{2} \times 3\frac{3}{4}$ inches. Sheets—10. Lines—6 to a Page. Script—Devanāgarī. No. of Granthas—102. Author—Nīlakaṇṭhadīkṣita. Complete.

Beginning, end, colophon and subject—Same as No. 3924.

Remarks:—The Ms. is in a fairly good condition.

॥ कलिविडम्बनम् ॥

3926. KALIVIḌAMBANAM.

Burnell's Catalogue No. 10278. Page 157. Left column. Substance—Palm leaf. Size—$15\frac{3}{4} \times 1\frac{1}{4}$ inches. Leaves—6 (19—24). Lines—7 to a Page. Script—Grantha. No. of Granthas—102. Author—Nīlakaṇṭhadīkṣita. Complete.

Beginning, end and subject—Same as No. 3924.

Colophon: Nil.

Remarks:—The Ms. is in a fairly good condition.

॥ कलिविडम्बनम् ॥

3927. KALIVIḌAMBANAM.

Burnell's Catalogue No. 10545 b.

Substance—Palm leaf. Size—13×1½ inches. Leaves —6 (72-77). Lines—8 to a Page. Script—Grantha. No. of Granthas—102. Author—Nīlakaṇṭhadīkṣita. Complete.

Beginning, end and subject—Same as No. 3924.

Colophon: Nil.

Remarks:—The Ms. is in a fairly good condition. After the colophon is given the following śloka.

कमलाक्षं विभुं रामं विमलाम्बरधारिणम् ।
नलिनीशकुलोत्तंसमणिनीलमहं भजे ॥

॥ कलिविडम्बनम् ॥

3928. KALIVIḌAMBANAM.

S. K. Collection No. 211. Substance—Paper. Size—9½×4 inches. Sheets—3. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—60. Author—Nīlakaṇṭhadīkṣita. Incomplete (Wants the middle).

Beginning, end, colophon and subject—Same as No. 3924.

Remarks:—The Ms. is in a decaying condition. After the colophon is given:

कागलकरशेषभट्टतनूजेन बालाख्येन लिखितम् ।

॥ काकशतकम् ॥

3929. KĀKAŚATAKAM.

Burnell's Catalogue No. 4974. Page 163. Right column.

Substance—Paper. Size—$9\frac{3}{4} \times 1\frac{1}{4}$ inches. Sheets—13. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—200. Author—? Incomplete.

Beginning:

श्रीगणेशाय नमः ॥

मङ्गलाय मुदा वन्दे पार्वतीपरमेश्वरौ ।
संसक्तौ सच्चिदानन्दौ शब्दार्थाविव नित्यशः ॥ १ ॥

पापस्यैकपुरोऽवधिः प्रतिनिधिर्दुष्कर्मणाङ्कूलकं
    ब्रह्माद्याः सरितः सतां पुनरहो वृत्तिप्ररोहासदा ।
पैशुन्यस्य निवासभूः कलियुगस्याद्यावतारो महा-
    लोभस्यापि महोदधिः द्विजखलः काकात्मजो भासते ॥ २ ॥

नान्ये सन्ति सदस्सु तेऽपि गुणिनो हंसाः शुकाः कोकिलाः
    तानेतानपहाय शाहनृपते काकात्मजं भाविशे(?) ।
किं वातेन तवोन्नतिः किमथवाकार्यं किमानन्दतः
    कवे देव्ये(?)सुखं दुराग्रह इति ख्यातिञ्च हास्यास्पदम् ॥३॥

रसालकुलमावृतं सकलमेव काकात्मजैः
    कथञ्चिदपि नीयते विरसवासरः कोकिलैः ।
द्विजैरपि तथा कथं सरसमानसा कान्तिभि-
    र्मरालकुलनायकैः कथय का स्थितिः कार्यता ॥ ४ ॥

End:

कथं वर्तामहे शम्भो तावकीनैर्जनैः सह ।
विधौ वक्रे महद्दुःखं मानमज्जशुभोदिते ॥ ९३ ॥

ग्रीष्मर्तौ तपति प्रचण्डकिरणे भानौ रसद्रोहिणिः
स्वारोच्छ्वासशते विमुञ्चति जने शुष्के सरिद्वारिणि ।
तृष्यत्पान्थकुलात्तमर्षणकृतो नित्यं गुणग्राहिणो
धन्यं जीवनमस्य मार्गसरसो धिग्वारिधीनां जनुः ॥ ९४ ॥

अत एव जगन्मान्यः कूपो भूपो न भूतले ।
प्रयच्छति गुणग्राही स्वयं पात्रानुसारतः ॥ ९५ ॥

कूजन्तु मञ्जुलममी मकरन्दभाजः
पुंस्कोकिलाः कतिपये मधुपाः पुरस्तात् ।
माकन्दमन्दपवनोऽपि दिगन्तरालं
.... ॥ ९६ ॥

Colophon: Nil.

Subject: Kākaśataka. 1-96 ślokas.

Remarks :—The Ms. is in a good condition. On the title page is given:

'काकशतकम् बाबाजीनायकपुण्डे' ग्रन्थसंख्या २००

This work is by a contemporary and probably a Court poet of king Śahaji of Tanjore. This is similar to the Mahiṣaśataka of Vāñcheśvara, a copy of which is described later on. The work is not available in print. It is inferred that the poem is intended to criticise the son of one Kākāji paṇḍita. Kākāji came down to Tanjore with Ekoji, the founder of the Mahārāṭha rule in Tanjore.

॥ भावशतकम् ॥

3930. BHĀVAŚATAKAM.

Burnell's Catalogue No. 4972. Page 164. Right column.
Substance—Paper. Size—10¼ × 4 inches. Sheets—13. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—168. Author—Nāgarāja Incomplete.

Beginning:

श्रीगणेशाय नमः ॥ श्रीशारदायै नमः ॥

शुभ्रं क्वचित्क्वचिदतीव सिततराभं
काापि प्रफुल्लनवपल्लवसन्निकाशम् ।
तप्तं क्वचित्कचन शीतलमस्तु वस्तु
कैवल्यसंसृतिपथानुगतं मुदे वः ॥ १ ॥

नागराजशतं ग्रन्थं नागराजेन तन्वता ।
अकारि गतवक्त्रश्रीर्नागराजो गिराङ्कुरः ॥ २ ॥

वसन्तकाले चकिता नताङ्गी
विज्ञाय चक्रीकृतचापदण्डम् ।
मनोभवं सौरभशोभमानै-
रपूरयत्पाणितलं प्रसूनैः ॥ ३ ॥

End:

यत्तीक्ष्णाक्षयधारदुर्धरमहाकौक्षेयकाक्षेपण-
क्षुभ्यत्क्ष्मापतिवल्लभोदरदरीनिर्भिन्नगर्भायते ।
सोऽयं दुर्जयदोर्भुजङ्गजनितप्रौढप्रतापानल-
ज्वालाजालखिलीकृतारिनगरः श्रीनागराजो जयी ॥१००॥

Colophon:

इति श्रीनागराजविरचितं भावशतकं समाप्तम् ॥

श्रीशिवात्मजशङ्कराजीपण्डितानामिदं पुस्तकम्

Subject: Bhāvaśataka. 1-100 ślokas.

Remarks:—The Ms. is in a fairly good condition. 43rd śloka is wanting in this Ms.

The work deals with the sentiment of Śṛṅgāra. The work has been printed by the Nirnayasāgara Press under the title of Śṛṅgāraśataka.

॥ भावशतकम् ॥

3931. BHĀVAŚATAKAM.

Burnell's Catalogue No. 4973. Page 164 Right column. Substance—Paper. Size—8¾ × 4½ inches. Sheets—7. Lines—11 or 12 to a Page. Script—Devanāgarī. No. of Granthas—168. Author—Nāgarāja. Incomplete (Wants end).

Beginning—Same as No. 3930.

End:

सङ्गत्य नेत्रसलिलैस्तव विप्रयोगे

हारास्थितानि हृदये हरिणायताक्ष्याः ।

मुक्ताफलान्यपि दहन्ति(हि नी)च मार्गैः

सङ्गो जडैर्गुणिनमप्यहितीकरोति ॥ ८४ ॥

Colophon: Nil.

Subject: Bhāvaśataka: 1-83 ślokas.

Remarks:—The Ms. is in a fairly good condition.

॥ भावशतकम् ॥

3932. BHĀVAŚATAKAM.

Burnell's Catalogue No. 4969. Page 164. Left column. Substance—Paper. Size—9⅞ × 4¼ inches. Sheets—16. Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—217. Author—Nāgarāja. Incomplete. (Wants end).

Beginning—Same as No. 3930.

End:

त्वं पार्थादधिकासि सम्प्रति धनुर्विद्यावतामग्रणीः
प्रीत्या मद्वचनं करोषि नियतं कुर्या विशेषादिदम् ।
चन्द्रेणैणकलाङ्किना मम मुखं गायन्ति दृष्यं ततो
हत्वैनं प्रियमानमस्य हरिणं प्रातः प्रयातोऽसि मत् ॥

प्रातर्विदेशं प्रयातरि प्रियतमे सूर्योदयमनाकाङ्क्षती मृगवधमादिशति तद्वधेन रात्रेस्तथैवावस्थानात् । त्वद्वियोगादियं परासुर्भवित्री ॥............

Subject: Bhāvaśataka. 1-80 ślokas.

Remarks:—The Ms. is in good condition.

॥ भावशतकम् ॥

3933. BHĀVAŚATAKAM.

J. L. Collection. No. 561. Substance—Paper. Size—8×4 inches. Sheets—13. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—250. Author—Nāgarāja. (6—92 ślokas only) Incomplete. Wants beginning also.

Beginning:

काचिद्वसन्तसमये गत्वा पुष्पोद्गमावलिम् ।
नामुञ्चन्निजनिश्वासवायुं वारिजलोचना ॥ ६ ॥

End:

अधरस्फुटनपरिहारः

अयि सखि तव तोषो जायते चुम्बने किं
किमु कुचपरिरम्भे किं रतौ ब्रूहि सत्यम् ।
इति निगदति नाथे दीपमालोकयन्ती
हर हर हरिणाक्षी ह्रीसमुद्रे ममज्ज ॥ ९२ ॥

Subject: Bhāvaśataka. 1-92 ślokas only.

Remarks:—The Ms. is in good condition. The Ms. abruptly begins with the 3rd śloka.

॥ भावशतकम् ॥

3934. BHĀVAŚATAKAM.

T. S. Collection No. 709. Substance—Paper. Size—10×4 inches. Sheets—9. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—250. Author—Mallinātha ?. Complete.

Beginning:

भावशतकमारभ्यते । तत्रादौ गणेशप्रार्थना क्रियते । गजाननं + पङ्कजम् । तदनन्तरं सरस्वतीप्रार्थना क्रियते । या कुन्देन्दु + जाड्यापहा । अथ गुरुप्रार्थना । अज्ञान + गुरवे नमः । तदनन्तरं हरिप्रार्थना । नारायणाय+

नमस्ते ॥ यो विप्रलम्भ + नमामि ॥ शुभ्रं क्वचित् + मुदेव ॥ नाराराज॰ etc. Same as No. 3930

End:

पतिव्रताहं प्रमदासुरूढा
लोकापवादो नितरां गरीयान् ।
उल्लङ्घ्य शान्तं व्रज धूयमाना-
मायाहि पूर्वं प्रियभावि शान्तात् ॥

Colophon:

इति श्रीमल्लिनाथकवीन्द्रविरचितं भावशतकं समाप्तम् ॥

Subject—Same as No. 3930.

Remarks:—The Ms. is in a decaying condition. The colophon says that the author is Mallinātha.

॥ भावशतकम् ॥

3935. BHĀVAŚATAKAM.

Burnell's Catalogue No. 4970. Page 164. Left column. Substance—Paper. Size—10 × 4¾ inches. Sheets—8 (3-10). Lines-11 or 12 to a Page. Script—Devanāgarī. No. of Granthas—184. Author—Nāgarāja? Incomplete. (Wants beginning and end).

Beginning:

(स्मरातुराङ्गी प्रियविप्रयोगे
शीतोपचारं परिहृत्य सर्वम् ।
सुखेप्सया सर्वगतान्निषेवे)
काचित्करानेयसुधाकरस्य ॥

यस्मादते प्राणेश्वरेण सहासङ्गतास्सन्तीति ॥ २० ॥

End—Same as No. 3934.

Subejct : Bhāvaśataka. 20-91 ślokas.

Remarks:—The Ms. is in good condition.

॥ भावशतकम् ॥

3936. BHĀVAŚATAKAM.

Burnell's Catalogue No. 4971. Page 164. Right column. Substance—Paper. Size—$9\frac{5}{8}\times 4$ inches. Sheets—17. Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—184. Author—Nāgarāja ? Incomplete.

Beginning—Same as No. 3930.

End—Same as No. 3935.

Subject: Bhāvaśataka. 1-91 ślokas.

Remarks:—The Ms. is in a fairly good condition.

॥ मयूरशतकम् ॥

3937. MAYŪRAŚATAKAM.

Burnell's Catalogue No. 4961. Page 164. Left column. Substance—Paper. Size—$9\frac{7}{8}\times 3\frac{7}{8}$ inches. Sheets—16. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—250. Author—Mayūrakavī. Complete.

Beginning:

श्रीगणेशाय नमः ॥

जम्भारातीभकुम्भोद्भवमिव दधतः सान्द्रसिन्दूररेणुं
रक्ताः सिक्ता इवौघैरुदयगिरितटे धातुधाराद्रवस्य ।
आयान्त्या तुल्यकालं कमलवनरुचेवारुणा वो विभूत्यै
भूयासुर्भासयन्तो भुवनमभिनवा भानवो भानवीयाः ॥

End:

श्लोकालोकस्य भूत्यै शतमिति रचिता श्रीमयूरेण भक्त्या
युक्तश्चैतान् पठेद्यः सकृदपि पुरुषः सर्वपापैर्विमुक्तः ।
आरोग्यं सत्कवित्वं श्रियमतुलबलं कान्तिमायुः प्रकर्षं
विद्यामैश्वर्यमर्थं वरमपि लभते स्तोत्रसूर्यप्रसादात् ।

Colophon:

इति मयूरशतकं सम्पूर्णम् ॥
श्रीकृष्णार्पणमस्तु ॥ श्रीरस्तु ॥

Subject: Mayūraśataka. 1-102 ślokas.

Remarks:—The Ms. is in good condition. Alternate sheets are sulpherated.

Tradition holds that Mayūra was the father-in-law of Bāṇa Bhaṭṭa, the author of the Kādambarī etc. The Sūryaśataka is addressed to God Sūrya.

The edition of this work in the Indo-Irnaian Series of the Columbia University, America, is a very good one.

॥ मयूरशतकम् ॥

3938. MAYŪRAŚATAKAM.

Burnell's Catalogue No. 4962. Page 164. Right column.

Substance—Paper. Size—$9\frac{1}{4} \times 4$ inches. Sheets—14. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—250. Author—Mayūrakavi. Complete.

Beginning, end, colophon and subject—Same as No. 3937.

Remarks:—The Ms is in a good condition. Alternate sheets are sulpherated. On the title page is given:

'तुलजाभूपतेरिदं पुस्तकम्'

॥ मयूरशतकम् ॥

3939. MAYŪRAŚATAKAM.

Burnell's Catalogue No. 4964. Page 164. Right column. Substance—Paper. Size—$11\frac{3}{4} \times 4\frac{7}{8}$ inches. Sheets—9. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—250. Author—Mayūrakavi. Complete.

Beginning, end and subject—Same as No. 3937.

Colophon: Nil.

Remarks:—The Ms. is in a fairly good condition.

॥ मयूरशतकम् ॥

3940. MAYŪRAŚATAKAM.

Burnell's Catalogue No. 10265. Page 164. Right column. Substance—Palm leaf. Size—$8\frac{1}{4} \times 1\frac{1}{2}$ inches. Leaves—14. Lines—4 or 5 to a Page. Script—Telugu. No. of Granthas—250. Author—Mayūrakavi. Complete.

Beginning, end, colophon and subject—Same as No. 3937.

Remarks:—The Ms. is in a fairly good condition.

॥ मयूरशतकम् ॥

3941. MAYŪRAŚATAKAM.

Burnell's Catalogue No. 10266. Page 165. Left column. Substance—Palm leaf. Size—10×1 inches. Leaves—37. Lines—3 or 4 to a Page. Script—Grantha. No. of Granthas—250. Author—Mayūrakavi. Complete.

Beginning—Same as No. 3937.

End :

चत्वारिंशत्प्रभाया स्त्रिभिरधिकमथो वाजिनां षट्कमेकं
पश्चान्नेति द्विषट्कं पुनरपि च दशस्यन्दनस्यैकयुक्तम् ।
भूयोऽष्टौ मण्डलस्य स्तुतिरपि च रवेर्विंशतिः श्रीमयूरा-
दित्थञ्जातं पठेद्यः शतकमनुदिनं सूर्यसायुज्यमेति ॥
श्लोकालोकस्य भूत्यै + सूर्यप्रसादात् ॥
ब्रह्माणं शूलपाणिं हरिममरपतिं भास्करं स्कन्दमिन्दुं
विघ्नं वह्निं धनेशं वरुणमनिलं धर्ममाल्यं फणीन्द्रम् ।
देवान्देवीसमेतान्ग्रहमुनिपितृगोपक्षिनक्षत्रयज्ञा-
स्त्रैलोक्यस्थान्समस्तान्सकलपरिवृतान्सर्वभूत्यै नमामि ॥

Colophon: Nil.

नारायणेन लिखितम् ॥

Subject: Mayūraśataka.

Remarks:—The Ms. is in a fairly good condition.

॥ मयूरशतकम् ॥

3942. MAYŪRAŚATAKAM.

Burnell's Catalogue No. 4963. Page 164. Right column.
Substance—Paper. Size—10½ × 5 inches. Sheets—13. Lines—7 or 8 to a Page. Script—Devanāgarī. No. of Granthas—147. Author—Mayūrakavi. Incomplete. Wants end.

Beginning—Same as No. 3937.

End:

नीत्वाश्वान्सप्तकक्ष्या इव नियमवशाद्वेत्रकल्पप्रतोद-
स्तूर्णं ध्वान्तस्य राशावितरजन इवोत्सारिते दूरभाजि ।
पूर्वं पृष्ठेरथस्य क्षितिभृदधिपतिं दर्शयंस्त्रायतां व-
स्त्रैलोक्यस्थानदानोद्यतादिवसपतेः प्राक्प्रतीहारपालः ॥ ५७ ॥

वज्रीज्ञातं विकासीक्षणकमलवनं भासिनो भासि वह्ने-
स्तातं नत्वा श्वपार्श्वे नय यम महिषं राक्षसादी.... ।

Subject: Mayūrasataka. 1-58 ślokas.

Remarks: —The Ms. is in a fairly good condition.

॥ मयूरशतकम् ॥

3943. MAYŪRAŚATAKAM.

Burnell's Catalogue No. 4965. Page 164. Right column.
Substance—Paper. Size—8¾ × 4 inches. Sheets—2. Lines—11 to 13 to a Page. Script—Devanāgarī. No. of Granthas—34. Author—Mayūrakavi. Incomplete. Wants end.

Beginning—same as No. 3937.

End:

बिभ्राणः शक्तिमाशु प्रशमितबलवत्तारकौर्जित्यगुर्वी
कुर्वाणो लीलयाधः शिखिनमपि लसच्चन्द्रकान्तावभासम् ।
आदध्यादन्धकारे रतिमतिशयिनी भावयन्वीक्षणानां
बालो लक्ष्मीमपारामपर इव गुहोहार्यतेरातपो वः ॥ २५ ॥
ज्योत्स्नाशा कृत्स्नपाण्डुद्युतितिमिरमषीशेष....

Subject: Mayūraśataka. 1-26 ślokas.

Remarks:—The Ms. is in a fairly good condition. This Ms. abruptly ends in the middle of the 26th śloka.

॥ मयूरशतकव्याख्यानम् ॥

3944. MAYŪRAŚATAKAVYĀKHYĀNAM.

Burnell's Catalogue No. 4966. (Errata page XII).

Substance—Paper. Size—$11\frac{1}{2} \times 5$ inches. Sheets—28. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—890. Author—?. Complete.

Beginning:

श्रीगणेशाय नमः ॥ शुभमस्तु ॥

॥ जम्भेति ॥ जम्भो नाम कश्चिदसुरः । तस्या रातिः शत्रुः, इन्द्रः । तस्य इभः ऐरावतः, तस्य कुम्भौ तयोः उद्भव आविर्भावः यस्य सः जम्भारातीभकुम्भोद्भवम् । अनेन किमभिधीयते ? सान्निध्यात्पूर्वदिगिभकुम्भोद्भवमित्यभिधीयते । सिन्दूरं नाम कश्चिद्रक्तद्रव्यविशेषः ।

सिन्दूराणां रेणुः सान्द्रश्चासौ सिन्दूररेणुश्च तं सान्द्रसिन्दूररेणुम् । "रेणुर्द्वयोः स्त्रियां धूलिः" इत्यमरः । दधता धारयन्त इव रक्ताः लोहिताः । उदयत्यस्मादस्मिन् वा उदयः । उदयश्चासौ गिरिश्च उदयगिरिः उदयपर्वतः । तस्य तय्यः(?)वप्राः । तासु धावतः गैरिकाणि तेषु धाराः तासां द्रवस्य । सिक्ता इव क्षालिता इव । अत्रापि रक्ता इव सम्पद्यते । तुल्यः समानः कालो यस्मिन् कर्मणि तत्तुल्यकालः । आयान्त्या आविर्भवन्त्या कमलानि पद्मानि तेषां वनं तस्य रुग्दीप्तिस्तया कमलवनरुचा । अरुणास्ताम्राः भुवनं लोकं भासयन्तः । एकवचनमुपलक्षणम् । भुवनानि भासयन्तीत्यर्थः । अभिनवाः प्रत्यग्राः । भानोरिमे भानवीयाः सूर्यसम्बन्धिनः । भानुशब्दस्य अ...शः भानवोरश्मयः वः युष्माकं श्रियै भूत्यै भूयासुः ॥ १ ॥

End:

किमयं तस्मात् विश्वस्याधि देवता किम्बान्धवः स्वजनः अथ वा प्रियसुहृत् इष्टमित्रम् । आहोस्विदिति पक्षपातान्तरपरिग्रहे । आचार्यः हितोपदेष्टा । रक्षणं योगक्षेमः । चक्षुर्नु नेत्रम् । नुशब्दो वितर्के । दीपो नु उत गुरुः ज्येष्ठादिः आहोस्विद् जनकः पिता एव स्वजीवितं प्राणः उत बीजं उत्पत्तिहेतुः उत बीजः अन्तः शक्तिः एवं को वेति न निर्णीयते न निश्चीयते । सूर्यः

सर्वरूपेण वर्तत इत्यभिप्रायः । सर्वदा निरन्तरम् । जगति सर्वाकारोपकारि सर्वाकारैर्देवादिरूपैरुपकरोतीति वा । ईदृग्विधः सर्वतः सर्वमभीष्टं ददातीति वदान्यचूडामणिः असौ दशशताभीशुः सहस्रकिरणः वः युष्मभ्यं अभ्यर्थितं दिशतु सर्वमिष्टमर्थं ददातु ॥

प्राचीमुखैकतिलकं पूर्वाचलशेखरैकमाणिक्यम् ।
त्रिभुवनगृहैकदीपं वन्दे लोकैकलोचनं देवम् ॥

श्लोकालोकस्य भूत्यै + स्तोत्रसूर्यप्रसादात् ॥

Colophon: Nil.

Subject: Mayūraśatakavyākhyā. 1-100 ślokas.

Remarks:—The Ms. is in a fairly good condition.

The author of this commentary is unknown and the work has not been printed so far.

॥ मयूरशतकव्याख्यानम् ॥

3945. MAYŪRAŚATAKAVYĀKHYĀNAM.

Burnell's Catalogue No. 10324. Page 164. Right column. Substance—Palm leaf. Size—$18\frac{1}{4}\times1\frac{1}{2}$ inches. Leaves—54 (15-68). Lines—5 or 6 to a Page. Script—Devanāgarī. No. of Granthas—1200. Author—? Incomplete. Wants end.

Beginning:

चराचरस्य जगतः सृष्टिस्थित्यन्तहेतवे ।
नमो विश्वप्रदीपाय सूर्यायतनुता(?)त्मने ॥

मयूरकविना प्रोक्तं...त्यशतकं मया ।
व्याख्यायते नमस्तु···गुरुभ्यस्तत्प्रसादतः ॥

पूर्वमेव कृता यस्य सद्भिर्व्याख्यानपद्धतिः ।
तस्माद(?)प्यर्थमादाय व्याख्या तस्य प्रवक्ष्यते ॥

तत्र प्रथमं तावत्कविं(वि)स्त्रिचत्वारिंशद्वृत्तैः सूर्यरश्मीनभिष्टौति । षड्भिः सप्तीन् अरुणं पुनः द्वादशभि स्यन्दनमेकादशभिः मण्डलामष्टभिः सूर्याख्यां....वतां विंशत्या । ननु च(?)सूर्यशतकमिति समाख्यानं रश्म्यादिवर्णने सति कथमुत्पद्यते । अत्राभिधीयते राजसेवकवदिति द्रष्टव्यम् । यथा आत्माभ्युदयकामी राजसेवको राज···लक्षणं सिषेविष···ह्याभ्यन्तरराजपुरुषाननुसृत्य क्रमेणाभ्यधिकं राजानमनुसराति तद्वदस्यापि भवति । विशिष्टक्रममाश्रित्य....ज्ञायते

* * *

स्तुतवानित्यदोषः ॥

॥ जम्भारातिभिरित्यादिना ॥ ....प्रयुज्यते देवराजरूपतया निर्देशः प्रशस्त इति । अन्यच्च । जम्भारातिभिः कुम्भोद्भवमिव दधतः सान्द्रसिन्दूररेणुमिति ॥

End:

अमरनगरग्रावाणः देवावासपाषाणामेरु........इति यावत् । ·· षां देवगर्भामिव गां भूमिं अह्नां वासराणां अग्रेऽग्रे आदौ विधत्ते करोति । सुमेरुपाषाणानां स्वर्णमयत्वात्तत्स्पर्शेन भूमेर्गौरवं भवतीत्युत्प्रेक्षा । एवंभूतः स ग्रहग्रा-

मणीश्चन्द्रादीनां प्रधानः आदित्यः वो युष्माकं गमनं पापं श्लथयेत् (?) विनाशयेत् ॥ ९८ ॥

Colophon: Nil.

Subject: Mayūraśatakavyākhyā. 1-98 ślokas.

Remarks:—The Ms. is in a much decaying condition. The name of the author is unknown.

॥ महिषशतकम् ॥

3946. MAHIṢAŚATAKAM.

J. L. Collection No. 562. Substance—Paper. Size—11⅓×4½ inches. Sheets—12. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—240. Author—Vāñcheśvara. Complete.

Beginning:

श्रीशिवाय नमः ॥

स्वस्त्यस्तु प्रथमं समस्तजगते शस्ता गुणस्तोमतः
सन्तो ये निवसन्ति सन्तु सुखिनस्तेऽमी शिवानुग्रहात् ।
धर्मिष्ठे पथि सञ्चरन्त्ववनिपा धर्मोपदेशादृता-
स्तेषां ये भुवि मन्त्रिणस्सुमनसस्ते सन्तु दीर्घायुषः ॥ १ ॥

ये जाता विमलेऽत्र भोसलकुले सूर्येन्दुवंशोपमे
राजानश्चिरजीविनश्च सुखिनस्ते सन्तु सन्तानिनः ।
ये तद्वंशपरम्पराक्रमवशात्सभ्याः समभ्यागता-
स्ते सन्तु प्रथमानमानविभवा राज्ञां कटाक्षोर्मिभिः ॥ २ ॥

नानाजिप्रभुशाहाजीन्द्रशरभेन्द्रानन्दरायादयो
विद्वांसः प्रभवो गताः श्रितसुधीसन्दोहजीवातवः ।

विद्यायां विषबुद्धयो हि वृषलाः सभ्यास्त्विदानीन्तनाः

किङ्कुर्वेऽम्ब कृपे व्रजामि शरणं त्वामेव विश्वावनीम् ॥ ३ ॥

End:

सुग्रीवोसि महान् गजोऽसि वपुषा नीलः प्रमाथी तथा

धूम्रश्चासि महानुभावमहिष त्वं दुर्मुखः केसरी ।

इत्थं ते सततं महाकपिशताकारस्य साहाय्यतः

सीतां प्राप्य विलङ्घ्य दुःखजलधिं नन्दाभिरामः स्वयम् ॥

श्रीमत्कोसलवंशदुग्धजलधेः सम्पूर्णचन्द्रोपमो

यः शास्ति क्षितिमक्षतिक्षितिपतिर्मूर्तः प्रतापः स्वयम् ।

दीर्घायुर्जितशत्रुरात्मजयुतो धर्मी प्रजारागवा-

नुल्लाघोऽस्तु सनिस्तुलैर्निजसभास्तारैः क्रमादागतैः ॥ १०१ ॥

राजा धर्मपरः परस्परधृतस्नेहाश्च तन्मन्त्रिणो

राजन्वत्यवनीवनीपकजना जा(?)भवन्तु क्षितौ ।

पुष्टाङ्गाः पशवश्चरन्तु भजतां दुर्भिक्षवार्ता लयं

वाञ्छानाथकवेः कृतिश्च कुरुतां निर्मत्सराणां मुदम् ॥

Colophon:

Subject: Daśakumāracaritavyākhyā otherwise known as Sañjivana.

Remarks:—The Ms. is in a fairly good condition. This is one of the many works of Ghanaśyāmapaṇḍita—the famous Tanjore poet.

The work is unpublished. Pandit V. A. Ramasvami Śāstri M. A. has contributed an informing article on Ghanaśyāma (see Part III, Vol. III of the Journal of Oriental Research, Madras).

॥ दशकुमारचरितटिप्पणम् ॥

4007. DAŚAKUMĀRACARITAṬIPPAṆAM.

J. L. Collection No. 568. Substance—Paper. Size—

$7\frac{1}{2} \times 5$ inches. Sheets—14. Lines—20 to a Page. Script—Devanāgarī. No. of Granthas—745. Author—Ghanaśyāma. Complete.

Beginning:

अथ भोजराजसभायां॰ Same as No. 4006.

End, colophon and subject—Same as No. 4006.

Remarks: —The Ms. is in good condition.

॥ वासवदत्ता ॥

4008. VĀSAVADATTĀ.

Burnell's Catalogue No. 4784. Page 163. Left column. Substance—Paper. Size—14×6 inches. Sheets—34. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—1000. Author—Subandhu. Complete.

Beginning:

करबदरसदृशमखिलं भुवनतलं यत्प्रसादतः कवयः ।
पश्यन्ति सूक्ष्ममतयः सा जयति सरस्वती देवी ॥

❀ ❀ ❀

अभूदभूतपूर्वः सर्वोर्वीपतिचक्रचूडामणिश्रेणिशाणकोण-कषणनिर्मलीकृतचरणनखमणिः

End:

ततः कन्दर्पकेतुः श्रुतवृत्तान्तः समागतेन मकरन्देन तया वासवदत्तया च समं स्वपुरं गत्वा तत्र सुखं निवसन् यथाहृदयाभिलषितानि सुखानि ताभ्यां सहानुभवन् बहुतरं कालं निनाय ॥

Colophon:

इति वासवदत्ता सम्पूर्णा ।

After the colophon is found.

कवीनामगलद्दर्पो नूनं वासवदत्तया ।
शक्त्येव पाण्डुपुत्राणां गतया कर्णगोचरम् ॥ १ ॥

रसप्रसरनिर्भराः कविगिरां प्रसाराः परं
मुदं विदधते हृदि म्रदिमभाजि काव्यामृतैः ।
सुधाकरकराङ्कुरव्यतिकरेण चन्द्रोपलाः
द्रवन्ति शिशिराश्चिरादपि न विन्ध्यवन्ध्योपलाः ॥

Subject: Vāsavadattā.

Remarks:—The Ms. is in excellent condition.

Alternate sheets are sulpherated. This work deals with the classic story of Udayana and Vāsavadattā. The work has been printed in the Śrī Vāṇī Vilas Press, Srirangam. Subandhu is regarded as older than Bhaṭṭa Bāṇa—the court poet of Harṣavardhana.

॥ वासवदत्ता ॥

4009. VĀSAVADATTĀ.

Burnell's Catalogue No. 4756. Page 162. **Left column.**

Substance—Paper. Size—9¾ × 5¼ inches. Sheets—**47.** Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—1000. Author—Subandhu. Complete.

Beginning, end, colophon and subject—Same as No. 4008.

Remarks:—The Ms. is in good condition.

The two verses found after the colophon in No. 4008

are also found here.

॥ वासवदत्ता ॥

4010. VĀSAVADATTĀ.

Burnell's Catalogue No. 10130. Page 162. Left column. Substance—Palm leaf. Size—$17\frac{1}{8} \times 1\frac{1}{8}$ inches. Leaves—46. Lines—3 to a Page. Script—Telugu. No. of Granthas—1000. Author—Subandhu. Complete.

Beginning, end, colophon and subject—Same as No. 4008.

Remarks:—The Ms. is in a fairly good condition.

॥ वासवदत्ता ॥

4011. VĀSAVADATTĀ.

Burnell's Catalogue No. 10131. Page 162. Left column. Substance—Palm leaf. Size—$15\frac{1}{4} \times 1$ inches. Leaves—47. Lines—5 to 7 to a Page. Script—Grantha. No. of Granthas—1000. Author—Subandhu. Complete.

Beginning, end, colophon and subject—Same as No. 4008.

Remarks:—The Ms. is in a fairly good condition.

॥ वासवदत्ता ॥

4012. VĀSAVADATTĀ.

Burnell's Catalogue No. 10132. Page 162. Left column. Substance—Palm leaf. Size—14×1 inches. Leaves—38. Lines—6 or 7 to a Page. Script—Devanāgarī. No.

of Granthas—1000. Author—Subandhu. Complete.

Beginning, end and subject—Same as No. 4008.

Colophon:

सुकविसुबन्धुविरचिता वासवदत्ताख्यायिका हृद्यगद्यमयी समाप्ता

After the colophon is given the following stanza:

कता कापि तरुः कोऽपि काश्यामाश्चर्यदम्पती ।

सा चापर्णा स च स्थाणुः ददाते चाक्षयं फलम् ॥

Remarks:—The Ms. is in a decaying condition.

॥ वासवदत्ता ॥

4013. VĀSAVADATTĀ.

Burnell's Catalogue No. 13133. Page 162. Left column. Substance— Palm leaf. Size—$20\frac{1}{4} \times 1\frac{3}{4}$ inches. Leaves—29 (72-100). Lines—7 to a Page. Script—Grantha. No. of Granthas—1000. Author—Subandhu. Complete.

Beginning, end and subject—Same as No. 4008.

Colophon—Same as No. 4002.

समाप्तेयं वासवदत्ता नाटिका ॥

Subject : Vāsavadattā.

Remarks:—The Ms. is in good condition.

॥ वासवदत्ता ॥

4014. VĀSAVADATTĀ.

Burnell's Catalogue No. 10137 a. Page 162. Left column. Substance—Palm leaf. Size—$16\frac{3}{4} \times 1\frac{1}{2}$ inches. Leaves—

27. Lines—8 or 9 to a Page. Script—Grantha. No. of Granthas—1000. Author—Subandhu. Complete.

Beginning, end and subject—Same as No. 4008.

Colophon:

इति सुबन्धुविरचिता वासवदत्ता समाप्ता । हरिः ॐ ॥

शुभमस्तु ॥ श्रीदत्तात्रेयस्वामिने नमः । श्रीमद्वृद्धाम्बिकायै नमः ॥

करकृतमपराधं क्षन्तुमर्हन्ति सन्तः । प्रमाथिनामसंवत्सरं कार्तिक

मास पनिरण्टां तेति मुकिञ्चतु । स्वहस्तलिखितम् ।

श्रीदक्षिणामूर्तये नमः ॥ गोपालाय नमः ॥

Remarks:—The Ms. is in a good condition.

॥ वासवदत्ता ॥

4015. VĀSAVADATTĀ.

Burnell's Catalogue No. 4738. Page 162, Left column. Substance—Paper. Size—15 × 6⅞ inches. Sheets—23. Lines—14 to a Page. Script—Devanāgarī. No. of Granthas—840. Author—Subandhu. Incomplete. (Wants end).

Beginning—Same as No. 4008.

End:

ततः कृतस्नानादि सकलकृत्यो जलनिधिजलमवतरितु-मारेभे शरीरत्यागाय । अथ सानुग्रहेषु ग्राहेषु निर्मत्सरेषु मत्स्ये(षु)... ॥

Subject: Vāsavadattā.

Remarks:—The Ms. is in a fairly good condition.

॥ वासवदत्ता ॥

4016. VĀSAVADATTĀ.

J. L. Collection No. 569. Substance—Paper. Size—12×4 inches. Sheets—31. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—900. Author—Subandhu. Incomplete. (Wants end)

Beginning—Same as No. 4008.

End:

पुरुकुत्सः कुत्सित एवासीत् । कुवलयाश्वोऽश्वतरक-
न्यामपि जहार ॥

Subject: Vāsavadattā.

Remarks:—The Ms. is in good condition.

॥ वासवदत्ताटीका ॥

4017. VĀSAVADATTĀṬĪKĀ.

Burnell's Catalogue No. 4735. Page. 162. Left column. Substance—Paper. Size—14×6 inches. Sheets—85. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—2520. Author—Jagaddhara. Complete.

Beginning:

हरौ तात वैकुण्ठताकाम्यसिद्धौ
हरे तात कामप्रणाशास्ति बुद्धिः ।
(अतस्तौ विहाय त्वदीया हि....
...ते)व हेरम्ब नोदासितव्यम् ॥
नत्वा गुरून् गुणगुरूनवलोक्य टीका
विश्वादिकोशनिवहान सुविचार्य मत्या ।

श्रीमाञ्जगद्धर इमां वितनोति टीकां
 गूढार्थबोधनिपुणां भरतादिविज्ञः ॥ २ ॥

इह खलु निष्प्रत्यूहसमीहितफलप्राप्तिमित्यर्थमर्थी कविकुलकुमुदबन्धुः सुबन्धुः वागधिदेवताकीर्तनरूपं मङ्गलमादौ निबध्नाति ।

॥ करबदरेत्यादि ॥ सा सरस्वती वागधिदेवता जयति । उत्कर्षेण वर्तते । कीदृशी देवी देवनं देवः । "दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु"। भावे घञ् । तद्योगादर्श आद्यच् । ततो गौरादि ङीष् । तेन कान्तिमतीत्यर्थः । सा का । यत्प्रसादतः यस्यानुग्रहात् । कवयः काव्यकर्तारः । अखिलं समस्तं भुवनतलं करबदरसदृशं पश्यन्ति समस्तभुवनमध्यवर्ती पदार्थजातप्रत्याकलनेन हस्तस्थितबदरीफलतुल्यं भुवनतलमवलोकयन्ति । तलशब्दोऽत्र स्वरूपवचनः । तथा चामरः । "स्वरूपाधोऽर्ध्वयोस्स्थलम्" इति । अत एव वचनरचनाचातुर्यं वागधिदेवतासकाशादर्ज्यत इति तदीयस्तुतिरुचितैवेति भावः । कीदृशाः? सूक्ष्ममतयः कुशाग्रबुद्धयः । अत्र भगवत्या एव प्रसादो हेतुः । युक्तश्चैतत् । "कवयः किं न पश्यन्ति" इति वचनादित्येकोऽर्थः ॥

द्वितीयोऽर्थस्तु—सरस्वति समुद्रे । सा ई देवी लक्ष्मीः जयति जययुक्ता भवति ॥

* * * *

तृतीयोऽर्थस्तु ॥ सा सरस्वती नदीविशेषो जयति ॥

*   *   *

चतुर्थोऽर्थस्तु ॥ सा सरस्वती वाणी जयति परविजयवती भवत्वित्यर्थः ॥

End:

स्वपुरं कुसुमपुरं पाटलिपुत्रनगरं गतः कालं निनाय समयं नीतवान् । यथाहृदयं मनोऽनुरूपं अभिलषितामिच्छा येषु तानि । अन्यथा अव्ययीभावे यथाहृदयाभिलषितमित्येकत्वे सति स्यादिति सर्वं निरवद्यमिति ॥

यदि भवति मदीये टिप्पणेऽत्र प्रमादः
क्वचिदपि स महिम्ना शोधनीयो महद्भिः ।
अमतिगमनकारी प्रायशो नात्र चित्रं
भवति हि गुरुहस्तालम्बतोऽपि प्रकारः ॥ १ ॥

लब्धो दुर्लभशासनं गुणगणग्रामाभिरालो(?) गुणै-
र्विद्यावंशविभूषिते अपि शुभे छत्रे उभे धारिते ।
येनायं समभूद्द्विजातितिलकश्चण्डेश्वरः पण्डितो
मीमांसैकरहस्यवश्यहृदयो दातावदाताशयः ॥ २ ॥

अस्मादभूज्जलनिधेरिव शुद्धधेनु-
र्वेदेश्वरो विविधतन्त्ररहस्यवेत्ता ।
तस्मादजायत विशुद्धिनिधानमूर्ती-
रामेश्वरो गुरुमतैकरहस्यवश्यः ॥ ३ ॥

कैरातीशासनं येन लब्धं जगति दुर्लभम् ।
तर्कराद्धान्तशुद्धान्तःकरणोऽयं गुणाधिकः ॥ ४ ॥

अस्मादजायत गदाधरनामधेयो
धीरो गधाधर इव प्रथितः पृथिव्याम् ।
सोऽयं थुमन्न(?)नगरे पदमाप शिष्टान्
मीमांसको विमलकीर्तिपवित्रमूर्तिः ॥ ५ ॥

विद्याधरं वरमजीजनदेकपुत्रं
मीमांसकं गुणिहितं शुचिताधिवासम् ।
सन्तर्ककर्कशरहस्यनमस्यवश्य-
बोधं निजान्वयसरोजविकासभानुम् ॥ ६ ॥

बहनधरं वरमेष सुपुत्रं
शुद्ध......भूतविशुद्धम् ।
येन जिता गुणिनो न हि येन
सर्वगुणेन वसन्ति न भूमौ ॥ ७ ॥

र(द)मयन्त्याममयं धीरो लेभे सुतमरिन्दमम् ।
यो जगद्धरनामानमनर्घ्यगुणशालिनम् ॥ ८ ॥

विद्याकुलालङ्करणे पवित्रे
छत्रे विचित्रे अपि धारिते ते ।
नैयायिकं नाम कवीश्वरेण
टीका कृता तेन जगद्धरेण ॥ ९ ॥

येनापाठि कठोरगौतममतं वैशेषिकं खण्डनं
येनाश्रावि समस्तकाव्यनिवहस्तत्पाणिनीयं मतम् ।
छन्दोऽलङ्करणञ्च येन भरतं तत्कामशास्त्रं श्रुतं
तेनानेन जगद्धरेण कविना टीका कृतेयं मुदा ॥ १० ॥

नानाकोशवती नितान्तचतुरा रम्यार्थसार्थार्थिनी

नानालङ्कृतिसंद(सुन्दरीरस)वशा शुद्धान्वया भाविनी ।

निर्दोषा कुलजाङ्गनेव गुणिनी टीका ममेयं तत-

स्तामेना(मनु)पालयन्तु कृतिनस्तेभ्यो नमः सर्वदा ॥ ११ ॥

Colophon:

इति श्रीमहामहोपाध्याय धर्माधिकरणिकश्रीजगद्धरेण विर-
चिता तत्त्वदीपिनी वासवदत्ताटीका समाप्ता ॥

Subject: Vāsvadattāṭīkā otherwise known as Tattvadīpinī.

Remarks:—The Ms. is in excellent condition. Alternate sheets are sulpherated.

The following particulars could be gathered of the author: He belonged to a family which was renowned for its scholarship. The family pedigree is given as follows. :—

Caṇḍeśvara
|
Vedeśvara
|
Rāmeśvara
|
Gadādhara
|
Vidyādhara = Damayanti
|
Jagddhara.

He had the title Mahāmahopādyāya. This commentary is not available in print.

॥ वासवदत्ताटीका ॥

4018. VĀSAVADATTĀṬĪKĀ.

Burnell's Catalogue No. 4787. Page. 162. Left column.

Substance—Paper. Size—$13\frac{7}{8} \times 6\frac{1}{2}$ inches. Sheets—95. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—2500. Author—Jagaddhara. Complete.

Beginning, end, colophon and subject—Same as No. 4017.

Remarks:—The Ms. is in good condition.

॥ वासवदत्ताव्याख्या ॥

4019. VĀSAVADATTĀVYĀKHYĀ.

J. L. Collection No. 570. Snbstance—Paper. Size—$13 \times 6\frac{1}{4}$ inches. Sheets—43. Lines—17 to a Page. Script—Devanāgarī. No. of Granthas—2700. Author—Jagaddhara. Complete.

Beginning, end, colophon and subject—Same as No. 4017.

Remarks:—The Ms. is in good condition.

॥ वासवदत्ताव्याख्या ॥

4020. VĀSAVADATTĀVYĀKHYĀ.

Burnell's Catalogue No. 10137 b. Page 162. Left column. Substance—Palm leaf. Size—$16\frac{3}{4} \times 1\frac{1}{2}$ inches, Leaves—34 (1-34). Lines—8 or 9 to a Page. Script—Grantha. No. of Granthas—1100. Author—Trivikrama. Complete.

Beginning:

करबदरसदृशमखिलं + सरस्वती देवी ॥

नत्वा महेश्वरं देवमवाङ्मनसगोचरम् ।
ओङ्कारवाच्यं जगतां सर्गस्थित्यन्तकारणम् ॥

इयं वासवदत्ताख्याख्यायिकाव्याक्रिया स्फुटम् ।
त्रिविक्रमेण क्रियते मेधाविकुलजन्मना ॥

॥ करबदरेति ॥ सरस्वती वाग्देवी नदी च जयतीति वाक्यार्थः । सूक्ष्ममतयः कवयः कुशाग्रबुद्धयः विद्वांसः । पक्षे कं जलम् । "पानीयं सलिलं कम्" इति हलायुधः । विः पक्षी शकुनिः । "खगो नगौ कामपक्षी विः" इति हलायुधः । तत्र बहुवचनं कवयः जलचरपक्षिण इत्यर्थः । सूक्ष्ममतयः अल्पबुद्धयः । भुवनतलं भूप्रदेशमखिलं भुवनतलं सकलभुवनतलमित्यर्थः । पक्षे भुवनं जलं । "जीवनं भुवनं वनम्" इति हलायुधः । तस्य तलं । अखिलम् । प्रहस्तमभ्यस्तमिति यावत् । एवम्भूतं भुवनतलं । यत्प्रसादतः यस्या अनुग्रहेण । पक्षे यस्या नद्याः स्वच्छभावतः । करबदरसदृशं हस्तस्थितबदरफलतुल्यम् । पक्षे कंजलं रवोबीजम् । उदीच्यानां बवयोरभेदः । दरः ईषदित्यर्थः । जललवस्येषत्सदृशम् । पश्यन्ति जानन्ति स्वच्छतया अल्पं जानन्तीत्यर्थः ॥

End:

अस्तं नाशं अन्तो नाशो अस्तोऽस्मीति सम्बन्धः । शापितमकरोदिति । कन्दर्पकेतुरिति । समं सह स्वपुरं पाटलीपुत्रं नाम नगरं प्रविश्याभिलषितानि ताभ्यां सहानुभवन् कालं निनायेति सम्बन्धः ॥

Colophon :

इति (त्रि)विक्रमकविविरचिता वासवदत्ताव्याख्या परिसमाप्ता ॥

Subject: Vāsavadattā Vyākhyā.

Remarks:—The Ms. is in good condition. It is not known who this Trivikrama is The work is not available in print.

The other work contained herein is the Text of the Vāsavadattā.

॥ वासवदत्ताव्याख्या ॥

4021. VĀSAVADATTĀVYĀKHYĀ.

Burnell's Catalogue No. 10134. Page 162. Left column. Substance—Palm leaf. Size—$14\frac{1}{2} \times 1\frac{1}{4}$ inches. Leaves—41 (39-79). Lines—6 to 8 to a Page. Script—Grantha. No. of Granthas 1100. Author—? Complete.

Beginning:

श्रीमत्रैपुरपादपङ्कजरजःपाण्डूकृताङ्गाकृति-
श्चक्रे गूढपदार्थमोहनभृतेः प्रीत्यै सतामादरात् ।
काव्ये वासवदत्तके विवरणं सङ्क्षेपतः श्रीमतां
लोकख्यातविनोदनैकरसिकः सौहृद्यलीलाश्रयः ॥ १ ॥

पक्षश्लेषपदस्यार्थो भवेदत्र यथान्वितः ।
वक्ष्यतीह तथारूपं क्रियते न क्वचिद्भयात् ॥ २ ॥

करबदरेत्यादि ॥ सरस्वती जयति । नदी चेति वाक्यार्थः । सरस्वत्यां प्रसिद्धम् । पक्षे कवयः कं जलं विः पक्षी बहुवचनं कवयः जलपक्षिणः । सूक्ष्ममतयः अल्पबुद्धयः । ते कवयः पक्षिणः । भुवनतलः भुवनं जलं तस्य तलं भुवनतलं अखिलप्रहस्तमभ्यस्तमिति यावत् । एवम्भूतं

भुवनतलं यत्प्रसादतः यस्याः स्वच्छप्रभावात् करवदरस-
दृशं कं जलं लवो बिन्दुः दरमीषत् सदृशं तुल्यं जललवस्य
ईषत्सदृशं पश्यन्ती मानयन्तीः स्वच्छतयाल्पजलमिव पश्य-
न्तीत्यर्थः । अथ वा कः आत्मा, रवः शब्दः, दरो भयं
ताभ्यां सदृशं पश्यन्तीत्यर्थः । अथ वा कं जलं खः
शब्दः तस्येषत् सदृशं पश्यन्तीति वा ॥

End:

रावणवधमिति रावणो राक्षसश्च तदुभयं सैन्यमेवमस्तं
जगामेति सम्बन्धः । अनन्तरं यस्याश्रमं तत्तेन मुनिना
प्रतिपन्नवृत्तान्तेन ज्ञातप्रवृत्तीनां त्वत्कृते त्वदर्थं पुत्रका....
....
वाञ्छितानि ताभ्यां सह वासवदत्ता कामकन्दाभ्यां सहा-
नुभवन्ननेकं कालं निनायेति सम्बन्धः ॥

Colophon:

इति महाकविसुबन्धुविरचिता आख्यायिका परिसमाप्ता ॥

सरस्वतीदत्तवरप्रसादश्चक्रे सुबन्धुः सुजनैकबन्धुः ।
प्रत्यक्षरश्लेषमयप्रपञ्चविन्यासवैदग्ध्यनिधिं प्रबन्धम् ॥
करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ॥

Subject: Vāsavadattā Vyākhyā, otherwise known as Vivaraṇa.

Remarks:—The Ms. is in a fairly good condition. The author of the work is unknown. The work is not available in print.

॥ वासवदत्ताव्याख्या ॥

4022. VĀSAVADATTĀVYĀKHYĀ.

Burnell's Catalogue No. 10136. Page 162. Left column.

Substance—Palm leaf. Size—15½ × 1¼ inches. Leaves—52 (45-102). Lines—6 to 8 to a Page. Script—Grantha No. of Granthas—1000. Author—?. Incomplete. (Wants beginning).

Beginning:

॥ छलो निग्रहप्रयोग इति ॥ छले निग्रहः कपट-निग्रहः तत्प्रयोगः । पक्षे छलनिग्रहस्थानानि न्यायविद्यायां प्रसिद्धानि ॥ चार्वाकेष्विति ॥ चार्वाकाः लोकायतिकाः ॥ कण्टकप्रयोग इति ॥ कण्टको दुष्टः रोमोद्गमश्च ॥

End:

॥ रावणवधमिति ॥ रावणो रवणसमूहः राक्षसश्च । तदुभयं सैन्यम् ॥ एवमस्तं जगामेति ॥....स्थाश्रमः । इत्यादि वृत्तान्तो वार्ता । त्वत्कृते त्वदर्थम् पुत्रिक या वै वराकी साधुः ஏழை समं सह स्वपुरं पाटलीपुरं गत्वा अभिलषितानि वाञ्छितानि ताभ्यां सहानुभवन् कालं निनायेति सम्बन्धः ॥

Colophon:

इति सुबन्धुविरचिता वासवदत्ता..........व्याख्या समापिता ॥

Subject: Vāsavadattāvyākhyā.

Remarks:—The Ms. is in a fairly good condition. The author of this work is not known. The work does not seem to have been published so far.

॥ वासवदत्ताव्याख्या ॥

4023. VĀSAVADATTĀVYĀKHYĀ.

Burnell's Catalogue No. 10135. Page 162. Left column. Substance—Palm leaf. Size—$17\frac{1}{2} \times 1\frac{3}{4}$ inches. Leaves—47 (47-93). Lines 4 or 5 to a Page. Script—Telugu. No. of Granthas—1000. Author—? Incomplete (Wants beginning).

Beginning, end, colophon and subject—Same as No. 4022.

Remarks:—The Ms. is in good condition.

॥ वासवदत्ताव्याख्या ॥

4024. VĀSAVADATTĀVYĀKHYĀ.

Burnell's Catalogue No. 12363. Page 157. Left column. Substance—Paper. Size—$18\frac{1}{2} \times 5$ inches. Sheets—6. Lines—9 to 29 to a Page. Script—Devanāgarī. No. of Granthas—400. Author—? Complete.

Beginning:

करबदरसदृशमखिलं भुवनतलं यत्प्रसादतः कवयः ।
पश्यन्ति सूक्ष्ममतयः सा जयति सरस्वती देवी ॥

(व्याख्या ॥)

करबदरेत्यादि ॥ सरस्वती जयति ॥ नदीवेति वाक्यार्थः । सरस्वत्यां प्रसिद्धम् ॥

End:

व्याख्या ॥

सर्षपस्नेह इव करयुगललालितोऽपि शिरसा धृतोऽपि न काटवं जहाति । वालफलरस इव.... मधुरः परि-

णामविरसस्तिक्तश्च ॥

Colophon: Nil.

Subject: Vāsavadattā Vyākhyā otherwise known as Kavisindhusudhāṃśubindu.

Remarks:—The Ms. is in good condition. The author of the work is not known.

॥ वीरनारायणचरितम् ॥

4025. VĪRANĀRĀYAṆACARITAM.

Burnell's Catalogue No. 10255. Page 102. Left column. Substance—Palm leaf. Size—$18\frac{7}{8} \times 1\frac{1}{2}$ inches. Leaves—63 (30—92. Leaves 76 and 77 missing). Lines—9 or 10 to a Page. Script—Grantha. No. of Granthas—3400. Author—Abhinava Bhaṭṭabāṇā. Complete.

Beginning:

सौभाग्यं जगतां यस्य वामे तिष्ठति सर्वदा ।
..............................निःश्रेयसे मम ॥

सहृदयदृष्टिः कुरुते काव्यन्त्वपदोष.........
....शोषात् ॥

भुजगीव वमति गरलं खलमुखवल्मीकवर्तिनी जिह्वा ।
कविवर्त्म दूषयन्ति साध्या सा भवति सन्नरेन्द्रेण ॥

* * *

हरेः सनकसनन्दनादिभिः प्रत्यग्रभाव्यमानमहिम्नश्छन्दःसन्दर्भकवेः सर्वभुवनसनाभिनाभेरनादिनिधन........

मधुकररवस्फीतेन सामगीतेन मुखरितशेषपर्यङ्कः परिसरस्य भगवतो गरुडध्वजस्य मन्दाकिनीप्रवाहमकरन्द.. .... ॥

End:

प्रतिदिनमलङ्कुर्वन्नानन्दस्य पराङ्कोटिमवाप्य सर्वोत्कर्षेण वर्तमानः साक्षाल्लक्ष्मीसमुच्चार्यमाणजयशब्दो विश्वम्भरापालमौलिमालामकरन्दसुरभितचरणारविन्दो जयति विश्वाधिकविभवो वेमभूपालः ।

Colophon:

इति गद्यकविसार्वभौमस्य वत्सकुलस्य महाकवेरभिनवभट्टबाणस्य कृतौ वीरनारायणचरिते पञ्चमोच्छ्वासः ॥

श्रीमच्छिवत्रयविनायकाय नमः ।

श्रीमच्छिवकामसुन्दरीचिदम्बरेश्वराभ्यां नमः ।

सभापतियज्वनः ग्रन्थोऽयम् ॥

After the colophon is found:

प्रतिकविभेदनाकबाणः कवितातरुगहनविहरणमयूरः ।
सहृदयलोकसुबन्धुः जयति श्रीभट्टबाणकविराजः ॥

जयति कविभट्टबाणे दधति कविमन्यभावमन्येऽपि ।
प्रद्योतयति रव...यां खद्योताख्यान(?) किं नु कीटमणेः ॥

स्वगुणालङ्कृतसुभगाफणितिरियं भट्टबाणभवदीया ।
अधरयति वधूनखमुखरितवीणानिनादमाधुर्यम् ॥

गाथास्ताथागतावोदयति वितथतां नाकिकास्तत्वाविद्भिः
यत्रासत्रासमाध्यं फणिभणितिजुषो वक्रतां प्रक्रियाश्च ।

..........साहित्यसीमा मयि भुवि भुवने वामने भट्टबाणे

दीव्यत्यस्मिन्कवीन्द्रे जहि जहि ततो(?) कद्वदावि ह्रदात्माम् ॥

श्रीगुरुभ्यो नमः । अविघ्नमस्तु ॥

श्रीमन्महाकवि....

Subject: Vīranārāyaṇacarita.

Remarks:—The Ms. is in a fairly good condition. This work otherwise known as Vemabhūpālacaritam is available in print in the Śrī Vāṇi Vilās Press. It is a biography of the patron of the author—Vīranārāyaṇa.

॥ हर्षचरितम् ॥

4026. HARṢACARITAM.

Burnell's Catalogue No. 10213. Page 163. Left column. Substance—Palm leaf. Size—18 × 1½ inches. and 19 × 1½ inches. Leaves—78. Lines—7 to 12 to a Page. Script—Grantha. No. of Granthas—3300. Author—Bhaṭṭabāṇa. Complete.

Beginning:

चतुर्मुखमुखाम्भोजवनहंसवधूर्मम ।
मानसे रमतां दीर्घं सर्वशुक्ला सरस्वती ॥

कथमाख्यायिकाकारा न ते वन्द्याः कवीश्वराः ।
.... ॥

कवीनामगलद्दर्पो नूनं वासवदत्तया ।

End:

श्वेतभानुरुपानीयत निद्रया...येति ॥

Colophon:

इति हर्षचरितेऽष्टमोच्छ्वासः

Subject: Harṣacarita. 1-8 Ucchvāsas.

Remarks:—The Ms. is in a decaying condition.

This is a biography of Bāṇa's patron by Bāṇa himself. An excellent edition of this is to be found in the Bombay Sanskrit Series. Dr. Cowell has translated the work in the Prize Publication Fund Series of the Royal Asiatic Society of Great Britain and Ireland.

॥ हर्षचरितम् ॥

4027. HARṢACARITAM.

Burnell's Catalogue No. 10214. Page 163. **Left column.**
Substance—Palm leaf. Size—15 × $1\frac{1}{8}$ inches. Leaves—128. Lines—6 or 7 to a Page. Script—Grantha. No. of Granthas—3000. Author—Bhaṭṭabāṇa. Incomplete.

Beginning:

....

प्रक्षालितसकलभूतलकलङ्का ।

मुनिभिरुपासिततीर्था

सरस्वती हरतु.......... ॥

.... ।

(त्रैलोक्यनगरारंभमूलस्तं)भायशंभवे ॥

हरकण्ठग्रहानन्दमीलिताक्षीं नमाम्युमाम् ।

कालकूटविषस्पर्शजातमूर्च्छागमामिव ॥

End:

लुप्तावलोकनानर्ककरान् बर्बरकेण हरिपक्षक्षयपरित्य-
क्तकार्मुककर्मा हि सकलदिगन्तरश्रूयमाण गुरूः ॥

Colophon: (Leaf No. 192)

इति श्रीहर्षचरिते राजप्रतिज्ञा नाम षष्ठ उच्छ्वासः ॥

Subject: Harṣacarita. 1-7 Ucchvāsas.

Remarks:—The Ms. is in a decaying condition. This Ms. abruptly ends in the middle of the 7th Ucchvāsa.

॥ चम्पुकाव्यानि ॥

CAMPU-KĀVYAS.

॥ उत्तरचम्पूः ॥

4028. UTTARACAMPŪḤ.

Burnell's Catalogue No. 4682 b. Page 161. Right column. Substance—Paper. Size—$8\frac{1}{2}\times4$ inches. Sheets—74. Lines—6 to a Page. Script—Devanāgarī. No. of Granthas—460. Author—Bhagavanta. Uttarakāṇḍa only. Complete.

Beginning:

श्रीगणेशाय नमः ॥

सम्पूज्यमानमखिलैर्मुनिभिः सदेवैः
संसेव्यमानमनुजैर्हरिराक्षसर्क्षैः ।
सीतासहायमभिषेकजलार्द्रगात्रं
पद्माभिराममनिशं प्रणमामि रामम् ॥ १ ॥

प्राप्तस्य तस्याखिलभूपतित्वं
वधे कृते नैर्ऋतपुङ्गवानाम् ।
तोषं विधातुं मुनयः समस्ता
समाययुर्दाशरथेः सकाशम् ॥ २ ॥

ततः द्वाःस्थोऽपि चतसृभ्यो दिग्भ्यः प्राप्तान् कुम्भसम्भवप्रमुखान् मुनीन् रामाय निवेदयामास । मुनिजनाभ्यागमनसञ्जातहर्षेण सादरकृतप्रणामेन रामेण कृतातिथ्याः कुशलं पृष्टाश्च ॥

राममापृच्छय कुशलं सर्वे ते मुनिपुङ्गवाः ।
प्रशशंसुर्महात्मानः प्रहृष्टा रामदर्शनात् ॥

End:

दैत्योरस्थलदारणारुणनखैर्हस्तारविन्दैः शुभै-
बिभ्राणं जलजं सुदर्शनमथो शार्ङ्गञ्च कौमोदकीम् ।
लक्ष्म्यालिङ्गितवामभागमनिशं श्रीवत्सचिह्नं सुरा
ब्रह्माद्या जयशब्दपूर्वमनमन् भद्रासनस्थं हरिम् ॥

एकोजिक्षितिपालमुख्यसचिवश्रेष्ठस्य गङ्गाधरा-
मात्यस्यात्मसमुद्भवेन भगवन्ताख्येन विख्यायते ।
प्रोक्तं रामचरित्रमार्यनरसिंहस्य प्रसादादिदं
श्रीमत्त्र्यम्बकवर्यवंशतिलकस्यास्तां चिरं श्रेयसे ॥

Colophon:

इत्युत्तरचम्पूःसमाप्ता ॥

Subject: Rāmāyaṇacampu, otherwise known as Uttara-campu.

Remarks·—The Ms. is in good condition. A paper transcript of this manuscript is available in this Library. See T. V. No. 488.

The author of this work, Bhagavanta belonged to the Royal Court of Tanjore. He was flourishing during the early Maharaṭha days.

The work deals with the story of the Uttarakāṇḍa of the Rāmāyaṇa.

The work is not available in print,

॥ उत्तरचम्पूः ॥

4029. UTTARACAMPŪḤ.

Burnell's Catalogue No. 4694. Page 161. Right column.

Substance—Paper. Size—14×5¾ inches. Sheets—22. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—460. Author—Bhaganvatarāya. Complete.

Beginning, end, colophon and subject—Same as No. 4028.

Remarks:—The Ms. is in excellent condition.

॥ कुमारसम्भवचम्पूः ॥

4030. KUMĀRASAMBHAVACAMPŪḤ.

Burnell's Catalogue No. 4711. Page 157. Right column.
Substance—Paper. Size—14×6 inches. Sheets—21. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—530. Author—Śarabhājirāja. Complete.

Beginning:

नृत्तारम्भपिनद्धपिङ्गलजटासंदंशनिष्पीडन-
स्निग्धोन्मृष्टकलङ्कचन्द्रविगलत्पीयूषधारोल्बणैः ।
चञ्चन्मस्तकनिष्पतत्सुरनदीपूरैर्जगत्पावयन्
कल्याणं विदधातु नः शुभकरः श्रीचन्द्रमौलीश्वरः ॥ १ ॥

मातर्वाग्देवि किन्ते शरभनरपते वत्सकार्यं ममास्ते
सौब्रह्मण्योद्भवार्थे रुचिरमृदुपदे चम्पुकाव्येऽभिलाषः ।
विज्ञातं हैमशैलस्फटिकमणिशिलासङ्गसम्पातजात-
स्फीताटोपाभ्रगङ्गाप्रवहणसदृशाः सन्तु ते वाग्विलासाः ॥ २ ॥

राज्ञां भोसलवंशवारिधिसुताधाम्ना यशोजन्मभू-
र्देवानाममरावतीव नगरी तञ्जापुरी विश्रुता ।
लक्ष्मीनित्यनिवासमन्दिरमहापद्माकृतिर्देवता
ब्रह्माद्यालयपूरितोत्सवसमाजोल्लासिता शोभते ॥ ३ ॥

तत्र श्रीपरमेश्वरार्चनकलाधौरन्धरीशोभितो
मालोजिक्षितिपालमौक्तिकमणेः वंशेऽभवत्पावने ।
इक्ष्वाकोरिव सन्ततौ दशरथः षड्दर्शनीसारवित्
प्रख्यातस्तुलजेन्द्रभूवलरिपुः साहित्यविद्यानिधिः ॥ ४ ॥

तत्पुत्रः शरभोजिवर्मनृपतिः साहित्यसाम्राज्यभूः
भोजो रामकथासुधामधुरितं चम्पूप्रबन्धं यथा ।
सालङ्कारचमत्क्रियारसपदं शुद्धश्च सन्दर्भतः
संग्रथ्नाति कुमारसम्भवमहाचम्पूप्रबन्धोत्तमम् ॥ ५ ॥

पद्यं हृद्यमपीह गद्यरहितं धत्ते न हृद्यास्पदं
गद्यं पद्यविवर्जितं च भजते नास्वाद्यतां मानसे ।
साहित्यं हि तयोर्द्वयोरपि सुधमाध्वीकयोर्योगवत्
सन्तोषं हृदयाम्बुजे वितनुते साहित्यविद्याविदाम् ॥ ६ ॥

अस्ति स्वस्तरुबृन्दसुन्दरतरच्छायोल्लसत्कन्धर-
क्रीडत्किन्नरमानिनीजनमनःस्वाच्छन्द्यसाक्षात्कृती ।
लोकालोककुलाचलादिकमहाशैलाग्रणीर्देवता-
रूपो नाम हिमाचलोमहिमभूभूमोत्तरस्यां दिशि ॥ ७ ॥

End :

मातर्वाणि नमस्करोमि चरणद्वन्द्वाम्बुजं तावकं
क्षन्तव्या किल बालकेन रचिता मात्रागसां सन्तन्तिः ।
यन्मेऽत्र स्खलितं मया यदपिवोत्सृष्टं त्वरागौरवात्
तत्सर्वं ममसाहसं भगवती क्षान्त्वा प्रसन्ना भव ॥ ८ ॥

Colophon :

इति श्रीभोसलकुलजलधिकौस्तुभचोलवसुन्धराधुरन्धरतुलजमहाराजकु-

मारशरभोजिमहाराजविरचिते कुमारसम्भवमहाचम्पूकाव्ये च-
तुर्थ आश्वासः ॥ शके १७३४ अङ्गिरोनामसंवत्सरमार्गशीर्षकृष्ण-
पञ्चम्यां महाराजातिश्रेन गुण्डुनाम्ना लिखितोऽयं ग्रन्थः समाप्तः॥

Subject: Kumārasambhavacampū 1-4 Āśvāsas.

Remarks :—The Ms. is in good condition. The date of the copying of the Ms. corresponds to 11th Dec. A. D. 1812. The author of the work is the Royal poet Serfojee II (1800-1832.) The Ms. under notice might have been the original itself. The work deals with the story of the Kumārasambhava or the birth of Subrahmaṇya.

This work has not been printed so far.

॥ केरलाभरणम् ॥

4031. KERALĀBARAṆAM.

Burnell's Catalogue No. 5041. Page 168. Left column.
Substance—Paper. Size—$9\frac{1}{2} \times 3\frac{7}{8}$ inches. Sheets—41. Lines —8 to a Page. Script—Devanāgarī. No. of Granthas—800. Author—Rāmacandradīkṣita. Complete.

Beginning:

उल्लोलमदकल्लोलहल्लोहालितगल्लया ।
लीलया मण्डितं चित्तं मम मोदकलोलया ॥

नलिनसहोदरनयनं कुलभूधर कुतुकसम्पदामयनम् ।
करुणालयमरुणाभं प्रणमामः शम्भुभाग्यपरिणामम् ॥

शृङ्गाररससर्वस्वं शृङ्गारितभुजान्तरम् ।
अनन्तशयनं तेजः चिरन्तनमुपास्महे ॥

यद्वक्त्राम्बुजरङ्गसीमनि परं षड्दर्शनीनर्तकी
नृत्तान्यातनुते दिशो धवलिता यत्कीर्तिविस्फूर्तिभिः ।
यद्दैनान्दिनहव्यदानविधिभिः जाताः सुरास्तुन्दिलाः
भूमावस्ति समस्तवादितिलकः श्रीरत्नखेटाध्वरी ॥

वाणी कौशिकमल्लिकोदरपुटी निर्यन्निर्यन्मधु-
स्रोतो वाचि सहोदरी विजयते वाग्वैखरी चातुरी ।
कण्ठे कालजटाकलापविलुठद्गङ्गातरङ्गाभटी-
स्निग्धा यस्य स तस्य केशवमखीपुत्रोऽजनिष्टाऽग्रजः ॥

विख्यातौ भ्रातरौ यस्य देहादिव विनिर्गतौ ।
अर्धनारीश्वरमखी राजचूडामणिमखी ॥

तस्यासंस्तनयाः पञ्च सञ्चारिण इवागमाः ।
तेषां मध्ये महातेजाः पतञ्जलिमखीश्वरः ॥

ततोऽजनि बुधोत्तंसः श्रीमान्केशवदीक्षितः ।
यद्यशःपूरकर्पूरसुरभि (यस्य कीर्तिसुधाधौतदिग्भित्ति-
र्लोकमण्टपः) ॥

आजानसिद्धयशसां सततं गुरूणां
पादारविन्दपरिचिन्तनवीततन्त्रः ।
श्रीरामचन्द्रमखिराडिति विश्रुतोऽहं
श्रीकेरलाभरणनिर्मितिसादरोऽस्मि ॥

नतान्मन्ये येषां कुकवनमहादावदहन-
प्रसर्पज्ज्वालाभिः प्रलयमुपयात्येव भुवनम् ।

निगुम्भो यद्वाचां स जयतु विरिञ्चाननपुटी
नटद्वाणीपाणिस्फुरितमणिवीणाध्वनिसखः ॥

मर्माणि कृन्तति शनैरपि हन्ति मेय(?)-
मन्यादृशं मनसि वैकृतमाददाति ।
प्रायेण दुष्कविवचःश्रवणं बुधानां
प्राचीनजन्मकृतदुष्कृतदुर्विपाकः ॥

वन्ध्ये वृक्षे फलमिव मयि न्यस्य वाचं भवानी
प्रायो हृष्टा भवसि सकलज्ञानशून्येऽद्य लोके ।
प्राज्ञो भूपो न हि न हि पुनर्नैव विद्वान् गुणज्ञः
तद्वाचं मे फणितिमनघां त्वत्पदाब्जेऽर्पयामि ॥

निन्दां कन्दलयन्तु केऽपि विबुधा मात्सर्यदुष्टग्रह-
ग्रस्ता द्वित्रिपदैकबन्धनभवन्मूर्च्छाविमूढाशयाः ।
वाग्गुम्भेष्वपि मामकेषु न हि मे हानिर्मणीनां गणा
ज्योतिःपुञ्जममी किरन्ति किमु ते हीनार्घता निन्दिताः ॥

सङ्गीतं श्रवणक्षणे सुखकरं नृत्तं तथालोकने
कामिन्या नवविभ्रमाः कुचपरीरम्भान्तसौख्यप्रदाः ।
वाचां गुम्भनसम्भ्रमस्तु सुकवेराचन्द्रतारं यशो
लोके स्थापयति प्रमार्ष्टि दुरितान्यानन्दमासिञ्चति ॥

शास्त्रेषु सत्स्वपि कलास्वपि तादृशीषु
काव्ये स्थितं मम मनः कृपयाम्बिकायाः ।
वाल्मीकितापसवरश्च पराशरस्य
भाग्यं मुनिश्च भुवनेषु कथं प्रसिद्धौ ॥

अस्मिन्नर्थेऽर्थवादो विधिरयमिति च प्रत्ययो नास्ति येषां
शब्दव्युत्पत्त्यभावादपि सकलजने तुल्यतां ये भजन्ते ।
उच्चैर्घोषेण मूढेऽप्यननुचितमतयस्तन्वते ये तु पूजां
तेषामग्रे प्रबन्धान् सरसमभिवदन् किन्नु कुर्यात्कवीन्द्रः ॥

न रसो न गुणो न चार्थपोषो
मृदुता वा न हि मामके प्रबन्धे ।
सरसीरुहनाभिकीर्तिलेशैः
सरसानां हृदये पदं दधातु ॥

कतमो देशो रम्यः कस्याचारो मनोहरो महताम् ।
इति वादिनि देवपतौ सङ्घर्षोऽभूद्वसिष्ठगाधिजयोः ॥

वसिष्ठः ॥ देव पाकशासनकोङ्कणकालिङ्गमागधकामरूप-गूर्जरकुन्तलनेपालान्विना सर्वे देशाः समीचीनाः । समीचीनाचाराश्चेति ममाभिमानः ॥

End:

म ॥ केरलीय । यथोक्तमनुष्ठीयताम् । आवामपि यथादिष्टं स्वामिने निवेदयावः ॥

म ॥ मिलिन्दकः सिद्धान्तः ॥ दृष्टसुखेषु देशेषु केरलाः समीचीनाः । इतरे देशाः सत्यशीलवत्तया परिग्राह्याः । मतप्रस्तावे च मध्वरामानुजावग्राह्यौ ॥

विश्वामित्रमुनीन्दोः सकलतपोवारिधेर्वसिष्ठस्य ।
उभयोः कलहविरामात् कल्याणं सर्वलोकस्य ॥

Colophon:

केरलाभरणं समाप्तम् ॥

श्रीसाम्बशिवार्पणमस्तु ॥ श्रीरस्तु ॥ श्रीगोपालाय नमः ॥

Subject: Keraḷābharaṇam.

Remarks:—The Ms. is in good condition. The author Rāmacandra Dīkṣita was a scion of the family of the famous Ratnakheṭaśrīnivāsa Dīkṣita. He does not seem to have been far removed from Śrīnivāsa. The latter part of the 17th century should have been the active priod of his literary career.

The work is in the form of a conversation between Vasiṣṭha and Viśvāmitra regarding the holiest and best of places in India. The author, probably a domicile in the Malabar country, regards Kerala as the best part of India.

The work is not available in print.

॥ केरलाभरणम् ॥

4032. KERALĀBHARAṆAM.

Burnell's Catalogue No. 10656 a. Page 168. Left column. Substance—Palm leaf. Size—15½ × 1½ inches. Leaves—39 (1—39). Lines 5 to 7 to apage. Script—Grantha. No. of Granthas—800. Author—Rāmacandradīkṣita Complete.

Beginning, end, colophon and subject—Same as No. 4031.

Remarks:—The Ms. is in a fairly good condition.

॥ केरलाभरणम् ॥

4033. KERALĀBHARAṆAM.

Burnell's Catalogue No. 10656 b. Page 168. Left column.

Substance—Palm leaf. Size—15½ × 1¼ inches. Leaves—48 (1-48). Lines—5 to a Page. Script—Grantha. No. of Granthas—800. Author—Rāmacandradīkṣita. Complete.

Beginning, end and subject—Same as No. 4031.

Colophon: Nil.

Remarks:—The Ms. is in a fairly good condition.

॥ केरलाभरणम् ॥

4034. KERALĀBHARAṆAM.

Burnell's Catalogue No. 10657. Page 168. Left column. Substance—Palm leaf. Size—17⅞ × 1⅓ inches. Leaves—25 (9th missing). Lines—6 to 7 to a Page. Script—Telugu. No. of Granthas—800. Author—Rāmacandradīkṣita. Complete.

Beginning, end and subject—Same as No. 4031.

Colophon:

इति श्रीरामचन्द्रदीक्षितकृतं केरलाभरणं सम्पूर्णम् ॥

Remarks:—The Ms. is in a fairly good condition.

॥ गौरीमायूरमाहात्म्यचम्पूः ॥

4035. GAURĪMĀYŪRAMĀHĀTMYACAMPŪḤ.

Burnell's Catalogue No. 10189. Page 158. Left column. Substance—Palm leaf. Size—15¾ × 1½ inches. Leaves—38. Lines—6 to 8 to a Page. Script—Grantha. No. of Granthas—925. Author—Appādīkṣita. Complete.

Beginning:

हरिः ॐ ॥

आविष्करोतु भवतां शुभमद्रिजायाः
पादारविन्दमसकृत्परमेश्वरेण ।
पाणिग्रहोत्सवविधौ स्त्रयमप्यमर्षात्
स्वस्य ग्रहञ्झटिति यद्धटयाम्बभूव ॥ १ ॥

वेगाधूतवियत्तटीपरिलुठत्पूर्णेन्दुबिम्बस्रव-
त्पीयूषाधिकशीतलीकृतभुवः स्वर्भूमिभागान्तराः ।
पादाक्रान्तिफलत्तलातलचलच्चक्षुश्श्रवश्शीर्षकाः
शम्भोस्तादृगमन्दताण्डवकलाः श्रेयांसि तन्वन्तु वः ॥

यो गण्डकण्डूं व्यपनेतुकामः
कोदण्डदण्डं पुरभेदनस्य ।
आखण्डलाद्यावसथं व्यधूनोत्
वेतण्डतुण्डं तमुपाश्रयामः ॥ ३ ॥

आदित्सुं क्षीरमम्बाकुचकलशधृतं प्राप्तवानङ्कमस्याः
सानन्दं दत्तदृष्टिर्वदनसरसिजे श्मश्रुलं तत्र चार्धम् ।
पश्यन् भूयस्तनाग्रे निहितनिजमुखोन्वेषयन्नेव चान्यं
वक्षोजं विस्मिताक्षः प्रहसितवदनः पातु बालो गुहो नः ॥४॥

भोजादिभिः कृतपदं कविभिर्महद्भिः
चम्पूक्तिसौधमधिरोढुमहं यतिष्ये ।
निःशङ्कमम्बरतलं पततः पतत्रि-
राजस्य मार्गमनुसर्तुमिवाण्डजोऽन्यः ॥ ५ ॥

आस्वादिताः कविभिरर्थरसाः समस्ताः
शब्दा रसा इति च न क्षममेव मौनम् ।
पौष्पो रसो मधुकरैरखिलो गृहीतो
ऽप्यन्यैरसौ जगति नो परिगृह्यते किम् ॥ ६ ॥

अज्ञानामग्रभूमौ स्तुतिषु बहुविधा वर्णिता वाणि यत्त्वं
कष्टाशासक्तचित्तैरहरहरमरप्रौढनिन्दोक्तिपूर्वम् ।
अस्माभिस्तस्य शान्त्यै मुनिगणविहितं शक्नुवद्भिर्न कर्तुं
प्रायश्चित्तं शिवस्य प्रथमनिगरणैस्तन्यते गद्यपद्यैः ॥ ७ ॥

यत्त्वं मया खलजनस्य पुरः पुरस्ता-
दस्तातिशङ्कमयि भारति कीर्तितासि ।
प्रायः प्रदादि (?)ममभुष्य तदेव चित्तं
शम्भोः कथाविषय एव निगद्यसे यत् ॥ ८ ॥

(गद्यम्)

अथ कदाचिदकामानामप्यवाप्तसमस्तकामानां स्वाधीनानामपि मन्त्राणां तन्त्रेणानुष्ठानं विना वैयर्थ्यमर्थतो मन्वानानां न्यायार्जितानां धनानामपि पात्रे प्रतिपादनं विना निष्प्रयोजनताञ्च निश्चिन्वानानां * नैमिशारण्ये महतामनेकेषामृषीणामभवत्समाजः ॥

End:

इति गदितमेतत्स्थानमाहात्म्यमिन्दोः
शकलकलितभूषातोषिताद्रीन्द्रजस्य

भगवत इह भुक्तेस्साधनश्चैवमुक्तेः
सकलभुवनरक्षादीक्षितस्यास्तु वःश्रीः ॥

इत्याकर्ण्य महेशस्य वैभवं सूतभाषितम् ।
गौरीमायूरमाहात्म्यं मुमुदे मुनिमण्डली ॥

इति विरचितमप्पादीक्षितेनेश्वरस्य
क्षितिधरपतिकन्यामान्यनामाङ्कस्य ।
गुणगणमणिमालालङ्कृतं गद्यपद्यैः
धरत हृदि बुधेन्द्राः साधु चम्पूप्रबन्धम् ॥

सन्तश्चमत्कृतिमिमां सरसार्थपद्य-
गद्ये चमत्कृतिमुमाकमितुर्गुणाढ्याम् ।
आलोक्य मत्सरविनाकृतबुद्धियोगाः
तुष्यन्तु मत्सरसतापरितुष्टचित्ताः ॥

Colophon:

इति गौरीमायूरमाहात्म्यचम्पूकाव्ये पञ्चमस्तरङ्गः ॥

Subject: Gaurīmāyūramāhātmyacampūkāvya. 1-5 Taraṅgas.

Remarks:—The Ms. is in good condition. A paper transcript of this Ms. is also available in this library. See T. V. No. 62.

This Kāvya deals with the mythological greatness of Māyavaram in the Tanjore Distict. The author, Appādhvarin was a native of Kiḷayūr near Māyavaram and was living at the end of 17th and beginning of the 18th centuries. There is an excellent article on Appādhvarin in the Journal of Oriental Research, Vol. III. This work is not available in print.

॥ त्रिपुरविजयचम्पूः ॥

4036. TRIPURAVIJAYACAMPŪḤ.

J. L. Collection No. 570. Substance—Paper. Size—10½ × 4 inches. Sheets—28. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—500. Author—Nṛsimhāmātya. Complete.

Beginning:

श्रीगणेशाय नमः ॥

अथ गणपतिमाद्यं भावयन्नन्तरङ्गे
रजतशशिसवर्णं चन्द्ररेखावतंसम् ।
सुरवरमुनिबृन्दैरर्चिताङ्घ्रिं नितान्तं
निरवधिकरुणानां नीरधिं नित्यमीडे ॥ १ ॥

शिवौ नमस्यामि शिवंकरौ सतां
शुभाय मह्यं महसां महानिधी ।
श्यामावदातौ शशिसूर्यपावक-
प्रकाशमानाब्जविकाशलोचनौ ॥ २ ॥

वाणीं नमामि कल्याणीं कीरवाणीं कलानिधिम् ।
वाणीविभूतये मह्यं वीणापुस्तकधारिणीम् ॥ ३ ॥

गुरून्नमस्यामि कृपापयोधीन्
समस्तकल्याणगुणामलाशयान् ।
महाकवीन् काव्यसमान् सुमेधसः
सदामधुस्यन्दिवचःपरम्परान् ॥ ४ ॥

श्रीमानेकोजिभूपः प्रथितगुणमणिः पुण्यकीर्तिर्वदान्यो
ब्रह्मण्यः सत्यसन्धः सुरपतिविभवः पालयन्भूमिमास्ते ।
कावेरीनीरपूरैरतिजितदुरितैः सर्वतः पावितां त्वां
देवस्थानैः पुराणैः कलिकलुषहरैर्यज्वभिर्व्याप्तसीमाम् ॥ ५ ॥

राजन्कोसलवंशसिन्धुशशिनः स्वात्यन्तवाक्चातुरी-
धारासारसुधारसैर्द्विजवरान् तुष्टान् सदा कुर्वतः ।
श्रीतञ्जापुरपालकक्षितिपतेर्दोर्दण्डभग्नद्विषः
तस्यामात्यवरो नृसिंह इति यः ख्यातो बुधैर्भूतले ॥ ६ ॥

श्रीजयन्ती प्रसूर्यस्य राजते रमणीमणिः ।
पिताप्यानन्दयज्वाभूद्ब्रह्मण्यो विद्वदग्रणीः ॥ ७ ॥

भारद्वाजकुलोत्पन्नः सोऽहं बालतया मुदा ।
यतिष्ये त्रैपुरं कर्तुं विजयं चम्पुरूपकम् ॥ ८ ॥

तदङ्गीकुरु देवेश मदीयं चापलं विभो ।
रत्नपुष्पोपहारार्चा पत्रार्चा ते समे यतः ॥ ९ ॥

श्रीमानभूद्भूधरचक्रवर्ती
कैलासनामा कमनीयमूर्तिः ।
कर्पूरकान्तिः कलधौतसूनुः
कलानिधिर्दीधितिकोशगेहः ॥ १० ॥

End:

ब्रह्मादयोऽपि ते शर्वं प्रणम्य परमेश्वरम् ।
तदाज्ञां शिरसा धृत्वा स्वं स्वं धाम प्रपेदिरे ॥ ३८ ॥

शिवावपि सुसन्तुष्टौ कुमारप्रसवे यथा ।
प्रापतुः परमां प्रीतिं तथैव जगदीश्वरौ ॥ ३९ ॥
वाक्यमुक्ताफलैरेभिरर्थसन्दर्भतन्तुना ।
ग्रथितं चम्पुरूपाख्यं हारमङ्गीकुरु प्रभो ॥ ४० ॥
श्रीमृत्युञ्जय देवेश घृणासागर शङ्कर ।
पाहि मां सततं देव भूयो भूयो नमो नमः ॥ २४१ ॥

Colophon:

इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभस्य श्रीमदेकक्ष्मापतिसिंहसाम्राज्यधुरन्धरस्य नृसिंहामात्यस्य कृतौ त्रिपुरविजयं नाम चम्पूः समाप्तिमगमत् ॥

Subject: Tripuravijayacampu.

Remarks:—The Ms. is in good condition. The author Nṛsihma who was attached to the Tanjore Maharatta Court as Minister lived about the end of the 17th century. The work deals with the destruction of the three demons, who were ruling in three different cities called Tripura. It was Śiva that gave them that power and it was he, that finally destroyed them. This has not been printed.

॥ त्रिपुरविजयचम्पूः ॥

4037. TRIPURAVIJAYACAMPŪḤ.

Burnell's Catalogue No. 10186. Page 158. Right column. **Substance**—Palm Leaf. Size— $20\frac{1}{8} \times 1\frac{1}{2}$ inches. **Leaves—13** (43-55, 52nd missing). Lines—8 to a Page. **Script—** Grantha. No. of Granthas—400. Author—**Atirātrayājin** Incomplete.

Beginning:

....(नारा)यणमेव शरणं शरणमिच्छन्तः धनमन्दिरं क्षीरसागरमुद्दिश्य प्रमुदिताः प्रतस्थिरे। प्रस्थिताश्च ते तर्कितोदग्रकल्याणोदर्ककलापा नेदीयसीमेव निजमनोरथपूर्तिमालोच्य भो भो सहस्राक्ष त्रिजगदध्यक्ष कमलाक्षपादपीठनिकटवास साम्राज्यपट्टाभिषिक्त कटाक्षयेदस्मानपि (?) सम्भावय। रे जम्भारिमुखनिलिम्पार्चित।

End:

जातस्पन्दनधूतबन्धनगलद्भोगान्तरालद्रुत-
भ्रश्यत्सिन्धुरकृत्तिमन्धकरिपुं हीन... ।
....दिग्वसनं क्षणं मृडकटीसूत्रं विचित्रं दधे
मौर्वीभावनखर्वविग्रहतया दर्वीकराधीश्वरः ॥

अथ तदनुगुणमेव

स्पष्टीभूतभुजङ्गलोकमभितो व्याकीर्णरत्नोत्करं
व्यावल्गज्जलजन्तुशान्तबडबावक्त्रानलाडम्बरम् ।
कल्लोलैः स्थलतः क्षणात्स्वयमुपर्युत्प्लुत्य दुग्धार्णवः
प्रायेणायतबुद्बुदाकृतिश्चरस्तूणीरभावं... ॥

ततश्च ।

उत्पाद्य नाभिकमलं कमलां.... कौस्तुभं त्यक्त्वा ।
भङ्क्त्वोपदिश्य च कर्तव्यान्युपरिसुरेभ्यश्च ॥

Colophon: (Leaf No. 50)

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीकण्ठमतनिर्वाहधूर्वहचतुरधिकशतप्रबन्धनिर्मितिलब्धकीर्तिश्रीमदप्पयदीक्षितसोदर्यश्रीमदाच्चादीक्षित-

पौत्रस्य श्रीनारायणदीक्षितात्मजस्य श्रीमदतिरात्रयाजिनः कृतिषु त्रिपुरविजयनाम्नि चम्पूकाव्ये त्रिपुरदानवमोहनं नाम द्वितीय आश्वासः ॥

Subject: Tripuravijayacampūḥ. 1-4 Āśvāsas.

Remarks:—The Ms. is in a fairly good condition. The Ms. abruptly begins in the middle of the first Āśvāsa and ends in the middle of the fourth Āśvāsa.

॥ त्रिपुरदहनचम्पूव्याख्या ॥

4038. TRIPURADAHANACAMPŪVYĀKHYĀ.

Burnell's Catalogue No. 10318.

Substance—Palm Leaf. Size—$12\frac{1}{4} \times 1\frac{1}{4}$ inches. Leaves—39 (3-41). Lines—7 to 9 to a Page. Script—Grantha. No. of Granthas—1000. Author—Nityāmṛtayatiḥ 1-3 Āśvāsas only. Incomplete

Beginning:

यमलमलं हरत्वित्यन्वयः । आकाशसदृशतनुकान्ति(?) महाभारतकर्ता वेदव्यासो नः प्रसीदत्विति वाक्यार्थः ॥

श्यामलत्वामृतकारणमघक्षालनत्वं तान्यम्बुधौ प्रसिद्धानि ॥ ५ ॥

अस्ति सः प्रसिद्धः कविलोकनतः कविजनैर्वन्दितः । कविलोकेषु प्रवण इति वा । क्षितिभृद् भूमिपतिः । यस्य क्षितिभृतः सैनिकावलोकनतः सेनानायकदर्शनात् । बहुविपदि नानाविपत्तौ सत्याम् । बहुविपद्युक्तेति क्ष्माभृद्विशेषणं वा । क्षुद्रवति क्षुद्रप्राणियुक्ते दुष्टप्राणियुक्ते । क्ष्माभृति पर्वते ।

पदानि स्थानानि पादानिति वा । दिक्षु आशासु । द्रवति धावति चतुर्दशपदानि । अरिर्यस्य सैनिकविलोकनतः बहुविपदिक्षुद्रवति क्ष्माभृति पदानि कुर्वन् दिक्षु द्रवति । कविलोकनतः स क्षितिभृदस्तीत्यन्वयः । आदिकुलकम् ॥ ६ ॥

End:

॥ बबन्धुरिति ॥ बबन्धुः स्थिरीकृतवन्तः अवधारणे बन्धुरे भद्रे स्ववर्त्मनि धर्ममार्गे । पिनाकिना हरेण । अपिशब्दः समुच्चये । नाकिनां देवानाम् । अमोदि मोदितं मोदकारिणा स...एकादशपदानि जनाः बन्धुरे स्ववर्त्मन्येव स्थितिं बबन्धुः । नाकिनां प्रमोदकारिणा पिनाकिनाप्यमोदीति द्विभङ्गोऽन्वयः ॥ ६१ ॥

Colophon:

त्रैपुरदहन...व्याख्या रचिता नित्यामृतेन सद्यतिना ।
नाम्ना स्पष्टार्थेयं तृतीयमाश्वासमासदचान्तम् ।
श्रीत्रिपुरदहन...समाप्तमिदं त्रिपुरदहनव्याख्यानम् ॥

(Leaf No. 18.)

त्रैपुरदहनव्याख्या विहिता नित्यामृतेन सद्यतिना ।
अस्याश्चीदाश्वासं प्रथमं नाम्नार्थदीपिनी तावत् ॥

Subject: Tripuradahanavyākhyā. 1-4 Āśvāsas.

Remarks:—The Ms. is in a fairly good condition. This Ms. abruptly begins in the middle of the first Āśvāsa. The commentary is otherwise called Arthadīpinī. This work is not available in print. This work has not been separately noticed by Dr. Burnell.

॥ त्रिपुरदहनचम्पूव्याख्या ॥

4039. TRIPURADAHANACAMPŪVYĀKHYĀ.

Burnell's Catalogue No. 10187. Page 158. Right column.
Substance—Palm leaf. Size—15×1 inches. Leaves—5 to 13. Lines—6 to a Page. Script—Grantha. No. of Granthas—125. Author—Nityāmṛtayatiḥ ?. Fragment only.

Beginning:

पवमानस्वरूपेण त्रियुक्तः येन ॥ ३ ॥

स्फुरतु । सरस्सु । अत्यन्तस्वच्छाव्यं(?) सरस्वती । अन्त्यं । उत्तुङ्गतमोहान्य... ।

End:

त्यक्तसुहृत् । स्थविरः । अजः कृतः स्नुषाभिर्निरूढहृत्स्थ इति विरोधः । उज्झितवान् । आशु । ....रुदन्तम् । शुचं अश्नुवानां श्वश्रूम् ॥ ४५ ॥ युगम् । अवजानानां अन्योन्यमयत्नं कुर्वाणं......निजनानदम्(?) स्वभावसिद्ध....॥

Colophon: (Leaf 10)

इति त्रिपुरदहनव्याख्याने प्रथम आश्वास:

Subject: Tripuradahanacampūvyākhyā.

Remarks:—The Ms. is in a decaying condition. This is only a fragment.

॥ नलचम्पूः ॥

4040. NALACAMPŪḤ.

Burnell's Catalogue No. 4714. Page 158. Left column.

Substance—Paper. **Size**—$9\frac{1}{2} \times 4\frac{1}{2}$ inches. **Sheets**—107. Lines—9-11 to a Page. Script—Devanāgarī. No. of Granthas—2400. Author—Trivikramabhaṭṭa. Complete.

Beginning:

श्रीगणेशाय नमः ।। श्रीसरस्वत्यै नमः ।।

श्रीमुद्गलाय नमः ।।

जयति गिरिसुतायाः कामसन्तापवाहि-
न्युरसि रसनिषेकश्चान्दनश्चन्द्रमौलिः(लेः) ।
तदनु च विजयन्ते कीर्तिभाजां कवीना-
मसकृदमृतबिन्दुस्यन्दिनो वाग्विलासाः ।। १ ।।

जयति मधुसहायः सर्वसंसारवल्ली-
जननजरठकन्दः कोऽपि कन्दर्पदेवः ।
तदनु पुनरपाङ्गोत्सङ्गसञ्चारितानां
जयति तरुणयोषिल्लोचनानां विलासः ।। २ ।।

अगाधान्तःपरिस्पन्दं विबुधानन्दमन्दिरम् ।
वन्दे रसान्तरप्रौढं स्रोतःसारस्वतं महत् ।।

प्रसन्नाः कान्तिहारिण्यो नानाश्लेषविचक्षणाः ।
भवन्ति कस्यचित्पुण्यैर्मुखे वाचो गृहे स्त्रियः ।।

End:

इति विविधवितर्कावेशविध्वस्तनिद्रः
सजडजडिममीलत्पक्ष्मचक्षुर्दधानः ।
हरचरणसरोजद्वन्द्वमादाय चित्ते
नृपतिरभयसङ्गी स त्रियामामनैषीत् ।। ४९ ।।

Colophon:

इति श्रीत्रिविक्रमभट्टविरचितायां दमयन्तीचम्पूकथायां हर-
चरणसरोजाङ्कायां सप्तमोच्छ्वासः ॥

Subject: Nalacampū. 1-7 Ucchvāsas.

Remarks:—The Ms. is in a fairly good condition.

One of the oldest of the Campu Kāvyas is the Nalacampu of Trivikramabaṭṭa, belonging to the 10th century A.D. The work itself deals with the story of Nala and Damayantī. The work has been printed in the Nirṇayasāgar Press.

॥ नलचम्पूः ॥

4041. NALACAMPŪḤ.

Burnell's Catalogue No. 4715. Page 159. Left column.
Substance—Paper. Size—9¾×4½ inches. Sheets—108. Lines—9 to 13 to a Page. Script—Devanāgarī. No. of Granthas—2400. Author—Trivikramabhaṭṭa. Complete.

Beginning, end, colophon and subject—Same as No. 4040.

Colophon in sheet No. 15 reads thus:—

इति श्रीसमविषमकवेः त्रिविक्रमभट्टविरचितायां दमयन्तीचम्पूकथायां
हरचरणसरोजाङ्कः प्रथमः ॥

(Sheet 108.)

शके १५५८ नलसंवत्सरे उत्तरायणे हेमन्ततौ माघमासे कृष्णपक्षे
दशम्यां गुरुवासरे अनूराधानक्षत्रे तद्दिने समाप्तम् ॥

श्रीरस्तु ॥ इदं पुस्तकं पुण्यस्तम्भस्थित अनन्तभिषक्तनूजस्य रामाजि-
वैद्यस्य पुस्तकम् ॥

श्रीरस्तु लेखकपाठकयोः ॥ यादृशं + न विद्यते ॥

Remarks: —The Ms. is in a fairly good condition.

This Ms. is dated 1636 A. D.

॥ नलचम्पूः ॥

4042. NALACAMPŪḤ.

Burnell's Catalogue No 4724. Page 159. Left column. Substance—Paper. Size—6¾ × 4⅛ inches. Sheets—162. Lines—9 to 10 to a Page. Script—Devanāgarī. No. of Granthas—2400. Author—Trivikrmabhaṭṭa Complete.

Beginning, end, colophon and subject—Same as No. 4040. But at the beginning the following verse is seen in addition:—

या दुग्धापि न दुग्धैव कविदोग्धृभिरन्वहम् ।
हृदि नःसन्निधत्तां सा सूक्तिधेनुः सरस्वती ॥

Remarks: —The Ms. is in a fairly good condition.

॥ नलचम्पूः ॥

4043. NALACAMPŪḤ.

Burnell's Catalogue No. 4725. Page 159. Left column. Substance—Paper. Size—8¼ × 4½ inches. Sheets—153. Lines—9 to 10 to a Page. Script—Devanāgarī. No. of Granthas—2400. Author—Trivikramabhaṭṭa. Complete.

Beginning, end, colophon and subject—Same as No. 4042.

Remarks:—The Ms. is in good condition.

॥ नलचम्पूः ॥

4044. NALACAMPŪḤ.

Burnell's Catalogue No. 4726. Page 159. Left column. Substance—Paper. Size—$8\frac{7}{8} \times 4\frac{1}{2}$ inches. Sheets—73. Lines—14 or 15 to a Page. Script—Devanāgarī. No. of Granthas—2400. Author—Trivikramabhaṭṭa. Complete.

Beginning, end, colophon and subject—Same as No. 4042.

Remarks:—The Ms. is in good condition.

॥ नलचम्पूः ॥

4045. NALACAMPŪḤ.

J. L. Collection No. 571. Substance—Paper. Size—10×8 inches. Sheets—100. Lines—11 to a Page Script—Devanāgarī. No. of Granthas—2400. Author—Trivikramabhaṭṭa Complete.

Beginning, end, colophon and subject—Same as No. 4042.

Remarks:—The Ms. is in a fairly good condition.

॥ नलचम्पूः ॥

4046. NALACAMPŪḤ.

J. L. Collection No. 572. Substance—Paper. Size—13×6 inches. Sheets—84. Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—2400. Author—Trivikramabhaṭṭa. Complete.

Beginning, end, colophon and subject—Same as No. 4042.

Remarks :—The Ms. is in good condition and alternate sheets are sulpherated.

॥ नलचम्पूः ॥

4047. NALACAMPŪḤ.

T. S. Collection No. 677. Substance—Paper. Size—10×4 inches. Sheets—106 (18–123). Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—2200. Author—Trivikramabhaṭṭa. Incomplete.

Beginning:

... नीयतां कलयन्ति कलमकेदारभाराः कावेरीतीरभूमयः ॥

End:

कुर्वन्नतिचिरमिव गोष्ठीलीलयावतस्थे ॥

Colophon: (Sheet No. 117).

इति श्रीत्रिविक्रमभट्टविरचितायां दमयन्तीकथायां षष्ठोच्छ्वासः ।

Subject : Nalacampū.

Remarks:—The Ms. is in good condition. It abruptly begins in the first Ucchvāsa and ends in the middle of the 7th.

॥ नलचम्पूः ॥

4048. NALACAMPŪḤ.

P. A. Collection No. 337. Substance—Paper. Size—10×4⅜ inches. Sheets—113. Lines—7 or 8 to a Page. Script

— Devanāgarī. No. of Granthas—1900. Author—Trivikramabhaṭṭa.

Beginning—Same as No. 4042.

End:

मृगेषु मैत्री मुदितात्महृष्टौ
कृपा ... प्राणिषु दुःखितेषु ।
येषां न ते कस्य भवन्ति वन्द्याः
कौशेयकौपीनभृतो मुनीन्द्राः ॥ २८ ॥ * *

इदमवोचत् आयुष्मन्नसदी..........

Colophon—(Sheet No. 104)

इति त्रिविक्रमभट्टविरचितायां दम०
पञ्चमोच्छ्वासः समाप्तः ।

Subject:—Nalacampū.

Remarks:—The Ms. is in a decaying condition. This Ms. abruptly ends in the middle of the sixth Ucchvāsa.

॥ नलचम्पूव्याख्या ॥

4049. NALACAMPŪVYĀKHYĀ.

Burnell's Catalogue No. 4716. Page 159. Left column. Substance—Paper. Size—10¼ × 4¾ inches. Sheets—112. Lines—10 to 12 to a Page. Script—Devanāgarī. No. of Granthas—2500. Author—Guṇavinayagaṇin. Incomplete.

Beginning:

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥

ध्यात्वा सरस्वतीं देवीं विबुधानन्ददायिनीम् ।

सुवर्णां पुष्परूपान्तामलङ्कारविराजिताम् ॥

त्र्यर्थः । सरस्वतीं देवीं वाणीं नदीश्च दे० पा० विबुधाः देवास्तेषां० । वा० विबुधाः पण्डितास्ते० न० हंसाः । दे० शोभनो वर्णः शरीरच्छविर्यस्याः सा तां । वा० शोभनाक्षरां । न० । शोभनां श्वेतरूपां । दे० पुण्यरूपमाकारो यस्याः । वा० पुण्यानि रूपाणि छन्दोग्रन्थप्रसिद्धानि यस्यां सा न०शुचिस्वरूपाम् । आर्यजनपदेषु भूमेरुपरि वहनात् । म्लेच्छजनपदेषु भूमेरन्तर्वहनात् । दे० वा० अलङ्काराः सौवर्णभूषणानि तैर्वि० वा० अलङ्काराः शब्दार्थालङ्कारास्तैर्वि० न० वा अलमत्यर्थं कस्य जलस्यारः प्राप्तिस्तेन दि० ॥ १ ॥

पादाब्जाङ्गुलिसक्तनिर्मलनखादर्शेषु लोकत्रयी-
निःशेषप्रतिबिम्बितान्तर मुदा यस्या नमन्ति प्रभोः ।
अप्राप्ता परभागसंस्तुतिभयाल्लीनेव दीना सती
तं पार्श्वं फलवर्धिकेश्वरमहं नत्वोपसर्गापहम् ॥ २ ॥

प्रौढं प्रौढयुगप्रधानपदसाम्राज्यं प्रतीतं पुरा
देवोक्त्या भुवि नागदेवभविकश्राद्धस्य साक्षात्पुरः ।
योगिन्योपचयेन मन्त्रमहिमाप्रागल्भ्यतो जिग्यिरे
श्रुत्वा श्रीजिनदत्तसूरिमनघं तीव्रप्रतापारुणम् ॥ ३ ॥

जिनकुशलं कृतकुशलं प्रारब्धविशेषशास्त्रसिद्धिकरम् ।
प्रणिधाय मनसि मानसमिव शुचि हृदयं महात्मानम् ॥ ४ ॥

* * * *

श्रीचण्डपालोऽत्र कियत्पदानां
यद्यप्यनिन्द्यां विवृतिश्चकार ।
तथापि तच्छेषपदार्थसार्थ-
प्रकाशनार्थं विवृणोमि चम्पूम् ॥ ५ ॥

* * * *

सर्वरसात्मकं सर्वसुरेश्वरं शङ्करमेव स्तुवन्नाह ॥ जयतीत्यादि ॥ चन्द्रमौलिः सुधांशुशेखरो जयति। सर्वोत्कर्षेण वर्तते ॥

End :

॥ २८ ॥ तत्र कुण्डिनपुरे एवंविधो भीमो नाम राजा समस्तरिपुपक्षाणां क्षोदे चूर्णने क्षमाः समर्थाः (ये) दक्षिणक्षोणीपाला दाक्षिणात्याः अनुकूला राजानस्तेषां मौ... .... ॥

Colophon:—Nil.

Subject : Nalacampū Vyākhyā 1—2 Ucchvāsas.

Remarks :—The Ms. is in good condition. The Ms. abruptly ends in the middle of second Ucchvāsa.

The author Guṇavinayagaṇin is evidently a Jaina writer. The commentary is available in print in the Bombay Edition.

॥ नलचम्पूव्याख्या ॥

4050. NALACAMPŪVYĀKHYĀ.

J. L. Collection No. 573. Substance—Paper. Size—12×6 inches. Sheets—119 (42, 26, 26, 25). Lines—15 to a Page. Script—Devanāgarī. No. of Granthas—6000. Author—Guṇavinayagaṇin. 1-4 Ucchvāsas.

Beginning – Same as No. 4049.

End:

तथास्माकं शेमुषी बुद्धिर्विशेषज्ञानायतत्कथातात्पर्य-परिच्छेदाय न सन्तुष्यति न सन्तुष्टा भवति ॥ पुनरपि तद्वि...... ॥

Colophon –(sheet 26)

इति श्रीवाचनाचार्य श्रीप्रमोदमाणिक्यगणिशिष्यश्रीजयसोमगणितच्छि-ष्यपण्डितश्रीगुणविनयगणिरचितायां श्रीत्रिविक्रमभट्टविरचित-दमयन्तीकथाविवृतौ तृतीय उच्छ्वासस्समाप्तः ॥

Subject: Nalacampūvyākhyā. 1-4 Ucchvāsas.

Remarks:—The Ms. is in a very good condition.

॥ नलचम्पूव्याख्या ॥

4051. NALACAMPŪVYĀKHYĀ.

J. L. Collection No 574. Substance—Paper. Size—9½ × 5 inches. Sheets—92 (2—93). Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—2500. Author—Guṇavinayagaṇin. Incomplete.

Beginning:

श्रीचण्डपालोऽत्र कियत्पदाना० Same as No. 4049.

End, colophon and subject—Same as No. 4049.

Remarks:—The Ms. is in a fairly good condition. The name of the author is mentioned on the title sheet as:

'विनयगणि विरचिता'

॥ नीलकण्ठविजयचम्पूः ॥

4052. NĪLAKAṆṬHAVIJAYACAMPŪḤ.

Burnell's Catalogue No. 4712. Page 159. Left column. **Substance**—Paper. Size—14×6 inches. Sheets—63. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—1700. Author—Nīlakṇṭhadīkṣita. Complete.

Beginning:

वन्दे वाञ्छितलाभाय कर्म किं तन्न कथ्यते ।
किं दम्पतिमितिब्रूयामुताहो दम्पती इति ॥ १ ॥

दृष्ट्वा कौस्तुभमप्सरोगणमपि प्रक्रान्तवादा मिथो
गीर्वाणाः कति वा न सन्ति भुवने भारा दिवः केवलम् ।
निष्क्रान्ते गरले द्रुते सुरगणे निश्चेष्टिते विष्टपे
मा भैष्टेति गिराविरास धुरि यो देवस्तमेव स्तुमः ॥

लीढालीढपुराणसूक्तिशकलावष्टम्भसम्भावना-
पर्यस्तश्रुतिसेतुभिः कतिपयैः नीते कलौ सान्द्रताम् ।
श्रीकण्ठोऽवततार यस्य वपुषा कल्क्यात्मनेवाच्युतः
श्रीमानप्पयदीक्षितः स जयति श्रीकण्ठविद्यागुरुः ॥

* *

अष्टत्रिंशदुपस्कृतसप्तशताधिकचतुःसहस्रेषु ।
कलिवर्षेषु गतेषु ग्रथितः किल नीलकण्ठविजयोऽयम् ॥

End:

अर्चन्तस्तरुणेन्दुचूडमसकृत्सङ्कीर्तयन्तो हरिं
ध्यायन्तस्त्रिजगद्विमोहजननीं शक्तिं परां शाम्भवीम् ।

आज्ञां मूर्धनि बिभ्रतः सुरगुरोरानन्दयन्तो मुनीन्
स्वच्छन्दा त्रिदिवौकसो बुभुजिरे स्वाराज्यमव्याहतम् ॥

वाचं व्याकुरुते चिरन्तनगिरं मीमांसते चोभयीं
पान्थः काव्यपथेषु पादकमले सक्तः पुरारेरिति ।
मामेतत्कथयिष्यतीति रचितं काव्यं मया तत्पुन-
स्तावद्वक्ष्यति वा न वा तदुपरिन्यस्तः समस्तो भरः ॥

Colophon:

इति श्रीमत्भरद्वाजकुलजलधिकौस्तुभश्रीकण्ठमतप्रतिष्ठापनाचार्यचतुरधिकशतप्रबन्धनिर्वाहकश्रीमन्महाव्रतयाजिश्रीमदप्पय्यदीक्षितसोदर्यश्रीमदाचादीक्षितपौत्रेण नारायणदीक्षितात्मजेन भूमिदेवीगर्भसम्भवेन नीलकण्ठदीक्षितेन विरचिते नीलकण्ठविजयचम्पूनाम्नि चम्पूकाव्ये पञ्चमाश्वासः ॥ समाप्तञ्चेदमय्यादीक्षित विरचितं चम्पूकाव्यम् ।

Subject: Nīlakaṇṭhavijayacampū. 1-5 Āśvāsas.

Remarks:—The Ms. is in excellent condition. Alternate sheets are sulpherated. This work has been printed by the Sri Bālamonorama Press, Madras.

॥ नीलकण्ठविजयचम्पूः ॥

4053. NĪLAKAṆṬHAVIJAYACAMPŪḤ.

Burnell's Catalogue No. 4713 Page 159. Left column. Substance—Paper. Size—9⅞ × 4¼ inches. Sheets—34. Lines—10 to 19 to a Page. Script—Devanāgarī. No. of Granthas—1800. Author—Nīlakaṇṭhadīkṣita. Complete.

Beginning, end, colophon and subject—Same as No. 4052.

Remarks:—The Ms. is in a fairly good condition. After the colophon the following is given:

अंसालम्बितवामकुण्डलधरं मन्दोन्नतभ्रूलतं
किञ्चित्कुञ्चितकोमलाधरपुटं साचिप्रसारेक्षणम् ।
आलोलाङ्गुलिपल्लवैर्मुरलिकामापूरयन्तं मुदा
मूले कल्पतरोस्त्रिभङ्गललितं ध्यायेज्जगन्मोहनम् ॥

नौरेषा शिथिलीकृता शिखरिभिः सञ्चाल्यते चोर्मिभिः
तद्विश्राम्यतु बाडवाग्निबहुलज्वालाभिराराद्वृता ।
न स्थातुं न च सम्प्रयातुमथ वा शक्तोऽहमस्मि प्रभो
भो भो मारुत पालय क्षपय वा नान्यागतिस्त्वां विना ॥

त्वमेवात्मन् विश्वाधिक इति जगत्खेऽय इति च
स्फुटं ब्रूते वेदः तदपि विवदन्ते बत खलाः ।
किमेषां त्वद्द्रोहव्यसननिहितं जीवनमिदं
यदुक्तिः श्रोतॄणां मरणमुदितं निष्कृतिरिति ॥ १ ॥

श्रीत्रिपुराम्बायै नमः ॥ जगज्जनन्यै नमः ॥ दक्षिणामूर्तिगुरवे नमः ॥

श्रीवेङ्कटेशार्पणमस्तु ॥

व्ययाब्दे ग्रीष्मर्तौ आषाढमासे कृष्णपक्षे द्वादश्यां गुरुवासरे एष ग्रन्थः समाप्तः ॥

यादृशं + न विद्यते ॥

महतस्तेजसो वीजं बालोऽयं प्रतिभाति मे ।
स्फुलिङ्गावस्थया वह्निरेधोपेक्ष इव स्थितः ॥

॥ नीलकण्ठविजयचम्पूः ॥

4054. NĪLAKAṆṬHAVIJAYACAMPŪḤ.

J. L. Collection No. 575. Substance—Paper. Size—10×5 inches. Sheets—55. Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—1700. Author—Nīlakaṇṭhadīkṣita. Complete.

Beginning, end, colophon and subject—Same as No. 4052.

Remarks :—The Ms. is old and injured.

॥ नीलकण्ठविजयचम्पूः ॥

4055. NĪLAKAṆṬHAVIJAYACAMPŪḤ.

J. L. Collection No. 576. Substance—Paper. Size—14×5½ inches. Sheets—50. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—1700. Author—Nīlakaṇṭhadīkṣita. Complete.

Beginning, end, colophon and subject—Same as No. 4052.

Remarks :—The Ms. is in good condition. On the last page is given :—

'वृकोपनामकमन्यम्भट्टस्येदम्'

॥ नीलकण्ठविजयचम्पूः ॥

4056. NĪLAKAṆṬHAVIJAYACAMPŪḤ.

S. K. Collection No. 213. Substance—Paper. Size—10½×4 inches. Sheets—71. Lines—8 to a Page. Script—Deva-

nāgarī. No. of Granthas—1500. Author—Nīlakaṇṭha Dīkṣita. Incomplete. (Wants end).

Beginning—Same as No. 4052.

End:

पद्महस्तायाश्च तस्याः पाणिकमलो + कङ्कणमुखानि ...... ॥

Subject: Nīlakaṇṭhavijayacampū

Remarks:—The Ms. is in a decaying condition.

॥ नीलकण्ठविजयचम्पूः ॥

4057. NĪLAKAṆṬHAVIJAYACAMPŪḤ.

T. S. Collection No. 692. Substance—Paper. Size—10 × 4⅝ inches. Sheets—28(21-50) Lines—14 to a Page. Script—Devanāgarī. No. of Granthas—400. Author—Nīlakaṇṭha Dīkṣita. Incomplete.

Beginning:

बभाषे ।

जय जय जगदम्ब जाम्बूनदाम्भोजकोशप्रभे

जय जय कमलाक्षवक्षःस्थलीहर्म्यनर्मप्रिये ।

जय जय करुणाकटाक्षप्रतीक्षत्रिलोकेश्वरे

जय जय जनिमार्गलग्नाणुवर्गापवर्गप्रदे ॥

End:

भो भो महेन्द्रप्रमुखा देवा मशकानिवैतानुत्सार्य दानवान्......... ॥

Colophon: (Sheet 49).

श्रीमद्भारद्वाजकुलप्रसूतेन नीलकण्ठदीक्षितेन विरचिते चम्पूकाव्ये चतुर्थोच्छ्वासः ।

Subject: Nīlakaṇṭhavijayacampū.

Remarks:—The Ms. is in a fairly good condition.

॥ नीलकण्ठविजयचम्पूः ॥

4058. NĪLAKAṆṬHAVIJAYACAMPŪḤ.

J. L. Collection No. 577. Substance—Paper. Size—11 × 3¾ inches. Sheets—22. Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—300. Author—Nīlakaṇṭhadīkṣita. Incomplete (1st Ucchvāsa only. Wants end)

Beginning—Same as No. 4052.

End:

चकितपलायितस्खलितमूर्च्छितनिष्पतितक्षतविबुधानुधावननिषेधिमहारथिकं विजहि जहीहि पाहि निग्रहाण हर......... ॥

Subject: Nīlakaṇṭhavijayacampū 1st Ucchvāsa only.

Remarks:—The Ms. is in a fairly good condition.

॥ नीलकण्ठविजयचम्पूव्याख्या ॥

4059. NĪLAKAṆṬHAVIJAYACAMPŪVYĀKHYĀ.

J. L. Collection No. 578. Substance—Paper. Size—9½ × 4¼ inches. Sheets—12 (1-12). Lines—9 to 12 to a Page. Script—Devanāgarī. No. of Granthas—240. Author—Ghanaśyāma. Incomplete.

Beginning:

अस्तु श्रेयसि वस्तु यन्मम कुलस्वामीति शम्भोर्गृहं
प्राप्तस्तत्र करस्थ चक्रज(ल)जं पश्यामि पायाः पतिम् ।

भ्रान्तोऽसावहमित्यसी(ती) वक्तुनु(तु)कादह्माय त्विए(ण्णो)र्गृहा-
नाप्तस्तत्र करस्थ डामरुमृगं पस्या(श्या)म्युमायाः पतिम् ॥

किञ्च ॥

दृढमुकुलकुचाम्बिका पुरा त्वं
तदनु जगत्त्वदभूदशेषमेतत् ।
मृदुमुकुलकुचाम्बिकाधुना त-
द्भुवननिपीतपयोधराम्ब भासि ॥ २ ॥

अपि च ॥

ना(मा) यूरप्रभुरर्पयत्वतितराम...र्चितो
श्रीमानावतिशायिनौ वितरतु श्रीमातृभूतेश्वरः ।
वीरानाजित........मे वीराट्टहासो महा-
नानन्दं भुवि मे ददातु भगवानानन्दवल्लीपतिः ॥ ३ ॥

......लाशम्भुरंवा सम्मेलनं तयोः ।
इति जातचितेम मम चारातयेन...मावाय(?) ॥ ४ ॥

सुन्दरीकमलानामदाराः स पुरुषोत्तमः ।
पीताम्बरो घनश्यामः.................ते ॥ ५ ॥

आत्मा यः शिवयोश्चिदम्बरमहायोगीन्द्रशाकम्भरि-
भ्राता श्री..................काशीमहादेवजः ।
मन्त्री चोलमहीपतेः सुगरिमा तुक्कोजिराजो......
..........स घनश्यामः कवीनां कविः ॥ ६ ॥

मन्तुं हे भगवन् क्षमस्व..........रूपं भवा...
त्तानीते भगवानयैष(?) भवतो जानाति चैवं सति ।

....तु याति कृतिनोप्यच्छैतिमस्तद्यश-
स्त्यकूपान्तरशम्भुदूषणचणेकेषा...... ॥ ७ ॥

मद्ग्रन्थाब्धिपरम्पराङ्गिजयवाग्देवीह शैवोस्म्यहं
गौरीकिङ्करया...यमुचा किन्दानवासक्तया ।
ब्राह्मण्यं रमयामपि(?) प्रकटित .....ब्राह्मणे
श्रीरित्यागमवागतः किल भुवि श्वश्रूष्वरक्ताः स्नुषाः ॥ ८ ॥

नाथं नन्दनमात्मनः श्वशुरयोः सेवामृषीणां मुहु-
र्नानासंशयभेदनश्च जहती मातर्गिरां देवते ।
नैवम्पूर्वमधिष्ठिता दशकृतित्वङ्कालिदासं मुदा
षण्मय्येव जयस्यतो मम घनश्यामस्य धन्यं जनुः ॥ ९ ॥

* * *

वेधोदुष्करविद्धसालवचनं व्याख्यापितुर्मे दश
ग्रन्थीकल्पककालिदासकृतिगीर्व्याख्या अपि क्षोटिकाः ।
द्विग्रन्थीकरनीलकण्ठवचसां टीका तु कीदृक्तथा-
प्यस्योच्चैः शिवभक्तिरेव करणं यन्मे दयार्द्रं मनः ॥ २४ ॥

* * *

श्रीनीलकण्ठविजयचम्पोरेषा विरच्यते ।
अनुक्रमणिका यस्या ज्ञातायां ज्ञायते कथा ॥ २८ ॥

आदौ नान्दी प्रतिज्ञा च वर्ण्यतेऽथामरावती ।
इन्द्रः कृतेशपूजस्य तस्य यात्रोत्सवो बलैः ॥ २९ ॥

* * *

सङ्ग्रहेण मया सूक्तामनुक्रमणिकामिमाम् ।
व्युत्पन्नैरात्मनि न्यस्तं प्रबन्धः परिशील्यताम् ॥ ६७ ॥

अथ नीलकण्ठो नाम कविश्चिकीर्षितस्य निबन्धनस्य निरन्तरायपरिपूर्तये भगवन्तमर्धनारीश्वरमुद्दिश्य शिष्टसमुदाचारसम्मतं मङ्गलं चमत्करोति—वन्द इति ॥ वाञ्छितयोरिच्छाफलीभूतभुक्तिमुक्त्योः "अपि नारायणादीनां भुक्तिमुक्तीमहेश्वरात्" इति कैवल्यरहस्ये। लाभाय वन्दे। कर्म किमित्यात्मन्येव प्रश्नः ॥ कर्मद्वितीयेत्यगस्त्यः। तत्र स्वत एवोत्तरमाह 'तदिति' तत्कर्म। न तत्कथ्यते वक्तुं न शक्यत इत्यर्थः ॥

End:

॥ अनर्भीति ॥ अनभिसन्धिपूर्वफलमिति यावत्। परमेश्वरप्रीतिरिति भावः ॥ ''उद्देशोऽभिसन्धिः'' इति जयः (?) वन्ध्याफलः यत् यस्मात्कारणात्। * *

पौलोम्याः शच्याः दर्पं द्वयोरित्यमरः ॥

Subject: Nīlakaṇṭhavijayacampūvyākhyā.

Remarks:—The Ms. is in a fairly good condition. Ghanaśyāma's commentary has not yet been published by anybody so far.

॥ नीलकण्ठविजयचम्पूव्याख्या ॥

4060. NĪLAKAṆṬHAVIJAYACAMPŪVYĀKHYĀ.

J. L. Collection No. 579. Substance—Paper. Size—$9\frac{1}{2} \times 4\frac{1}{4}$ inches. Sheets—90 (40-60, 79, 103-167+3). Lines—9 to 12 to a Page. Script—Devanāgarī. No. of Granthas—1750. Author—Veṅkaṭeśa. Incomplete.

Beginning:

तिरोदधे । गुरुराख्यायिकया इन्द्रं प्रतिबोधयित्वान्त-
र्दधे स्वयमपि तिरोऽभूदित्यर्थः । * * वैरिविजय-
जनितहर्षेण उच्छृङ्खलो हासः अट्टहासध्वनिरिति भावः ॥
४५ ॥ चकितेति ॥

End:

.........अक्रीत...........

.......तेवदासास्ताय स एव......

......र्वत इति भावः ॥

Colophon: (Sheet No. 138)

मुत्तम्मागर्भजातेन..............मा ।
वेदवेदाङ्गविदुषा वेङ्कटेशाविपश्चिता ॥
नीलकण्ठाख्यविजयव्याख्या विरचिता मया ।
तनोतु विदुषां मोदं सुहृदां हृदयङ्गमम् ॥

Subject: Nīlakaṇṭhavijayacampūvyākhyā.

Remarks:—The Ms. is in a decaying condition. This commentary too has not been published.

॥ नीलकण्ठविजयचम्पूव्याख्या पताका ॥

4061. NĪLAKAṆṬHAVIJAYACAMPŪ-VYĀKHYĀ PATĀKĀ.

J. L. Collection No. 580. Substance—Paper. Size—$14\frac{3}{4} \times 5\frac{1}{2}$ inches. Sheets—30. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—700. Author—? Incomplete.

Beginning:

श्रीगणेशाय नमः ॥ श्रीशिवाय नमः ॥

व्याख्यातुं पदमेककं तदनलं ध्यात्वा सहस्रं समा
मूढोऽहन्तव नीलकण्ठविजयं त्वत्पादपद्मस्मृतिः ।
वाग्देवीवदनारविन्दसुषमासौगन्ध्यसम्पादिनी
व्याख्याति प्रवहत्प्रबन्धरचनाचातुर्यपारम्परी ॥ १ ॥

नीलकण्ठविजयस्य पताका-
मिच्छतो मम तु सैव विधत्ताम् ।
ख्यातिमत्र भुवने खलु नित्यं
सार्वभौमसदृशीव पताका ॥ २ ॥

नीलकण्ठपदपद्मनिस्सृतै-
रर्थजातमकरन्दनिर्झरैः ।
तत्पदं सरसिजं ह्यभिषेक्तुं
प्रश्रयेण यतते मम चित्तम् ॥ ३ ॥

नीलकण्ठपददत्ततदर्थै-
रेव पुष्पनिकरैरभिराद्धम् ।
तत्पदं त्रिकरणैः पदपद्मं
प्रत्ययेन यतते मम चित्तम् ॥ ४ ॥

प्रसन्नवदनाब्जा सा वाणी वसतु मन्मुखे ।
यस्याः कटाक्षमात्रेण मान्यः कविकुलप्रभुः ॥ ५ ॥

महागणपतये नमः ॥

वन्दे वाञ्छितलाभाय कर्म किं तन्न कथ्यते ।
किं दम्पतिमिति ब्रूयामुताहो दम्पती इति ॥ १ ॥

उपेयसिद्ध्यर्थमुपाये प्रवृत्तिरिति न्यायेन वाञ्छितार्थलाभाय वन्दे इत्युक्तम्। वदिधातोः सकर्मकत्वात् कर्म किमित्याकाङ्क्षायां तत्कर्म न कथ्यते। किं दम्पतिमिति ब्रूयामिति दम्पतिशब्दस्य "दम्पती जम्पती जायापती भार्यापती च तौ" इति कोशानुशासरात् जायाशब्दस्य दम्भावो जम्भावश्च निपात्यत इति निपातनाचैकवचनेऽसाधुरिति दम्पतिमिति न प्रयोगार्हः। द्वीपज (द्विवच)नस्य साधुत्वेऽपि वस्तुत एकत्वाद्विवचनमप्यसाधुरिति(?) एकवचनस्य ननु(?) शिष्टत्वात् शब्ददोषः। द्विवचनस्य वस्तुद्वयाभावादिति न प्रयोगार्हमिति यत्कर्म न कथ्यते। "परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च" इति श्रुतिवलात्। "शक्तिशक्तिमतोरैक्यं यः पश्यति स पश्यति।" इति वचनाच्च। तस्मादवाङ्मनसगोचरम् दम्पतिशब्दैकवचनद्विवचनाभ्यां किमप्यनिर्वाच्यं तदहं वन्द इति ॥

'अनन्तविधवर्णानामाद्यं वै स्वरभूषितम्।
बीजं ब्रह्मपराशक्त्योर्हृदयं परिकीर्तितम्॥'

इति बीजोपास्यदेवतावन्दनविषय इति। "गुरूपदेशतो ज्ञेयं नान्यथा शास्त्रकोटिभिः" इति वचनात् गुरुकृपाकटाक्षैकलभ्यमिति तत्कर्म न कथनीयमिति। मिलितकदलीफलवत् तद्वस्तु ज्ञेयम्। 'आशीर्नमस्क्रियारूपं वस्तुसङ्कीर्तनं तथा' इति त्रिविधं मङ्गलम्। अत्र नमस्क्रियारूपं मङ्गलम्। अस्मिन्श्लोके वमित्याद्य(द्या)क्षर-

स्यामृतबीजस्य प्रयोगात् अस्मिन्कविविरचितप्रबन्धे अमृतप्राप्तिरिष्यत इति ध्वनितम्। "वदि अभिवादनस्तुत्योः"। 'इदितो नुम्धातोः' इतीदित्वान्नुमागमः। आत्मनेपदम् सकर्मकम्। प्रगृह्यत्वात् दम्पती इति। ॐ तत्सदिति निर्देश इति 'तद्विजिज्ञासस्व' 'तत्त्वमसि' इत्यादिश्रुतिभ्यः तच्छब्दस्य ब्रह्मवाचकत्वादिति ॥

End:

अपसरत इति विबुधभटा इत्यन्तं गद्यम्। वैरिवर्गस्नेहे हृदाः प्रसन्ना इव गूढनक्रा इतिवत् परिणामे दुःखमेवेति। कर्मणा देवभावं गतानपसरतः। दैत्यदेवानाभिघ्नतः रणाभिमुखे हतान् दैत्यदेवानभिघ्नतः। आशीविषानिव भुजङ्गानिव स्थितानापततः शरान्।

* * *

सैकतविरचित सेतव इव सर्वतो विजघटिरे विबुधभटाः सर्वतो विजघटिरे। "घट चेष्टायाम्" कर्तरि लिट्, आत्मनेपदम्, विघटितवन्त इत्यर्थः। सेनामुखे निविष्टानां यमाग्निमरुतां पराजयात् वरुणस्य तटस्थत्वात् उल्लङ्घितवेलोदधिकल्लोलायमानासुरभटानुद्वीक्ष्य स्वामि.... ॥

Subject: Nīlakaṇṭhavijayacampūvyākhyā 1st Āśvāsa only.

Remarks:—The Ms. is in good condition. This Ms. abruptly ends in the middle of the first Āśvāsa. On the title page is given:—

"वृकोपनामकसन्यंभट्टस्येदम्"

This commentary is not available in print.

॥ नीलकण्ठविजयचम्पूव्याख्या ॥

4062. NĪLAKAṆṬHAVIJAYACAMPŪVYĀKHYĀ.

J. L. Collection No. 581. Substance—Paper. Size—11×5 inches. Sheets—41. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—1200. Author—? Incomplete. (Wants end).

Beginning—Same as No. 4061.

End:

निरन्तरं सन्ततं निरिन्धनं ज्वलद्विन्धनः "काष्ठं दार्विन्धनम्" इत्यमरः । अविन्ध.. ॥

Subject: Nīlakaṇṭhavijayacampūvyākhyā, otherwise known as Patākā.

Remarks:—The Ms. is in a fairly good condition. On the last sheet is given:—

त्वया गर्भे मातुर्यदिह चरितं चिन्तितमभू-
त्तदालोच्य स्वान्ते व्रज शिवमकार्ये त्यज रुचिम् ।
गतो दूरं मूर्खः क इव खलु वित्तार्जनधिया
चरेत्स्वैरं हित्वा धनपतिमृणादानरसिकः ॥

॥ नृसिंहचम्पूः ॥

4063. NṚSIMHACAMPŪḤ.

Burnell's Catalogue No. 4729. Page 159. Left column. Substance—Paper. Size—7½×4½ inches. Sheets—13. Lines—12 to 13 to a Page. Script—Devanāgarī. No. of Granthas—300. Author—Daivajñasūryapaṇḍita. Complete.

Beginning:

श्रीगणेशाय नमः ॥

श्री लक्ष्मीनृसिंहाय नमः ॥

आसीद्दैत्यकुले हिरण्यकशिपुः प्रौढप्रतापोऽसुर-
स्तस्यासीद्भगवत्प्रियो गुणनिधिः प्रह्लादनामात्मजः ।
दैत्येन्द्रस्तमपाठयत् स्वनिगमं नाङ्गीचकाराथ तं
विष्णोर्नाम विनेतरं न किमपि प्रायः प्रतिज्ञातवान् ॥ १ ॥

तज्ज्ञात्वा कुपितः पितातिपरुषैः वाक्यैः सुतं त्रासयन्
स्नेहार्द्रैरपि तत्प्रलोभनपरैः भूयः समाश्वासयन् ।
तं दृष्ट्वा दृढनिश्चयं पुनरसौ निर्विण्णचेताः परं
भृत्यानात्मजयातनार्थममरारातिर्दिदेशाचिरम् ॥ २ ॥

दैत्यः । अहो सवयसः सचिवाः साम्प्रतं विपक्षपक्षमा-
श्रितः पुत्राधमोऽयमुदरोत्पन्नो व्याधिरिव तरुसङ्घट्टनसमु-
त्पन्नदावाग्निरिवास्मन्नाशहेतुः कुलधूमकेतुरिवोदित आस्ते।

End:

मद्वाणी यदि शार्ङ्गिणो गुणगणव्याकर्णनोद्यत्सुधा-
स्वादाह्लादविवृद्धिभूरिरभसेनार्थेन हीनं पदम् ।
कुत्राप्युक्तवती स्वतः भवति चेत्तत्साधवः क्षम्यतां
गुञ्जामौक्तिकहीरपुञ्जपतिता प्राज्ञैर्न किं त्यज्यते ॥ १० ॥

आस्ते त्रस्तसमस्तदोषनिवहं गोदाविदर्भायुते
क्रोशेनोत्तरतस्तदुत्तरतटे पार्थाभिधानं पुरम् ।
तत्रासीद्गणकाग्रणीः पृथुयशाः श्रीनागनाथद्विजो
भारद्वाजकुलेऽथ तस्य तनयः श्रीज्ञानराजाभिधः ॥११ ॥

यद्ग्रन्थान् समधीत्य शिष्यनिवहोऽप्याचार्यचर्यामगात्
तत्सूनुर्गणितानपि (गम) प्रतरणे यत्कर्णधारः सुधीः ।
सङ्गीतागमकाव्यनाटकपटुः सूर्याभिधानः कविः
चम्पूकाव्यमिदं चकार चतुरं लक्ष्मीपतिप्रीतये ॥ १२ ॥

Colophon:

इति श्रीदैवज्ञसूर्यपण्डितविरचिते नृसिंहचम्पूकाव्ये चतुर्थोल्लासः ॥

श्रीरस्तु ॥

इति नृसिंहचम्पूः सम्पूर्णा ॥

Subject: Nṛsimhacampū 1-4 Ullāsas.

Remarks :—The Ms. is in good condition. A paper transcript of this Ms. is available in this library. See T. V. No. 321.

The author, Daivajñasūryapaṇḍita, is already known to us as the author of the Rāmakṛṣṇavilomakāvya. The present work deals with the story of Prahlāda and his deliverence from the cruelties of his father by God Viṣṇu in the form of Narasihma or Man-Lion. The work does not seem to have been printed so far.

॥ नृसिंहचम्पूः ॥

4064. NṚSIMHACAMPŪḤ.

J. L. Collection No. 582. Substance—Paper. Size—$10 \times 4\frac{1}{2}$ inches. Sheets —14. Lines —10 to a Page. Script—Devanāgarī. No. of Granthas—300. Author—Daivajñasūryapaṇḍita. Complete.

Beginning, end, colophon and subject—Same as No. 4063.

Remarks:—The Ms is in a fairly good condition.

॥ नृसिंहचम्पूः ॥

4065. NṚSIMHACAMPŪḤ.

Burnell's Catalogue No. 4727. Page 159. Left column.

Substance—Paper. Size—$9\frac{1}{8} \times 4\frac{1}{2}$ inches. Sheets—24. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas —370. Author—Saṅkarṣaṇa. Complete.

Beginning:

श्रीनृसिंहाय नमः ॥

प्रेङ्खत्तक्षकशेषकुण्डलमिहो(?)द्दामरत्नाङ्कुर-
ज्योतिर्मण्डलपाटलीकृतलसल्लोकत्रयीमण्डपे ।
सन्ध्याताण्डवडम्बरं विरचयन् प्रोत्तुङ्गगण्डोच्चल-
त्सिन्दूरारुणिताम्बरो विजयते विघ्नौघविध्वंसकृत् ॥

मल्लारेर्म्लालसायाश्च भवानीशिवदासयोः ।
पित्रोरपि पदद्वन्द्वं नौमि सर्वार्थसिद्धिदम् ॥ २ ॥

भ्राम्यद्गुञ्जदमन्दभृङ्गमिलितप्रोत्फुल्लनीलाम्बुज-
च्छायास्तीर्णविशालकालविलसद्दर्वीकराधीश्वरे ।
यच्छेते सकलासुरप्रमथनं क्षीरार्णवे श्रीयुतं
तद्ध्यायेम सदा सदाशिवमुखध्येयं सुनीलं महः ॥ ३ ॥

इह सकलकलोद्यद्वंशमूर्धन्यभूषा-
मणिरखिलविपश्चित्पादपद्मैकभृङ्गः ।
सकलजलधिपारप्रान्तविश्रान्तकीर्तिः
जयति जगति विद्वान् कोऽपि सङ्कर्षणाख्यः ॥

कवित्वे शक्तिश्चेन्न हि भवति शास्त्रेषु विदुषां
तयोः सम्पत्तिश्चेदखिलनृपतिप्रीतिरपि यत् ।
. . . .
. . . . .यस्मिन्विवसति ॥ ५ ॥

मीमांसाजन्मभूमिः खनिरपि निखिलन्यायसाङ्ख्यागमानां
वेदान्तानाञ्च वक्ता कविकुलतिलकः सर्वसामन्तपूज्यः ।
श्रौताब्धेर्मन्दराद्रिः प्रतिनिधिरतुलः श्रीनृसिंहप्रसादा-
च्चम्पूकाव्यं रसालं रसयति विबुधानन्दसन्दोहहेतुः ॥ ६ ॥

पूर्वोत्तरमीमांसापरः ॥

सम्पाद्यापूर्वलक्ष्मीं सपदि सुकृतिनां देवतामध्यवर्ती
विष्णुः सोमैकभाजामपि निरतिशयप्रीतिदाने समर्थः ।
वेदाः सर्वेऽपि यस्मादनृतरजतवद्भाति यस्मिन्प्रपञ्चो
लक्ष्यो वेदान्तवाक्यैः वितरतु भवतां सोयमीशो विभूतिम् ॥७॥

* * * *

इति यद्यपि नास्ति मेऽधिकार-
स्तदपि श्रीपतिवर्णने प्रयत्नः ।
अपि मन्दधिया(मया)धुनैव
क्रियते दुर्जयपातकौघशान्त्यै ॥ १० ॥

यस्य च चतुरुदधिवेलावनविराजमानसकलधराचक्रवि-क्रमणचातुरीचतुरनिखिलकुलाचलपरिदृढकैलासशिखरसह-स्रमध्यवर्तिह(नि)वैकुण्ठनाम्निपर्वते व्याकरण इवोत्तम-धातुभूषितवपुषि शङ्कर इवामन्दमन्दाकिनीपूरितशिरसि वेद इव शतपथप्रकटितपरमपुरुषार्थे युधिष्ठिर इव भीमा-

र्जुनसेविते द्विजातिफालस्थल इवातिविस्तीर्णतिलके * वृन्दारकमध्यवर्तिनः पुरुषोत्तमस्य गुणगणवर्णनाकीर्णपूर्णकर्णपुटाः कतिचित्सुखमनुभवन्ति ॥

End:

इति भक्तवचो यदाभव-
न्मृतदेहान्महदुज्ज्वलं महः ।
निरगान्नरसिंहविग्रहो
भुवि दृष्टं त्रिदशैस्तदद्भुतम् ॥

इत्यद्भुतरसः ॥

इति दलितसपत्नः प्राप्य लीलावतारं
सकलभुवनराज्ये स्थापयित्वा स्वभक्तम् ।
जलधिकलितभूमेर्भारमुद्धृत्य तूर्णं
सुरगणमपि दृष्ट्वान्तर्दधे श्रीनृसिंहः ॥

इति सकलकलोन(?)स्फारवाग्ब्रह्मविद्या
दुरधिगमसमुद्रोत्तुङ्गपारङ्गतेन ।
जगदखिलविपश्चिद्भक्तसङ्कर्षणेन
व्यरचि नृहरिचम्पूकाव्यमेतत्क्षणेन ॥

Colophon:

इति सकलकलाकुलतिलकशिवदाससूरिसूनुसङ्कर्षणविरचिते नृसिंहचम्पूकाव्ये चतुर्थोल्लासः ॥

श्रीनृसिंहार्पणमस्तु ॥

Subject: Nṛsimhacampū 1-4 Ucchvāsas.

Remarks:—The Ms. is in a fairly good condition.

This is another work of the same name but by a different author. The author of this work is one Saṅkarṣaṇa. This too deals with the same topic as the previous one. This work also does not seem to have been published so far.

॥ नृसिंहचम्पूः ॥

4066. NṚSIMHACAMPŪḤ.

Burnell's Catalogue No. 4728. Page 159. Left column.

Substance—Paper. Size—$9\frac{1}{2} \times 4\frac{1}{2}$ inches. Sheets—21. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—360. Author—Keśavabhaṭṭa. Complete.

Beginning:

कनकरुचिदुकूलः कुण्डलोल्लासिगल्लः
शमितभुवनभारः कोऽपि लीलावतारः ।
त्रिभुवनसुखकारी शेषधारी मुकुन्दः
परिकलितरमाङ्गो मङ्गलं नस्तनोतु ॥

श्रीलौगाक्षिकुलारविन्दतरणिर्माध्यन्दिनाम्नायवित्
मीमांसायुगतर्कतन्त्रचतुरः साहित्यरत्नाकरः ।
काव्यं श्रीनृहरेः करोति सुकृती गोदातटप्रोल्लस-
त्पुण्यस्तम्भनिवासिकेशवसुतानन्तात्मजः केशवः ॥

विष्णोर्नाभिसरोरुहे कमलभूः पाथोनिधौ माधवः
कैलासे सपरिग्रहस्त्रिनयनः पातालतः पन्नगः ।
किंचित्कालममंस्त चारुवसतिश्लाघामहोयद्भया-
द्देवोपप्लवकृद्धिरण्यकशिपुर्दैत्याधिराजोऽभवत् ॥ ३ ॥

तेपे तपः परमदारुणमूर्ध्वबाहु-
र्व्योमेक्षणः कनकपिङ्गजटाकलापः ।
अङ्गुष्ठकाग्रकलितावनिरुग्रतेजाः
सर्वार्थनिस्पृहमनाः स भुजङ्गवृत्तिः ॥ ४ ॥

ततस्तदीयोग्रतेजःप्रचयेन तप्ताः सुमनसः सर्वे समुज्झितत्रिदिवादिवासाः कथमपि ब्रह्मलोकमागत्य धात्रे विज्ञापयामासुः ।

End:

गृहे गृहे माङ्गलिकक्रियाणा-
मासीत्समारम्भविधिस्तदानीम् ।
वेदादिविद्याध्ययनानि चास्य
तस्यापि नासीन्मनसो विषादः ॥ ६ ॥

विद्वन्मण्डलकल्पपादपवनं विद्योतिवाग्देवता-
सङ्केतायतनं नितान्तकमलालीलाविलासास्पदम् ।
लक्ष्मीवल्लभभक्तिभाण्डभवनं भूमण्डलीमण्डनं
कीर्तेः केलिनिकेतनं दलपतिर्गोविन्दनामाभवत् ॥

श्रीमान्कल्पमहीरुहः किमवनौ किं वाथ चिन्तामणिः
किं कर्णः किमु विक्रमः किमथवा भोजोऽवतीर्णः परः ।
इत्थं यत्र विलोकिते सति सतां बुद्धिः समुज्जृम्भते
सोऽयं श्रीमदुमापतिः दलपतिस्तस्यांगजो नन्दति ॥

श्रीलक्ष्मीनृहरिप्रसादविमलस्यानन्तस्य तस्याज्ञया
नानानूतनगद्यपद्यरचनावैद्यैकवाचस्पतिः ।

मीमांसानलिनीविकासतरणिन्यायाब्धिमन्थाचलः
चम्पूं केशवपण्डितो व्यरचयच्चेतश्चमत्कारिणीम् ॥

विलासो यद्वाचां क्षपयति कटाक्षं मृगदृशां
रसोद्रेकस्तासामधरयति बिम्बाधरमपि ।
मृदुत्वं पाण्डित्यं यदि न गणयत्यङ्गलतिका
मृदुत्वं क्वेदं त्वत्कुचघटतटप्रान्तविजयी ॥ १० ॥

भो कर्णाटकगौडगुर्जरमहाराष्ट्रौद्रपाञ्चालक-
श्रीमद्द्राविडकान्यकुब्जकवयः कोलाहलं मा कृथाः ।
शैलाधीशसुतादृगञ्चलचलत्कीरैकलीलायितं
काव्यं केशवपण्डितस्य कृतिनः कर्णामृतं श्रूयताम् ॥

काव्यं कर्तुमजानतापि रुचिरा चम्पूरियं गुम्फिता
श्रीलक्ष्मीनृहरिप्रतापमहिमा सोऽयं समुज्जृम्भते ।
यत्सूते सलिलं नितान्तविमलं चन्द्रोपलः शीतलं
....सान्द्रसुधामयः समहिमाशीतद्युतेः केवलम् ॥ १३ ॥

Colophon:

इति श्रीकेशवभट्टविरचितं(ता) नृसिंहचम्पूः सम्पूर्णा ॥

(Sheet No. 20)

इति श्री भट्टकेशवविरचिते चम्पूकाव्ये पञ्चमस्तबकः ॥

Subject: Nṛsimhacampū 1-6 stabakas.

Remarks:—The Ms. is in a fairly good condition.

This is a third Nṛsihmacampu by a writer named **Keśava-bhaṭṭa**. The subject of this work too happens to be the same

as the two previous works. This work too has not been printed so far.

॥ भागवतचम्पूः ॥

4067. BHĀGAVATACAMPŪḤ.

Burnell's Catalogue No. 4709. Page 160. Left column. Substance—Paper. Size—12⅞ × 5 inches. Sheets—111. Lines—9 or 10 to a Page. Script—Devanāgarī. No. of Granthas—2200. Author—Cidambara. Complete.

Beginning:

श्रीगणेशाय नमः ॥ श्रीवेदव्यासाय नमः ॥

कल्याणमाचरतु वः करुणासरस्वान्
कश्चिद्द्विपश्चिदपि निश्चितपा.... ।
आश्चर्यमूर्तिरपदानवरोऽपि योऽलं
वक्त्रे करेऽपि वहते वरदानरीतिम् ॥ १ ॥

अपि च ॥

भद्रं करोतु बलभद्रसहोदरो....
........तस्सुनिरूढशक्तिः ।
वारांनिधौ प्रकटितप्रवरोरुधामा
श्रीराम एव सुरसंश्रितपारिजातः ॥ २ ॥

गोत्रे महीयसि गुणैर्भुवि सूर्यपूर्व-
नारायणाध्वरिमणेर्ननु कौशिकीये ।
पुत्रादनन्तपदपूर्वपदाद्बुधोऽभू-
न्नारायणादिह चिदम्बरनामधेयः ॥ ३ ॥

कौतूहलेन विबुधोत्तमकर्णधार्यं
कौन्तेयरामयदुनाथकथागुणाढ्यम् ।
कान्तं यतः समुदपद्यत काव्यरत्नं
रत्नं पयोरसनिधेरिव कौस्तुभाख्यम् ॥ ४ ॥

संबुद्धसारसमुखं बुधसन्नुताङ्घ्रि-
मम्बुध्यधीशतनयासखमम्बुजाक्षम् ।
कम्बुप्रभां कमलजस्य वधूं च नत्वा
चम्पूं चिदम्बरकविः स चरीकरीति ॥ ५ ॥

काव्येषु सत्स्वपि महत्सु कवीश्वराणां
प्रायो मितापि भणितिः प्रमुदे मदीया ।
कूलङ्कषेषु भुवने सरिताङ्कुलेषु
कुल्यापि किं न सरसा कुरुते प्रमोदम् ॥

कोलाहलं कुमतयः कवयन्तु नाम
तूष्णीकता सुकविभिर्न तु जातु कार्या ।
वादोन्मुखे द्विजकुले बहुधागमेषु
वाच्यामुदे(?) किमु शुको न परीक्षितोऽभूत् ॥

मामा परस्य चरितं मम यादवानां
नाथस्य वर्णयतु नातिगुणापि वाणी ।
यः पाण्डवस्य यमिमृग्यपदोऽप्यसारं
सारथ्यमप्यकृत सान्द्रकृपाश्रितस्य ॥

आसेऽद्विवानसितकन्धरवाहभावं
सन्नन्दनः कृतकरग्रहदेवसेनः ।

स्कन्दामरेन्द्रसदृशोऽभिदुरास्त्रशक्त्या
सोऽभूत्परीक्षितपराक्षितिभृत्परीक्षित् ॥

पादैश्चतुर्भिरपि पाण्डुकुलप्रदीपः
संयोजयन्जयकृता स्वगुणेन धर्मम् ।
यः पालयन्न(?)जनमेव यशःपयोधिः
कामं कृती भुवि कलिञ्च कृतीचकार ॥

End:

हंसाधिराजरथपूर्वसुपर्ववाचा
ध्वंसाय दुष्टमनसामवतारभाजा ।
संसारिणामनुस्मृतिः परमेण पुंसा
कंसारिणापि सरसं कलयाम्बभूवे ॥

नवनवकृतिचित्रैः पद्मनाभश्चरित्रैः
भुवनमतिपवित्रैर्द्वारकाभूनिवासी ।
अवनविरचनायमाङ्कितां(?) जागरूको
(?)नवनविषयभूमानन्दयामास लोकम् ॥

Colophon:

इति कौशिकगोत्रस्य सूर्यनारायणाध्वरिणः सूनोरनन्तनारायणसुमतेः पुत्रस्य चिदम्बरस्य कृतौ चम्पूभागवते तृतीयः स्तबकः ॥

चम्पूभागवतं नामकाव्यं समाप्तम् ॥

Subject: Bhāgavatacampu 1-3 stabakas.

Remarks:—The Ms. is in good condition.

There are several Campukāvyas dealing with the story of the Bhāgavata by different writers. Most of them are not printed

The present work is that of Cidambara Kavi, whose other works have been described already. See Number 3749.

॥ भागवतचम्पूः ॥

4068. BHĀGAVATACAMPŪḤ.

Burnell's Catalogue No. 10106. **Page** 160. Left column. **Substance**—Palm leaf. Size—$16\frac{7}{8} \times 1\frac{1}{2}$ inches. Leaves —49 (122-170). Lines—8 to a Page. Script—Telugu. No. of Granthas—2200. Author—Cidambarakavi. Complete.

Beginning, end, colophon and subject—Same as No. 4067.

Remarks:—The Ms. is in a fairly good condition.

This seems to have been the original of the Ms. described under No. 4067.

॥ भागवतचम्पूः ॥

4069. BHĀGAVATACAMPŪḤ.

Burnell's Catalogue No. 10107. Page 160. Left column. **Substance**- Palm leaf. Size—$16 \times 1\frac{1}{4}$ inches. Leaves—84 (149-232). Lines—5 to a Page. Script—Grantha. No. of Granthas—1250. Author—Rāmabhadra. Complete.

Beginning:

अस्तु श्रियै श्रीसुहृदच्युतेन्दो-
रैश्वर्यसिद्ध्यै पतिरङ्गनाद्रेः ।
बलाय जेता बलिदानवस्य
पुमर्थहेतोः पुरुषः पुराणः ॥

प्रकाश्य पाणिश्रितमेणमग्रे
स्वाधीनयन् स्वान्तमृगं मुनीनाम् ।
आपादयेदच्युतभूवलारे-
रहार्यमैश्वर्यमहार्यधन्वा ॥

उच्चारभंग्या युगपच्छ्रुतीना-
मुपात्तसाफल्यचतुर्मुखीकः ।
आयुष्कलामच्युतरायमौले-
राकल्पमाकल्पयताद्विधाता ॥

धम्मिल्लशैवालधरा विराज-
दपाङ्गमीनाधरविद्रुमाभा ।
धन्या पितृच्छायतयाब्धिकन्या
तन्यादवन्यां श्रियमच्युतेन्दोः ॥

पुष्यात्पुरन्ध्री पुरशासनस्य
पुङ्खानुपुङ्खां श्रियमच्युतेन्दोः ।
कलानिधानं दधती कबर्यां
संयोजयन्तीव सदा रजन्याः ॥

निजाशयः निर्मलसूक्तिपूरं
नेतुं प्रणम्रान् घटयन्त्रमेव ।
पाणौ वहन्ती स्फटिकाक्षमालां
वाणी पुराणी वशवर्तिनी स्यात् ॥

विस्तारिणो व्यासमुखोक्तिपुरा-
त्कथां...कथयामि पुण्याम् ।

अम्भो नयन्ती पृथगापगानां
कुल्योपयोगाय कुतो न भूयात् ॥

अस्ति खलु समस्तजगदद्भुतवस्तुसा...समुच्छीलितविपणिरामणीयका सौवर्गपुरगोपुराग्रविलासवासयष्टिकाधिष्ठितमयूरमदनहस्ततालायमानपरस्परपरीत....पटपटायितनर्मभवनहर्म्यशिखरसन्दानितविविधवैजयन्तिका * मधुरा नाम नगरी ॥

End:

इन्धानः सममग्रजेन जननीं हृष्यन्मुखीं देवकीं
वन्दित्वा वसुदेवमप्यविरमद्वात्सल्यमाभ्यां पुनः ।
आश्लिष्टं कृतनन्दनं धुरमसौ राज्ये तथा माथुरे
विन्यस्य स्वयमुग्रसेनमतनोद्विश्वत्रयीपालनम् ॥

Colophon:

दुर्मतिशरदि विबुधदेशिकदिने हरिदश्वे च हर्यारूढे वलक्षेच पर्वपूर्वतिथौ विद्वदतिथिसत्कारधुरन्धरस्य सङ्गीतसाहित्यमुखविद्यावदुधानस्य सकलगुणसम्पन्नस्य श्रीरामभद्रस्य भागवतचम्पूप्रबन्धः सम्पूर्णो जातः ॥ हरिः ॐ ॥ शुभमस्तु ॥ श्रीगुरुभ्यो नमः ॥ श्रीरामचन्द्राय नमः ॥

Subject: Bhāgavatacampū.

Remarks:—The Ms. is in a fairly good condition.

This is a second Bhāgavatacampū by a writer named Rāmabhadra. It is very likely that this Rāmabhadra is different from the famous Rāmabhadra Dīkṣita.

॥ भागवतचम्पूः ॥

4070. BHĀGAVATACAMPŪḤ.

Burnell's Catalogue No. 12369. Page 160. Left column. Substance—Paper. Size—11 × 5 inches. Sheets—92. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—1550. Author—Rājanātha. Complete.

Beginning, end and subject—Same as No. 4069.

Colophon:

इति श्रीराजनाथकविकृतभागवतचम्पूप्रबन्धः समाप्तः ॥

श्रीकृष्णः प्रीयतां सदा ॥

Remarks:—The Ms. is in a fairly good condition. The author of this work given in this Ms. is different from that given in No. 4069. In No. 4069 the author's name appears as Rāmabhadra. Dr. Burnell gives the name as Raghunātha.

॥ भारतचम्पूः ॥

4071. BHĀRATACAMPŪḤ.

Burnell's Catalogue No. 4695. Page 160. Left column. Substance—Paper. Size—$1\frac{1}{8} \times 5\frac{7}{8}$ inches. Sheets—93. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—2300. Author—Anantabhaṭṭa. Complete.

Beginning:

कल्याणं वो विधत्तां करटमदधुनीलोलकल्लोलमाला-
खेलल्लोलम्बकोलाहलमुखरितदिक्चक्रवालान्तरालम् ।
प्रत्नं वेतण्डरत्नं सततपरिचलत्कर्णतालप्ररोह-
द्वाताङ्कुराजिहीर्षादरविवृतफणाभृत्क्रभूषाभुजङ्गम् ॥ १ ॥

तुहिनकिरणवंशस्थूलमुक्ताफलानां
विपुलभुजविराजद्वीरलक्ष्मीविभूम्नाम् ।
हसितसुरपुरश्रीरस्ति सा हास्तिनाख्या
रिपुजनदुरवापा राजधानी कुरूणाम् ॥ २ ॥

End:

राज्ञां मौलिपरम्परां चरणयोः पाणौ प्रदानश्रियं
बुद्धौ राजनयोदयं हृदि कृपां सत्यं रसज्ञाञ्चले ।
बाहौ सागरमेखलां वसुमतीं मस्ते किरीटं मुदा
कुर्वन् धर्मतनूभवश्चिरमसौ गोपायति स्म प्रजाः ॥ ९ ॥

Colophon:

इत्यनन्तभट्टस्य कृतौ चम्पूभारते द्वादशः स्तबकः समाप्तः ॥१२॥

दिगन्तरलुठत्कीर्तिरनन्तकविकुञ्जरः ।
प्राणैस्तुल्यं सरस्वत्याः प्राणैषीच्चम्पुभारतम् ॥

उन्मीलदोषसकुशेशयसौरभिणा-
मुन्नृत्यदीशमकुटीतटिनीसखीनाम् ।
आचान्तवैरियशसाममृतोर्मिलानां
वाचामनन्तसुधियो वसुधैव मूल्यम् ॥

अंगिरःफाल्गुने शुक्ले द्वितीयायां शुभे दिने ।
अच्युतो लेखकः सूरिरलिखच्चम्पुभारतम् ॥

Subject: Campubhārata, 1—12 stabakas.

Remarks:—The Ms. is in excellent condition. **Alternate sheets are sulpherated.**

The wok is available in print being published by the Nirṇayasāgara Press, Bombay.

॥ भारतचम्पूः ॥

4072. BHĀRATACAMPŪḤ.

Burnell's Catalogue No. 4696. Page 160. Left column. Substance—Paper. Size—10¼×4 inches. Sheets—129. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—2300. Author—Anantabhaṭṭa. 1-12 stabakas only.

Beginning end colophon and subject—Same as No. 4071.

विश्वावसुनामसंवत्सरे दक्षिणायने वर्षर्तौ श्रावणमासे कृष्णपक्षे चतुर्दश्यां समाप्तोऽयं ग्रन्थः ॥

Subject: Bhāratacampū. 1-12 stabakas.

Remarks:—The Ms. is in very good condition. First six sheets are missing in the 6th stabaka.

The copying of this Ms. was finished in the cyclic year Viśvāvasu, Dakṣiṇāyana, Varṣartu, Kṛṣṇapakṣa and 14th day.

॥ भारतचम्पूः ॥

4073. BHĀRATACAMPŪḤ.

Burnell's Catalogue No. 10098. Page 160. Left column. Substance— Palm leaf. Size—15× 1½ inches. Leaves—93. Lines—7 to a Page. Script—Grantha. No. of Granthas—2300. Author—Anantabhaṭṭa. Complete.

Beginning, end, colophon and subject—Same as No. 4071.

The two verses found after the colophon in No. 4071 are also found here.

Remarks: —The Ms. is in good condition.

On the title page is given

भारतचम्पुविले आकश्लोक 2௲௨௰௮ (1028) चूर्णिकै ௨௱௩௰௮ (238) परमशिवाय नमः and पञ्चनद्स्य भारतचम्पू...

॥ भारतचम्पूः ॥

4074. BHĀRATACAMPŪḤ.

Burnell's Catalogue No. 10099. Page 160. Left column. Substance—Palm leaf. Size—16 × 1¼ inches. Leaves—90. (106-195). Lines—5 or 6 to a Page. Script—Telugu. No. of Granthas—2300. Author—Anantabhaṭṭa. Complete.

Beginning, end, colophon and subject same as No. 4071.

Remarks:—Tbe Ms. is in a fairly good condition.

॥ भारतचम्पूः ॥

4075. BHĀRATACAMPŪḤ.

Burnell's Catalogue No. 10100. Page 160. Left column. Substance— Palm leaf. Size—15½ × 1 inches. Leaves —124 (1-65, 62-85 & 91-125). Lines—5 or 6 to a Page. Script—Grantha. No. of Granthas—2200. Author—Anantabhaṭṭa 1-12 stabakas (Wants in the middle).

Beginning, end, colophon and subject—Same as No. 4071.

Remarks:—The Ms. is in a decaying condition.

॥ भारतचम्पूः ॥

4076. BHĀRATACAMPŪḤ.

Burnell's Catalogue No. 10101. Page 160. Left column. Substance—Palm leaf. Size—$14\frac{1}{2} \times 1\frac{1}{2}$ inches. Leaves—127. Lines—6 to Page. Script—Grantha. No. of Granthas—1900. Author—Anantabhaṭṭa. Complete.

Beginning, end, colophon and subject—Same as No. 4071.

Remarks:—The Ms. is in a decaying condition.

॥ भारतचम्पूः ॥

4077. BHĀRATACAMPŪḤ.

Burnell's Catalogue No. 10102. Page 160. Left column. Substance—Palm leaf. Size—$14\frac{1}{4} \times 1$ inches. Leaves—155. Lines—5 or 6 to a Page. Script—Grantha. No. of Granthas—2200. Author—Anantabhaṭṭa. 1-12 stabakas. (Wants beginning and end)

Beginning:

.........घण्टामणेरभिहतस्य घनारवेण ॥

वक्त्रं विलासमणिदर्पणधार्यमाणं
वामा हिमांशुरयमित्यवधार्य यस्याम् ।
...शुबिम्बधृतिरश्रुतदृष्टपूर्वं
तस्येति ताडशविधं विनिवर्तयन्ति ॥

End:

राज्ञां मौलिपरम्परां चरणयोः पाणौ प्रदानश्रियं

....

Colophon; (Leaf No. 140)

इत्यनन्तभट्टस्य कृतौ चम्पूभारते दशमस्तबकः ॥

Subject: Bhāratacampū 1-12 stabakas.

Remarks:—The Ms. is in a decaying condition.

॥ भारतचम्पूः ॥

4078. BHĀRATACAMPŪḤ.

Burnell's Catalogue No. 4702. Page 160. Left column. Substance—Paper. Size—11½ × 5¾ inches. Sheets—66. Lines—9 to 11 to a Page. Script—Devanāgarī. No. of Granthas—2000. Author—Anantabhaṭṭa. 1-5 & 8-12 stabakas only.

Beginning and end: Same as No. 4071.

Colophon:

अनन्तभट्टस्य कृतौ चम्पूभारते द्वादशः स्तबकः समाप्तः ।

दिगन्त + सन्तः ॥

विश्वावसुनामसंवत्सरे दक्षिणायने वर्षतौ श्रावणमासे कृष्णपक्षे चतुर्दश्यां समाप्तोऽयं ग्रन्थः

Subject: Bhāratacampū 1-5 & 8-12 stabakas.

Remarks:—The Ms. is in a fairly good condition.

॥ भारतचम्पूः ॥

4079. BHĀRATACAMPŪḤ.

J. L. Collection No. 583. Substance—Paper. Size—9½ × 4 inches. Sheets—128. Lines—9 to a Page.

Script—Devanāgarī. No. of Granthas—2400. Author —Anantabhaṭṭa. Complete.

Beginning, end and subject—Same as No. 4071.

Colophon:

इत्यनन्त + द्वादशस्तवकः ॥ १२ ॥

दिगन्तर + मूल्यम् ॥ २ ॥

श्रीमहागणपतिर्जयति ॥ भारतचम्पूः समाप्ता ॥

ग्रन्थसङ्ख्या २४००, प्रमाथिनामसंवत्सरे माघमासे कृष्णपक्षे द्विती-
यायां तिथौ भौमवासरे हे पुस्तक नारायणभट्टद्रा(वि)डेन लिखितं
असे ॥

Subject: Bhāratacampū 1-12 stabakas.

Remarks:—The Ms. is in a good condition.

The Ms. was copied in the cyclic year Pramāthin, Māgha month, Dark fortnight, 2nd day and Tuesday by Nārāyaṇabhaṭṭa.

॥ भारतचम्पूः ॥

4080. BHĀRATACAMPŪḤ.

Burnell's Catalogue No. 10103. Page 160. Left column. Substance—Palm leaf. Size—15×1¼ inches. Leaves—81. Lines—5 or 6 to a Page. Script—Grantha. No. of Granthas—1700. Author—Anantabhaṭṭa. 1-5 Stabakas. (Wants end).

Beginning—Same as No. 4071.

End:

सुदति बहुपरागधूसरापि त्वमपहरस्यधुना मनो मदीयम् ।
रतिरिव हरकोपदह्यमानस्मरतनुधूमलवाविलाङ्गी ॥

Colophon : (Leaf 262)

इत्यनन्तभट्टस्य कृतौ चम्पुभारते चतुर्थस्तबकः ॥

Subject: Campubhārata. 1—5 stabakas.

Remarks:—The Ms. is in a fairly good condition.

Two leaves in the beginning contain some stotra on Nārāyaṇa.

॥ भारतचम्पूः ॥

4081. BHĀRATACAMPŪḤ.

Not noticed by Burnell. Ms. No. 15536.

Substance—Palm leaf. Size—$17\frac{1}{2} \times 1\frac{1}{8}$ inches. Leaves—81. Lines—6 or 7 to a Page. Script—Grantha. No. of Granthas—1700. Author—Anantabhaṭṭa 1-5 stabakas.

Beginning—Same as No. 4071.

End: Same as No. 4080.

Colophon: (Leaf 60)

इत्यनन्तभट्टकृतौ चम्पूभारते चतुर्थोल्लास (!)।

Subject: Campūbhārta. 1-5 stabakas.

Remarks:—The Ms. is in a decaying condition.

॥ भारतचम्पूः ॥

4082. BHĀRATACAMPŪḤ.

J. L. Collection No. 584. Substance—Paper. Size—$10\frac{1}{2} \times 4\frac{1}{2}$ inches. Sheets—46. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—1250. Author—Anantabhaṭṭa. 1-4 stabakas only.

Beginning—Same as No. 4071.

End and colophon—Same as No. 4087.

Subject: Bhāratacampū.

Remarks:—The Ms. is in a fairly good condition.

॥ भारतचम्पूः ॥

4083. BHĀRATACAMPŪḤ.

T. S. Collection No. 689. Substance—Paper. Size—9¾ × 4 inches. Sheets—74. Lines—9 to 10 to a Page. Script—Devanāgarī. No. of Granthas—1250. Author—Ananta-bhaṭṭa. 1-5 stabakas.

Beginning:

षड्गुणैश्वर्यसम्पन्नं सत्यभामापनोहरम् ।
सेवे मदनगोपालं शृङ्गारमिव जङ्गमम् ॥

चिन्तिता वासुदेवस्य चिरन्तनतपःफलम् ।
वल्लवीहृदयानन्दबालिमा कापि नीलिमा ॥

कल्याणं वो०

Same as No. 4071.

End:

तदनु विदितवार्तो धार्तराष्ट्रश्चरेभ्यः
शुभगुणचरितेभ्यस्सूतजानां शतस्य ।
वसतिमरिजनानां मात्स्यभूपालपुर्यां
हृदयमुकुरलग्नैर्हेतुभिर्निश्चिकाय ॥

अन्येद्युरंगेश्वरसौबलाभ्यां......

Colophon: (Sheet No. 53).

इत्यनन्तभट्टकृते चम्पूभारते चतुर्थस्तबकः ॥

Subject. Bhāratacampū. 1-5 stabakas

Remarks;—The Ms. is in a fairly good condition.

॥ भारतचम्पूः ॥

4084. BHĀRATACAMPŪḤ.

Burnell's Catalogue No. 10105. Page 160. Left column. Substance—Palm leaf. Size—9¼ × 1½ inches. Leaves —23. Lines—9 or 10 to a Page. Script—Telugu. No. of Granthas—820. Author—Anantabhaṭṭa. 1-3 stabakas. only. (Wants end)

Beginning—Same as No. 4071.

End:

क्षोणीनम्रङ्करणमहिमा कोपलेशो यदीयः
तस्यावासं दिशमभिययौ तापसस्येन्द्रसूनुः ॥

Colophon: (Leaf No. 20.)

इत्यनन्तभट्टकृते चम्पुभारते द्वितीयस्तबकः ॥

Subject: Bhāratacampū. 1-3 Stabakas.

Remarks:—The Ms. is in a decaying condition. This Ms. abruptly ends in the middle of the third stabaka.

A few fragmentary leaves at the end contain some verses from the Kṛṣṇakarṇāmṛta.

॥ भारतचम्पूः ॥

4085. BHĀRATACAMPŪḤ.

T. S. Collection No. 695. Substance—Paper. Size—10½ × 4

inches. Sheets—40. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—650. Author—Anantabhaṭṭa. 1-3 stabakas only.

Beginning—Same as No. 4071.

End:

अथ स्मित्वा तुन्दं परिमृशति मन्दायितगतौ
समापृच्छ्य प्रीत्या त्रिदिवमुपयाते हुतवहे ।
रथाभ्यां मौनिभ्यां घनसलिलसेकेन महता
विजैत्रौ तौ कृष्णौ विविशतुरुपातं नरपतेः ॥ १२ ॥

Colophon:

इत्यनन्तभट्टस्य कृतौ चम्पुभारते तृतीयस्तबकः ॥

Subject: Bhāratacampū. 1-3 stabakas.

Remarks:—The Ms. is in a fairly good condition. After the colophon is given the first two verses of the next stabaka.

॥ भारतचम्पूः ॥

4086. BHĀRATACAMPŪḤ.

Burnell's Catalogue No. 4699. Page. 160. Left column. Substance—Paper. Size—7½ × 4¾ inches. Sheets—23. Lines—9 to 10 to a Page. Script—Devanāgarī. No. of Granthas—270. Author—Anantabhaṭṭa. Second stabaka only.

Beginning:

श्रीमदानन्दतीर्थभगवत्पादार्यगुरुभ्यो नमः ॥
शुभमस्तु ॥ हरिः ॐ ॥

एकदा तु ते सर्वेऽपि सुपर्वसरितः सलिलेषु चिरं वि-
हृत्य समुत्तीर्णाः ॥

End:

तस्मिन्नाहितलक्षणे नरपतौ राज्याभिषिक्ते सति
स्वान्यक्षीणि दधुर्यदम्बुशिशिरे लिप्ताङ्गके कुङ्कुमैः ।
रागं यद्बिभराम्बभूवुरवहन् यद्वर्णिते वर्णिभि-
र्निष्पन्दत्वमतः स्वदृष्टिविदितं पौरा विवव्रुः स्फुटम् ॥

Colophon:

इत्यनन्तभट्टस्य कृतौ चम्पूभारते द्वितीयस्तबकः समाप्तः ॥

Subject: Bhāratacampū. Second stabaka only.

Remarks:—The Ms. is in a fairly good condition.

॥ भारतचम्पूः ॥

4087. BHĀRATACAMPŪḤ.

J. L. Collection No. 585. Substance. Paper. Size—9×4½ inches. Sheets—14. Lines—9 to a page. Script—Devanāgarī. No. of Granthas—300. Author—Anantabhaṭṭa. Fourth stabaka only.

Beginning:

याते ततो निजपुरीं यदुवंशकेतौ
राज्ञे मयोमणिसभां रचयाम्बभूव ।
तस्या रुचं समवलोक्य शुचाधुनापि
जीवं गतागतजुषं वहते सुधर्मा ॥

End:

तस्याथ पाण्डुपतलाभदुरापदीप्ते-
रक्ष्णोः समक्षमुपरिप्लवपक्ष्मपङ्क्तेः ।

आश्चर्यवृत्तिरखिलैरनुगामिभिः स्वै-
रन्तर्दधे स भगवानमृतांशुमौलिः ॥

Colophon :

इत्यनन्तभट्टस्य कृतौ चम्पूभारते चतुर्थस्तबकः समाप्तः ॥

Subject: Bhāratacampū. Fourth stabaka only.

Remarks:—The Ms. is in a fairly good condition.

॥ भारतचम्पूः ॥

4088. BHĀRATACHAMPŪḤ.

J. L. Collection No. 586. Substance—Paper. Size—9½ × 4½ inches. Sheets—18. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—216. Author—Anantabhaṭṭa. Fifth stabaka only.

Beginning :

अथ सविधतपोघनैः कृताशीः
अमरपतेर्धृतशासनः स पार्थः ।
रयजितपवनं समातलिः सन्
रथमधिरुह्य मुदा दिवं प्रतस्थे ॥

End :

तत्तादृशो भगवतो वचसा निकाम
मासाद्य मोदभरमाश्रममागतानाम् ।
प्राप्तारणेर्द्विजवरस्य शुचेव साक-
मन्तं जगाम समयोऽपि महानमीषाम् ॥

Colophon :

इत्यनन्तभट्टस्य कृतौ चम्पुभारते पञ्चमस्तबकः समाप्तः ॥

Subject: Bhāratacampū. Fifth stabaka only.

Remarks:—The Ms. is in good condition.

॥ भारतचम्पूः ॥

4089. BHĀRATACAMPŪḤ.

J. L Collection No. 587. Substance—Paper. Size—9×4 inches. Sheets—14. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—300. Author—Anantabhaṭṭa. Fifth stabaka only.

Beginning, end, colophon and subject—Same as No. 4088.

Remarks:—The Ms. is in a fairly good condition.

॥ भारतचम्पूः ॥

4090. BHĀRATACAMPŪḤ.

Burnell's Catalogue No. 4703. Page 160. Left column. Substance—Paper. Size—14×6 inches. Sheets—7. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—150. Author—Anantabhaṭṭa. 6th stabaka only. (Wants end)

Beginning:

श्रीगणेशाय नमः ॥

तदनु ते भरता व्यवधाश्रया-
चरमहायनलङ्घनकाङ्क्षिणः ।
अतिचिरं रविभाण्डविवर्धिता-
ननुचरानिव तामटवीं जहुः ॥ १ ॥

End:

मानिनामचरमोऽथ सुशर्मा
मध्यवर्तिनमनीकपयोधेः ।
सन्मुखो झटिति बन्धमनैषीत्
सज्यया रिपुमपत्रपया च ॥

Colophon: Nil

Subject: Bhāratacampū 6th stabaka.

Remarks:—The Ms. is in a fairly good condition.

॥ भारतचम्पूः ॥

4091. BHĀRATACAMPŪḤ.

Burnell's Catalogue No. 10104. Page 160. Left column. Substance—Palm leaf. Size—14⅞ × 1⅛ inches. Leaves—45. Lines—4 to 6 to a Page. Script—Grantha. No. of Granthas—500. Author—Anantabhaṭṭa 6-8 stabakas.

Beginning—Same as No. 4090.

End:

इति वादिनो रविसुतस्य मानसं +
अनवाप्य काममियमेव केवलम् ॥

Colophon:

इत्यनन्तभट्टस्य कृतौ चम्पुभारते अष्टमस्तबकः ॥

Subject: Bhāratacampū 6-8 stabakas.

Remarks:—The Ms. is in a fairly good condition.

॥ भारतचम्पूः ॥

4092. BHĀRATACAMPŪḤ.

J. L. Collection No. 588. Substance—Paper. Size—9½ × 4½

inches. Sheets—11. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—160. Author—Anantabhaṭṭa. Eighth stabaka only.

Beginning:

तावत्पाण्डुसुतेन कौतुकवता कर्तुं प्रकोष्ठाङ्गणे+

प्रावृड्वासरसञ्चया इव घनैः प्रापुर्महाद्रेस्तटीम् ॥ १ ॥

End and colophon—Same as No. 4091.

Subject: Bhāratacampū. Eighth stabaka.

Remarks:—The Ms. is in a fairly good condition. After the colophon is given:—

'इद पुस्तकं मन्मथसंवत्सरे आषाढविशदेतरपक्षे चतुर्दश्यां तृतीय-प्रहरसमये वृकोपनाम्ना गङ्गाधरात्मजेन महादेवेन लिखितम् ॥

The Ms. was copied by Mahādeva, son of Gaṅgādhara, in the cyclic year Manmatha, Āṣāḍha month dark fortnight, and 14th day.

॥ भारतचम्पूः ॥

4093. BHĀRATACAMPŪḤ.

J. L. Collection No. 589. Substance—Paper. Size—$9\frac{1}{2}\times4\frac{1}{2}$ inches. Sheets—31. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—500. Ninth and Tenth stabakas only.

Beginning:

अथोभये ते कुरवो रणाय स्वनामधेयोपम(सुप्रसिद्धम् ।

क्षेत्रं व्यगाहन्त निरुद्धपार्श्वाः शतांगमातंगतुरङ्गयोधैः ॥

End:

धृतराष्ट्रसुतोऽपि गेहमागात् दिनदीपाङ्कुरदीनदीनदीप्तिः ।
शकलीकृतबाहुकर्णनासैः सहयोधैस्स घटोत्कचाश्मवर्षात् ॥ ९९ ॥

Colophon:

इत्यनन्तभट्टस्य कृतौ चम्पूभारते दशमस्तबकः ॥

Subject: Bhāratacampū. Tenth staba ka.

Remarks:—The Ms. is in a fairly good condition.

॥ भारतचम्पूः ॥

4094. BHĀRATACAMPŪḤ.

J. L. Collection No. 590. Substance—Paper. Size—9 × 4¼ inches. Sheets—6. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—96. Author—Anantabhaṭṭa. Seventh stabaka (Wants end).

Beginning:

आरूढे द्यामर्कबिंबेऽपरेद्युः
साकं सैन्यैस्सार्वभौमः कुरूणाम् ।
पार्थादेकां बिभ्रदाहृत्य गोत्रां
मात्स्यादन्यां तत्पुरं हर्तुमागात् ॥ १ ॥

End:

ततस्स बीभत्सुः परिषत्समानीतनिजवधूपरिभवानुरूपफलप्रदित्सयेव सारथिना * संजहार । अथ द्रशः परिमृज्य करां........ ॥

Colophon: Nil

Subject. Bhāratacampu. Seventh Stabaka.

Remarks:—The Ms. is in a fairly good condition.

॥ भारतचम्पूः ॥

4095. BHĀRATACAMPŪḤ.

T. S. Collection No. 598. Substance—Paper. Size—9¾ × 4½ inches. Sheets—6 (17-22). Lines—6 to a Page. Script—Devanāgarī. No. of Granthas—70. Author—Anantabhaṭṭa. Fragment.

Beginning:

......य प्राप्तेन्दीवरनित्यवासघटितश्यामप्रभा श्रीरिव ।

End:

बाहुप्रताप इव साक्षिणि हव्यवाहे सा... ॥

Colophon: Nil

Subject: Bhāratacampū. Second Stabaka.

Remarks:—The Ms is in a decaying condition.

॥ भारतचम्पूव्याख्या ॥

4096. BHĀRATACAMPŪVYĀKHYĀ.

Burnell's Catalogue No. 4705. Page 160. Left column. Substance—Paper. Size—10½ × 5 inches. Sheets—33. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—850. Author—Nṛsimhācārya. First stabaka only.

Beginning:

श्रीगणेशाय नमः ॥ श्रीगुरुभ्यो नमः ॥

कल्याणं वो विधत्तां + भूषाभुजङ्गम् ॥

करटयोर्गण्डस्थलयोः "काकेभगण्डौ करटौ" इत्यमरः। मदधुन्यां मदजलप्रवाहे लोलायां चञ्चलायां कल्लोलमालायां महातरङ्गपरम्परायां "अथोर्मिषु महत्सूल्लोलकल्लोलौ" इत्यमरः। खेलतां क्रीडतां लोलम्बानां भृङ्गाणां "द्विरेफ + पुष्पलिट् भृङ्गः" इत्यारभ्य "लोलम्बो बम्भरश्च सः" इत्यमरः। कोलाहलैः कलकलशब्दैः मुखरितस्य शब्दितस्य दिक्चक्रवालस्य दिङ्मण्डलस्य अन्तरालं मध्यदेशः यस्य तथोक्तम्। "चक्रवालंतुमण्डलम्" इत्यमरः। सततं परिचलद्भ्यामेव तालाभ्यां तालवृन्ताभ्यां व्यजनाभ्यामित्यर्थः। 'भीमो भीमसेनः' इति नामैकदेशे नामग्रहणम्। "व्यजनं तालवृन्तः स्यात्" इत्यमरः। प्ररोहतामुत्पाचिमतां वाताङ्कुराणां मन्दमारुतानामित्यर्थः। "अङ्कुरस्त्वङ्कुरस्तुल्यौ" इति सारस्वतः। आजिहीर्षया आहर्तुमिच्छया। दरं किञ्चिद्विवृता विस्तृता फणा स्फुटा यस्य सः दरविवृतफणः। "स्फुटायांतु फणाद्वयोः" इत्यमरः। आसमन्तादामूलाग्रमित्यर्थः। शृङ्गस्य विषाणस्य भूषारूपः सर्पः यस्य तथोक्तम्।

End:

पञ्चधा प्रवहन्तीनां पवनात्मज एव सः।
कौरवक्रोधसिन्धूनां क्रमात्सङ्गमभूरभूत् ॥ ८४ ॥

सः गजायुतबलशालित्वेन प्रसिद्धः पवनात्मजः भीम एव। पञ्चधा धर्मपुत्रादिषु पञ्चसु पञ्चप्रकारेण प्रवहन्तीनां कौरवादीनां दुर्योधनादीनां सम्बन्धिनीनां क्रोधसिन्धूनां कोपनदीनां क्रमात्सङ्गमभूर्मेलनभूमिरभूत्। धर्मपुत्रादिषु विद्यमानानां कोपानामपि भीम एव मुख्यपात्रमभूदित्यर्थः, प्रायेण भीमबलाश्रयत्वात्तेषामिति भावः ॥ ४ ॥

Colophon:

इत्यनन्तभट्टकृतौ चम्पूभारते सव्याख्यायां सरस्वतीविलाससमाख्यायां प्रथमस्तबकः समाप्तः ॥

Subject: Bhāratacampūvyākhyā. First stabaka.

Remarks:—The Ms. is in a fairly good condition. On the title page is given:

'गोविन्दपण्डितस्येदं पुस्तकम्'

This Ms. belonged to one Govindapaṇḍita.

॥ भारतचम्पूव्याख्या ॥

4097. BHĀRATACAMPŪVYĀKHYĀ.

Burnell's Catalogue No. 4706. Page 160. Left column. Substance—Paper. Size—$10\frac{1}{2} \times 5\frac{1}{2}$ inches. Sheets—32. Lines—10 to 13 to a Page. Script—Devanāgarī. No. of Granthas—850. Author—Nṛsimhācārya. First stabaka only. Complete.

Beginning, end, colophon and subject—Same as No. 4096.

Remarks:—The Ms. is in good condition. The text also is given

in this manuscript.

॥ भारतचम्पूव्याख्या ॥

4098. BHĀRATACAMPŪVYĀKHYĀ.

Burnell's Catalogue No. 4704. Page 160. Left column. Substance—Paper. Size—$10\frac{1}{4} \times 3\frac{1}{2}$ inches. Sheets—50. Lines—7 to 10 to a Page. Script—Devanāgarī. No. of Granthas—800. Author—Narasimhācārya. First stabaka (Wants end.)

Beginning—Same as No. 4096.

End:

दृशान्धः धृतराष्ट्रः पाण्डवेषु दृढतां दार्ढ्यञ्च ।
परिणाहः विशालता । "परिणाहो विशालता" इत्यमरः ।
प्रायः वयः । "प्रायो वयसि बाहुल्ये" इति वैजयन्ती ।
रूपञ्च बलञ्च ॥

Colophon: Nil.

Subject: Bhāratacampūvyākhyā. First stabaka.

Remarks:—The Ms. is in a fairly good condition.

॥ भारतचम्पूव्याख्या ॥

4099. BHĀRATACAMPŪVYĀKHYĀ.

Burnell's Catalogue No. 4698. Page 160. Left column. Substance—Paper. Size—$11\frac{1}{4} \times 5\frac{3}{8}$ inches. Sheets—40. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—880. Author—Nṛsimhācārya. Second stabaka only. (Wants end)

Beginning—Same as No. 4100.

End:

अनयोरिति । अनयोर्बलयोः सेनयोः महारथिकानां अवलोकाय दर्शनाय भेजुषामाकामाप्राणा(?) सुराणामप्सरसीणां पुरस्य द्रुपदनगरस्य ॥

Colophon:—Nil.

Subject: Bhāratacampūvyākhyā, Second stabaka.

Remarks:—The Ms. is in a fairly good condition.

॥ भारतचम्पूव्याख्या ॥

4100. BHĀRATACAMPŪVYĀKHYĀ.

Burnell's Catalogue No. 4697. Page 160. Left column. Substance—Paper. Size—$10\frac{1}{4} \times 5\frac{1}{4}$ inches. Sheets—84. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—1800. Author—Nṛsihmācārya. Stabakas 2, 3, 7 & 8.

Beginning:

श्रीगणेशाय नमः ॥

॥ एकदा त्वियति ॥ एकदा कदाचित्सुपर्वसरितो गङ्गायाः सलिलेषु विहृत्य क्रीडित्वा समुत्तीर्णास्तीरं प्राप्ताः । अनीचीभिः दीर्घाभिर्वीचीभिस्तरङ्गैरुत्कूलितेषु कूलं प्रापितेषु फेनकूटेषु फेनसमूहेषु फेनमयगृहेष्विव स्थितेषु । " गृहाः पुंसि च भूम्न्येव " इत्यारभ्य " वासः कूटो द्वयोः शाला "

इत्यमरः । पटगृहेषु वस्त्रमयगृहेषु । पटगृहवासेष्विति वा पाठः ॥

End:

॥ इतीति ॥ इत्युक्तप्रकारेण वादिनो वदतो रविसुतस्य कर्णस्य मानसं मनः धृतराष्ट्रनन्दनात् दुर्योधनान्न निवर्तते स्म । अपि तु महाभुजाच्छूरात् स्वकीयतनयात् कर्णात् कामं कर्णनिवर्तनरूपं मनोरथमनवाप्यालब्ध्वा इयं कुन्ती केवलं कुन्तीमात्रं निवर्तते स्म । स्वगृहं प्रति निवृत्ता ॥ ७८ ॥ ८२ ॥

Colophon:

इति श्रीकौशिककुलभूषणश्रीनृसिंह्माचार्यनाम्नः सत्कुमारस्य कृतौ भारतचम्पूव्याख्यायां सरस्वतीविलाससमाख्यायामष्टमस्तबकः समाप्तः ॥

अष्टमस्तवकव्याख्यानं सम्पूर्णम् ॥

Subject: Bhāratacampūvyākhyā otherwise known as Sarasvatīvilāsa 2, 3, 7 & 8 stabakas. Stabakas 2 & 3 are incomplete.

Remarks:—The Ms. is in a fairly good condition.

The colophon of the 7th stabaka reads as follows:

इति कौशिककुलकलशपारावारशरद्राकाचन्द्रस्य श्रीमद्वेदान्तदेशिकतनयस्य श्रीनृसिंह्माचार्यस्य कृतिषु, भारतचम्पूव्याख्यायां सरस्वतीविलाससमाख्यायां सप्तमः स्तबकः समाप्तः ॥

॥ भारतचम्पूव्याख्या ॥

4101. BHĀRATACAMPŪVYĀKHYĀ.

Burnell's Catalogue No. 4700. Page 160. Left column. Substance—Paper. Size—11 × 4¾ inches. Sheets—46. Lines—5 to 9 to a Page. Script—Devanāgarī. No. of Granthas—644. Author—Nṛsimhācarya. Seventh stabaka only.

Beginning:

श्रीगणेशाय नमः ॥

आरूढ इति। अपरेद्युः अर्कबिम्बे सूर्यबिम्बे धामाकाश-मारूढे प्राप्ते सतीत्यर्थः। कुरूणां सार्वभौमो दुर्योधनः सैन्यैः साकं सेनासमूहः सह ॥

End:

अथेति। अथाभिमन्युविवाहानन्तरं हरिः कृष्ण एतान् कुरून् पाण्डवान् उल्लास्य सन्तोष्य मन्दारप्रमुखान् कल्पान् कल्पकवृक्षान् उल्लास्य विकासयित्वा नन्दनवनात् वसन्त इव मत्स्यपुरात्प्रययौ द्वारकां प्रति ययौ ॥

Colophon:

इति कौशिककुलकलशपारावारशरद्राकाचन्द्रस्य श्रीमद्वेदान्तदेशिकतनयस्य श्रीनृसिंहाचार्यस्य कृतिषु भारतचम्पूव्याख्यायां सरस्वतीविलाससमाख्यायां सप्तमस्तबकः समाप्तः ॥

Subject: Bhāratacampūvyākhyā, otherwise known as Sarasvatīvilāsa. Seventh stabaka.

Remarks—The Ms. is in a fairly good condition. The text also is given in this Ms. in the middle of every page.

॥ भारतचम्पूव्याख्या ॥

4102. BHĀRATACAMPŪVYĀKHYĀ.

Burnell's Catalogue No. 4701. Page 160. Left column. Substance—Paper. Size—11¼×6 inches. Sheets—46. Lines—1-6 to a Page. Script—Devanāgarī. No. of Granthas—400. Author—Nṛsimhācārya. Eighth stabaka only.

Beginning:

॥ तावदिति ॥ तावद्विराटनगरावस्थितिसमये युधि । प्रकोष्ठाङ्गणे विस्तृतकरे, "प्रकोष्ठो विस्तृतकरः" इत्यमरः । एकां ज्यामौर्वीं नर्तकीं नर्तनवतीम् ॥

End and colophon—Same as No. 4100.

Subject: Bhāratacampūvyākhyā. Eigth stabaka.

Remarks:—The Ms. is in a fairly good condition. Enough space is left blank in the middle of every page, to be filled in evidently by the text.

॥ भारतचम्पूव्याख्या ॥

4103. BHĀRATACAMPŪVYĀKHYĀ.

Burnell's Catalogue No. 4707. Page 160. Left column. Substance—Paper. Size—10½×5 inches. Sheets—17. Lines—12 to 13 to a Page. Script—Devanāgarī. No. of Granthas—450. Author—Nṛsimhācārya. 10th stabaka only.

Beginning:

॥ मू ॥ अन्येद्युरविलम्बितप्रथमशिखरिसानौ भानौ

+ क्षोभयामास ॥

॥ व्या ॥ अन्येद्युः भानौ सूर्ये अवलंबितः प्राप्तः प्रथम- शिखरिणि उदयपर्वतस्य सानुः शृङ्गं येन तथोक्ते सति ॥

End:

॥ मू ॥ धृतराष्ट्रसुतोऽपि गेहमागात् + अश्मवर्षात् ॥

॥ व्या ॥ स धृतराष्ट्रसुतः दुर्योधनोऽपि दिनदीपाङ्कुरवत् मध्याह्नदीपवत् दीनदीनदीप्तिरत्यन्तदीनकान्तिः लुप्ततेज- स्कः सन् घटोत्कचस्याश्मवर्षाच्छिलावर्षात् शकलीकृताः बाहुकर्षनाम्ना येषान्तथोक्तैः योधैः भटैः सह गेहं स्वाशि- बिरमागात् प्राप्तः ।

Colophon:

इति + दशमस्तबकः समाप्तः ॥

Subject: Bhāratacampūvyākhyā. Tenth stabaka only.

Remarks: The Ms. is in a fairly good condition.

॥ भारतचम्पूव्याख्या ॥

4104. BHĀRATACAMPŪVYĀKHYĀ.

Burnell's Catalogue No. 4708. Page 160. Left column. Substance—Paper. Size—10¼ × 5½ inches. Sheets—18. Lines—12-14 to a Page. Script—Devanāgarī. No. of Granthas—450. Author—Nṛsimhācārya. Eleventh stabaka only. (Wants end)

Beginning:

॥ मू ॥ अन्येद्युराब्धिमिलितैः + वारिभिरभ्यषिञ्च- त् ॥ १ ॥

॥ व्या ॥ द्रोणयुद्धानन्तरं कर्णयुद्धं वर्णयति । अन्येषु-
रह्विना मिलितैः सङ्गतैः ॥ असृगापगानां रक्तनदीनां
पूरैः प्रवाहैरिव शोणिताङ्ग
आरक्तशरीरे पूषणि......

End:

॥ मू ॥ कर्णेऽथ कर्णेन्द्रियपात्रमात्रे + हृदयञ्ज-
नस्य

॥ व्या ॥ अथ कर्णे कर्णेन्द्रियपत्रस्य(?)पात्रे "योऽग्यभाः जनयो पात्रम्" इत्यमरः । शब्दमात्रेण शिष्टे सतीत्यर्थः * शोकसागरे ममज्ज, मग्नः ॥ कर्णवधेन दुर्योधनस्त्वतिशोकयुक्तोऽभूदिति भावः ॥ ५९ ॥

Colophon: Nil.

Subject: Bhāratacampūvyākhyā, otherwise known as Sarasvatīvilāsa. Eleventh stabaka.

Remarks:—The Ms. is in good condition.

॥ भारतचम्पूव्याख्या ॥

4105. BHĀRATACAMPŪVYĀKHYĀ.

Not noticed by Burnell. Ms. No. 15537.

Substance—Paper. Size—$17\frac{7}{8}\times 4$ inches. Sheets—4. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—80. Author—Nṛsimhācārya. Fragment only.

Beginning:

श्रीः ॥ एकदेति ॥ उत्कलिताः कुलादुभवीकृताः

अभ्यवहाराः भक्षणार्हपदार्थाः । "कलशीवाद्यभेदे च"

इति पदार्णवः । वीणाविशेष इति केचित् ॥

End:

लासको नर्तकः । अमुना हिडिम्बेन मा । इति निषेधे ।

उपयमो विवाहः ॥

Colophon : Nil.

Subject : Bhāratacampūvyākhyā, only a fragment of the second stabaka.

Remarks : —The Ms. is in a fairly good condition.

॥ मारुतिविजयचम्पूः ॥

4106. MĀRUTIVIJAYACAMPŪḤ.

P. A. Collection No. 338. Substance—Paper. Size—$8\frac{1}{2} \times 5\frac{1}{4}$ inches. Sheets—66. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—1250. Author—Raghunātha. Complete.

Beginning:

श्रीगणेशाय नमः ॥

श्रीमानेष सुधांशुमौलितनुजो रम्यद्विपेन्द्राननः
प्रत्यूहाचलभेदिपादकुलिशो दीर्घैकदन्तोज्वलः ।
दैतेयौघतमस्सहस्रकिरणो वन्दारुकल्पद्रुमो
हेरम्बः कृपया हिमाद्रितनयासंलालितः पातु नः ॥ १ ॥

समीरवेगं कुशकोटिबुद्धिं सीतासुतं राक्षसवंशकालम् ।
नयाकरं नन्दितरामभद्रं नित्यं हनूमन्तमहं नमामि ॥ २ ॥

श्रोतृश्रवस्सुखविधायिपुराणवेद्य-

रामाभिधानकथनेन नितान्तपूता ।

जिह्वा दधातु रघुनायकदूतवृत्तं

कान्तार्थगर्भपदमण्डितपद्यगद्यम् ॥ ३ ॥

चूर्णान्तरस्तबकसप्तविभज्यमानं

षट्त्रिंशदुत्तरचतुश्शतपद्यपूर्णम् ।

चंपुं परं सकलदेशनिवासि धीराः

पश्यन्तु यान्तु च मुदं विधुताभ्यसूयाः ॥ ४ ॥

सारेण हीनमपि पद्यमयोक्तिजालं

जिज्ञासितव्यमवनौ विबुधैर्मनोज्ञम् ।

बालस्य लालनरतस्य पयःप्रियस्य

शृण्वन्ति वाचमतीमपि(?)सादरं हि ॥ ५ ॥

काचिद्दिनेशान्वयसंभवानां

महात्मनां शौर्यवतां रघूणाम् ।

त्रिविष्टपस्य प्रतियातमेव

राज्ञामयोध्यास्ति महीतले पूः ॥ ६ ॥

End:

सुग्रीवप्रमुखेषु तेषु बलिषु प्राप्तेषु सर्वेष्वथ

स्वस्वस्थानमदभ्रसंभवगुणैर्युक्तु(?)द्विषां ध्वंसतः ।

वज्रीव त्रिदशालयं धनपतिः शूरोऽलकापत्तनं

रामः पालयति स्म विष्टपमिदं जुष्टाज्ञामिश्रार्थिनः ॥ २७ ॥

..................रघुपतेर्दूतोत्तमो नायको
मुख्यो वीररसो विशन्त्यवयवाः शृङ्गारहास्यादयः ।
वातापत्यचरित्ररत्नघटितं तं चंपुमुक्तासरं
रामायैव समर्पयामि मम हृत्सिंहासनाध्यासिने ॥ ३८ ॥

श्रीरामः शरणं ममेति वदतां संपत्समृद्धिर्भवेत्
कुर्याद्वर्षगणैः परं जलधरः संपन्नसस्यां भुवम् ।
लोकास्सन्तु गतव्यथाः कुशलिनस्तन्वन्तु यागादिकाः
व्यासेयं (?) रघुनाथपण्डितकृतिः जीयाज्जगत्यां चिरम् ॥३९॥

Colophon:

इति श्रीरघुनन्दनपदारविन्दवन्दनकन्दलितसाहित्यसनाथेन रघुनाथेन विरचिते मारुतिविजयचम्पुकाव्ये रामपट्टाभिषेको नाम सप्तमस्तबकः ॥ ७ ॥

मारुतिविजयचम्पूः समाप्तिमगमत् ॥

हरिः ॐ । श्लोकसंख्या ३५ गद्यसंख्या ४ ॥ समग्रसंख्या ३९ ॥

श्रीरामचन्द्रपरब्रह्मणे नमः

लिखितं पुस्तकमिदं वामनाख्येन मौनिना ।
यदि शुद्धमशुद्धं वा विद्वाद्भिः परिशोधयेत् (?) ॥

॥ चाटुश्लोकः ॥

कांतासु त्रिजगद्विमोहयति कः तं को ददाह स्फुटं
तस्मात्किन्दितिजा ययुः करिवरं को नक्रदष्टं पपौ ।
गंगां को नु भगीरथेन चलितां कस्मिन्प्रियं वज्रिणो
यत्प्रश्नोत्तरपूर्ववर्णघटितं काव्याभिधानं विदुः ॥

Subject: Mārutivijayacampū 1-7 stabakas.

Remarks:—The Ms. is in good condition. The Ms. is written in a very neat hand.

On the title sheet is given the following:—

श्रीरस्तु श्रीमन्निखिलाध्येतृजनानां नितान्तोपकाराय चमत्कारोत्पादकविविधगद्यपद्यनिर्माणचातुरीधुरीणेन हरितसगोत्रपयः पारावारसुधाकरेण **कुप्पाभट्टरघुनाथेन** विरचितं विबुधशिरोमणिभिः दर्शं दर्शं कृतसंशोधनम् मारुतिविजयं नाम सलक्षणमिदं चम्पुकाव्यं चान्द्रबार्हस्पत्यमानाभ्यां शुक्लवृषनामसंवत्सरचैत्रशुद्धत्रयोदश्याम-धिगुरुवासरं श्रीकाश्यां बालवंदालिप्यां विद्वन्मुदे वामनभट्टाचार्येण प्रकटितमभूत् ॥

In the beginning of this Ms. is given the kathānukarmaṇikā of the seven stabakas.

The author of this work is one Raghunātha. The work deals with the story of the Rāmāyaṇa,—the part played by Hanuman in the rescue of Sītā. The work has not been printed so far, though the title page of this Ms. leads us to think that the work should have been published (not printed) at Benares.

॥ रामायणचम्पूः ॥

4107. RĀMĀYAṆACAMPŪḤ.

Burnell's Catalogue No. 4693. Page 161. Right column.

Substance—Paper. Size—$13\frac{7}{8}\times 6$ inches. Sheets—51. Lines—10 to a Page. Script—Devanāgarī. No. of Gran-

thas—1530. Author—Bhojā and Lakśmaṇasūri. Complete. Kāṇḍas I-VI.

Beginning:

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥

श्रीगुरुभ्यो नमः ॥ श्रीरस्तु ॥

लक्ष्मीं तनोतु नितरामितरानपेक्ष-
मङ्घ्रिद्वयं निगमशाखिशिखाप्रवालम् ।
हैरम्बमम्बुरुहडम्बरचौर्यनिघ्नं
विघ्नाद्रिभेदशतधारधुरन्धरं नः ॥ १ ॥

वन्दे वेतण्डवदनं यच्छुण्डालीलयोद्धृता ।
ब्रह्माण्डमण्डपारम्भस्तम्भतां लभते क्षणम् ॥ २ ॥

वन्दामहे महेशानचण्डकोदण्डखण्डनम् ।
जानकीहृदयानन्दचन्दनं रघुनन्दनम् ॥ ३ ॥

उच्चैर्गतिर्जगति सिध्यति धर्मतश्चे-
त्तस्य प्रमा च वचनैः कृतकेतरैश्चेत् ।
तेषां प्रकाशनदशा च महीसुरैश्चे-
त्तानन्तरेण निपतेत्क नु मत्प्रणामः ॥ ४ ॥

End:

किं बहुना ।
देव तस्याः प्रतिष्ठाम्लनसूनाशैकपालितान् ।
मुद्रयित्वा प्रपन्नोऽहं त्वदभिज्ञानमुद्रया ॥ ७७ ॥

Colophon:

इति श्रीविदर्भराजविरचिते चम्पूरामायणे सुन्दरकाण्डः समाप्तः ।

श्रीरामचन्द्रार्पणमस्तु ॥

Beginning: (of the Yuddhakāṇḍa portion.)

यस्य सम्पर्कमात्रेण नारीरत्नमभूच्छिला ।
यदुपास्यं सुमनसां तद्द्वन्द्वमहमाश्रये ॥ १ ॥

दृष्टे यत्र यदृच्छया च वचसां देवी पुरो वर्तते
सारस्यं महदभ्युदेति सदसि प्रागल्भ्यमुज्जृम्भते ।
जायन्ते सकलाः कला अपि नृणां जागर्ति कीर्तिर्नवा
चेतः स्निह्यति तत्र देशिकपदाम्भोजे च भोजे मम ॥ २ ॥

भोजेन तेन रचितामपि पूरयिष्य-
न्नल्पीयसा च वचसा कृतिमभ्युदाराम् ।
न व्रीडितोऽहमधुना नवरत्नहार-
सङ्गेन किन्तु हृदि धार्यत एव तन्तुः ॥ ३ ॥

* * *

End:

साहित्यादिकलावताशनगरग्रामावतंसायित-
श्रीगङ्गाधरदुग्धसिन्धुविधुना गङ्गाम्बिकासूनुना ।
भोजा[धि]बोधितपञ्चकाण्डविहितानन्दे प्रबन्धे पुनः
काण्डो लक्ष्मणसूरिणा विरचितः षष्ठोऽपि जीयाच्चिरम् ॥

Colophon:

श्रीचम्पूरामायणे लक्ष्मणसूरिणा विरचितो युद्धकाण्डः
समाप्तः ॥

श्रीरामचन्द्रार्पणमस्तु ॥

Subject : Rāmāyaṇacampū Kāṇḍas 1-6.

Remarks:—The Ms. is in an excellent condition. It is well known that Bhoja wrote up to the end of the Sundara Kāṇḍa alone. Several writers completed the work, of whom the famous one is Lakṣmaṇa. The Nirṇayasāgara Edition consists of Bhoja's and Lakṣmaṇa's. Almost all the Mss. contain Bhoja's and Lakṣmaṇa's together.

॥ रामायणचम्पूः ॥

4108. RĀMĀYAṆACAMPŪḤ.

Burnell's Catalogue No. 4682. Page 161. Right column. Substance—Paper. Size—$9\frac{3}{10} \times 4$ inches. Sheets—84. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—1578. Author—Bhoja. Complete.

Beginning, end, colophon and subject—Same as No. 4107.

Remarks:—The Ms. is in good condition. There is a stray śloka on the 14th sheet after the colophon of the Bālakāṇḍa.

जननी जानकी साक्षाज्जनको रघुनन्दनः ।
रक्षणाय स्थितौ तौ मे को विचारः कुतो भयम् ॥

॥ रामायणचम्पूः ॥

4109. RĀMĀYAṆACAMPŪḤ.

Burnell's Catalogue No. 4690. Page 161. Right column. Substance—Paper. Size—$8\frac{1}{4} \times 4\frac{3}{8}$ inches. Sheets—52. Lines—11 to a Page. Script—Devanāgarī. No. of

Granthas—1150. Author—Bhoja. 1-5 Kāṇḍas (Wants end).

Beginning—Same as No. 4107.

End:

प्रेह्वन्ती पिशिताशया रणमुखे सौमित्रिपत्त्रिक्षत-

* * * *

कान्तानां नयनान्तवान्तसलिलं माभून्निवापोदकम् ॥

वरदारोऽपि परदारपरिग्र.................... ॥

Colophon: (sheet 44)

इति विदर्भराजविरचिते चम्पूरामायणे श्रीमत्किष्किन्धाकाण्डः ।

Subject: Rāmāyaṇacampū 1-5 Kāṇḍas.

Remarks:—The Ms. is in a fairly good condition.

॥ रामायणचम्पूः ॥

4110. RĀMĀYAṆACAMPŪḤ.

Burnell's Catalogue No. 4692. Page 161. Right column. Substance—Paper. Size—8×5 inches. Sheets—73. Lines—8 to 10 to a Page. Script—Devanāgarī. No. of Granthas—1200. Author—Bhoja 1-5 Kāṇḍas only.

Beginning—Same as No. 4107.

End and colophon—Same as No. 4113.

Subject: Rāmāyaṇacampū. 1-5 Kāṇḍas.

Remarks:—The Ms. is in good condition. Each kāṇḍa is paged separately.

॥ रामायणचम्पूः ॥

4111. RĀMĀYAṆACAMPŪḤ.

Burnell's Catalogue No. 10091. Page 161. Right column. Substance—Palm leaf. Size—16×1½ inches. Leaves—59. Lines—6 to 8 to a Page. Script—Telugu. No. of Granthas—1530. Author—Bhoja and Lakṣmaṇakavi. Complete.

Beginning, end, colophon and subject—Same as No. 4107.

Remarks :—The Ms. is in a fairly good condition. On the last leaf is givin the following:

श्रीमत्साम्बसदाशिवस्य मनिशं(?) पादारविन्दद्वयं

ध्यायन्नेष परं सुखेन भवसत्पुर्याश्रशेखर्यके(?) ।

श्रीमद्राघवभट्टसूरितनुजः ख्यातः परं शङ्करः

स....पद्यपरेविलिख्य जयति श्रीरामसंकीर्तनम् ॥

श्रीदक्षणामूर्तये नमः ॥

॥ रामायणचम्पूः ॥

4112. RĀMĀYAṆACAMPŪḤ.

Burnell's Catalogue No. 4683. Page 161. Right column. Substance—Paper. Size—9½×4⅛ inches. Sheets—37. Lines—7 to 10 to a Page. Script—Devanāgarī. No. of Granthas—575. Author—Bhoja, 1 and 2 Kāṇḍas only.

Beginning—Same as No. 4107.

End:

खण्डनाय वसुधात्रधूमनःपुण्डरीकतुहिनाद्विषां द्विषाम् ।

दण्डकावनमवाप राघवश्चण्डभानुरिव मेघमण्डलम् ॥

Colophon:

इति श्रीविदर्भराजविरचिते चम्पूरामायणे अयोध्याकाण्ड:

समाप्त: ॥

Subject: Rāmāyaṇacampū Bālakāṇḍa and Ayodhyākāṇḍa.

Remarks:—The Ms. is in a fairly good condition.

॥ रामायणचम्पूः ॥

4113. RĀMĀYAṆACAMPŪḤ.

Burnell's Catalogue No. 4684. Page 161. Right column. Substance—Paper. Size—$10\frac{1}{4} \times 3\frac{1}{2}$ inches. Sheets—44. Lines—7 to 9 to a Page. Script—Devanāgarī. No. of Granthas—600. Author—Bhoja. 3 to 5 Kāṇḍas only.

Beginning:

श्रीरामाय नमः ॥

प्रविश्य विपिनं महत्तदनुमैथिलीवल्लभो

महाबलसमन्वितश्चलितनीलशैलच्छविः ।

निशाचरदवानलप्रशमनं विधातुं शरैः

चचार सशरासनः सुरपथे तडित्वानिव ॥

End:

देव्यास्तस्याः प्रतिष्ठाप्नमनप्नाशैकपालितान् ।

मुद्रयित्वा प्रपन्नोऽहं त्वदभिज्ञानमुद्रया ॥

Colophon:

इति विदर्भराज + सुन्दरकाण्डः समाप्तः ॥

Subject: Rāmāyaṇacampū. 3 to 5 Kāṇḍas.

Remarks:—The Ms. is in good condition. On the title page is given:—

वरखेडि रङ्गचार्यरदु चम्पूरामायणम् ॥

॥ रामायणचम्पूः ॥

4114. RĀMĀYAṆACAMPŪḤ.

Burnell's Catalogue No. 10092 b. Page 161. Right column. Substance—Palm leaf. Size—15×1⅛ inches. Leaves—97. Lines—6 to a Page. Script—Grantha. No. of Granthas 1500. Author—Bhoja and Lakṣmaṇakavi. 1—6 Kāṇḍas.

Beginning—Same as No. 4107.

End :

प्रवर्त्यमानश्वेताक्षतकुसुमलाजोपचारपौरपुरन्ध्रीकदम्बसं-
रम्भवलितमञ्जरीमाणि............ ॥

Colophon: (Leaf 18)

किष्किन्धाकाण्डं समाप्तम् ॥

Subject: Rāmāyaṇacampū. 1—6 Kāṇḍas.

Remarks:—The Ms. is in a fairly good condition.

॥ रामायणचम्पूः ॥

4115. RĀMĀYAṆACAMPŪḤ.

Burnell's Catalogue No. 10093. Page 161. Right column. Substance—Palm leaf. Size—16×1¼ inches. Leaves—61 (72-132). Lines—5 or 6 to a Page. Script—Telugu.

No. of Granthas—1400. Author—Bhoja. Complete. 1-6 Kāṇḍas (Wants end).

Beginning—Same as No. 4107.

End.

आर्यस्य + इन्त सहते... ॥

Colophon:

इति विदर्भराजविरचिते श्रीमति विचित्रतरे चम्पूरामायणे सुन्दर-काण्डः समाप्तः ॥

Subject: Rāmāyaṇacampū 1—6 Kāṇḍas.

Remarks:—The Ms. is in a fairly good condition.

॥ रामायणचम्पूः ॥

4116. RĀMĀYAṆACAMPŪḤ.

Burnell's Catalogue No. 10094. Page 161. Right column. Substance—Palm leaf. Size —$14\frac{1}{2} \times 1\frac{1}{4}$ inches. Leaves—67. Lines—5 to 7 to a Page. Script—Grantha. No. of Granthas—1500. Author—Bhoja and Lakṣmaṇakavi. 1-6 Kāṇḍas only. (Wants end)

Beginning—Same as No. 4107.

End:

रहस्तदानीं रजनीचरेन्द्रः
प्रहस्तपूर्वानिदमाबभाषे ।
इदन्तु मे वाञ्छितमीप्सितं वो
वदन्तु यद्वैरिजनोचितं नः ॥

Colophon: (Leaf No. 64)

इति विदर्भराजविरचिते चम्पूरामायणे सुन्दरकाण्डः समाप्तः ॥

Subject: Rāmāyaṇacampū. 1-6 Kāṇḍas.

Remarks:—The Ms. is in a fairly good condition.

॥ रामायणचम्पूः ॥

4117. RĀMĀYAṆACAMPŪḤ.

Burnell's Catalogue No. 4685. Page 161. Right column. Substance—Paper. Size—$10\frac{1}{8} \times 4\frac{1}{2}$ inches. Sheets—48. Lines—9 to 10 a Page. Script—Devanāgarī. No. of Granthas—950. Author—Bhoja. 1—4 Kāṇḍas only.

Beginning—Same as No. 4107.

End:

इत्थं जाम्बवता परापरविदा सन्धुक्षितप्राभवः
कृत्वा वृद्धिमुपेयुषा स्ववपुषा त्रैविक्रमं विक्रमम् ।
आरुह्याद्रितटं यथोचितमसौ सम्मान्य सेनाधिपान्
आसन्नानथसन्ननाह तरितुं वारांनिधिं मारुतिः ॥ ४६ ॥

Colophon:

इति श्रीविदर्भराज + किष्किन्धाकाण्डः समाप्तः ॥

Subject: Rāmāyaṇacampū. 1—4 Kāṇḍas.

Remarks:—The Ms. is in good condition.

॥ रामायणचम्पूः ॥

4118. RĀMĀYAṆACAMPŪḤ.

Burnell's Catalogue No. 10096. Page 161. Right column. Substance—Palm leaf. Size—$16\frac{1}{4} \times 1\frac{1}{4}$ inches. Leaves—

28. Lines—4 or 5 to a Page. Script—Telugu. No. of Granthas—450. Author—Bhoja 1 & 2 Kāṇḍas only.

Beginning—Same as No. 4107.

End:

आबालवृद्धमनुगच्छति रामभद्र

मेषा पुरी तदिह मा खलु निर्गुणा स्याम् ।

इत्या.................. .... ॥

Colophon: (Leaf 17)

इति चम्पूरामायणे बालकाण्डः समाप्तः ॥

Subject: Rāmāyaṇacampū. I & II Kāṇḍas.

Remarks:—The Ms is in a fairly good condition.

॥ रामायणचम्पूः ॥

4119. RĀMĀYAṆACAMPŪḤ.

Burnell's Catalogue No. 4686. Page 161. Right column. Substance—Paper. Size—$8\frac{1}{4} \times 4\frac{1}{8}$ inches. Sheets—35. Lines—6 to 8 to a Page. Script—Devanāgarī. No. of Granthas—300 Author—Bhoja. First kāṇḍa only.

Beginning—Same as No. 4107.

End:

लज्जावशादविदितस्मरविक्रियाभिः

ताभिर्वधूभिरतिवेलमवाप्तसौख्यान् ।

इक्ष्वाकुनाथतनयान् प्रथमो रसानां

तारुण्ययोगचतुरः चतुरः सिषेवे ॥

विद्ययेव त्रयीदृष्ट्या दर्भपत्राग्रधीः सुधीः ।
राजपुत्र्या तया रामः प्रपेदे प्रीतिमुत्तमाम् ॥

Colophon:

इति चम्पूरामायणे बालकाण्डे विदर्भराजविरचिते ग्रन्थः समाप्तः ॥

Subject:—Rāmāyaṇacampū, Bālakāṇḍa.

Remarks:—The Ms. is in a fairly good condition.

॥ रामायणचम्पूः ॥

4120. RĀMĀYAṆACAMPŪḤ.

Burnell's Catalogue No. 4687. **Page** 161. Right column. **Substance**—Paper. **Size**—$7\frac{1}{8} \times 4\frac{1}{2}$ inches. **Sheets**—22. Lines—11 to 12 to a Page. Script—Devanāgarī. No. of Granthas—250. Author—Bhoja. First Kāṇḍa only. (Wants end)

Beginning—Same as No. 4107.

End:

नूनं जनेन पुरुषे महति प्रयुक्त-
मागः परं तदनुरूपफलं विधत्ते ।
कृत्वा रघूद्वहगतेः क्षणमन्तरायं
यद्भार्गवः परगतेर्विहतिं प्रपेदे ॥

अथ सक्रान्तया जामदग्निशक्ति..........

Subject: Rāmāyaṇacampū, Bālakāṇḍa.

Remarks:—The Ms. is in a fairly good condition.

॥ रामायणचम्पूः ॥

4121. RĀMĀYAṆACAMPŪḤ.

Burnell's Catalogue No. 4888. Page 161. Right column. Substance—Paper. Size—$9\frac{1}{2} \times 4\frac{7}{8}$ inches. Sheets—11. Lines—8 to 10 to a Page. Script—Devanāgarī. No. of Granthas—132. Author—Bhoja. First Kāṇḍa only. (Wants end)

Beginning—Same as No. 4107.

End:

अथ मिथिलां प्रति प्रास्थितः कौशिकः काकुत्स्थयोरि-
त्थमेकथयत । पुरा खलु कुशेशयासनजन्मा कु… ॥

Subject: Rāmāyaṇacampū. Bālakāṇḍa.

Remarks:—The Ms. is in a fairly good condition.

॥ रामायणचम्पूः ॥

4122. RĀMĀYAṆACAMPŪḤ.

Burnell's Catalogue No. 4689. Page 161. Right column. Substance—Paper. Size—$10\frac{1}{2} \times 4\frac{1}{4}$ inches. Sheets—11. Lines—9 to 11 to a Page. Script—Devanāgarī. No. of Granthas—260. Author—Bhoja. First kāṇḍa only (Wants end)

Beginning—Same as No. 4107.

End:

यस्याः पृथ्व्या वसनमुदधिः पीठिका हाटकाद्रिः
हारः सिन्धुः सगरतनयः स्वर्गमार्गैकबन्धुः ।

क्रीडाशैलः परमपुरुषक्रोडदंष्ट्रा च यस्याः

सीतामातुर्जगति मिथिलां सूतिकागेहमाहुः ॥ १०० ॥

Subject: Rāmāyaṇacampū. Bālakāṇḍa.

Remarks:—The Ms. is in a fairly good condition.

॥ रामायणचम्पूः ॥

4123. RĀMĀYAṆACAMPŪḤ.

Burnell's Catalogue No. 10092 a. Page 161. Right column. Substance—Palm leaf. Size—15×1 inches. Leaves—25 (1-25). Lines—5 to a Page Script—Grantha. No. of Granthas—250. Author—Bhoja. First Kāṇḍa only.

Beginning, end, colophon and subject—Same as No. 4119.

Remarks:—The Ms. is in a decying condition. The other work contained in this Ms. is Rāmāyaṇacampū, Kāṇḍas 1-6.

॥ रामायणचम्पूः ॥

4124. RĀMĀYAṆACAMPŪḤ.

Burnell's Catalogue No. 10095. Page 161. Right column. Substance—Palm leaf. Size—$15\frac{1}{4}\times1\frac{1}{8}$ inches. Leaves—17. Lines—5 or 6 to a Page. Script—Grantha. No. of Granthas—200. Author—Bhoja. First Kāṇḍa only. (Wants end)

Beginning—Same as No. 4107.

End:

अजीजनत्कन्यारत्नं रत्नगर्भा भगवती ।

अस्याः पुरः पुनर्माहात्म्यम्........ ॥

Subject: Rāmāyaṇācampū. Bālakāṇḍa.

Remarks:—The Ms. is in a decaying condition.

There are a few fragmentary leaves in the beginning which seem to be a portion of some other work.

॥ रामायणचम्पूः ॥

4125. RĀMĀYAṆACAMPŪḤ.

J. L. Collection No. 591. Substance—Paper. Size—11×4 inches. Sheets—16. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—500. Author—Bhoja. First Kāṇḍa only.

Beginning, end, colophon and subject—Same as No. 4119.

Subject: Rāmāyaṇacampū. The beginning of the Ayodhyākāṇḍa is also found in this Ms.

Remarks:—The Ms. is in a fairly good condition.

॥ रामायणचम्पूः ॥

4126. RĀMĀYAṆACAMPŪḤ.

T. S. Collection No. 702. Substance—Paper. Size—$10\frac{1}{8} \times 4\frac{3}{4}$ inches. Sheets—22. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—350. Author—Bhoja. First kāṇḍa only.

Beginning, end, colophon and subject—Same as No. 4119.

Remarks:—The Ms. is in a very decaying condition.

॥ रामायणचम्पूः ॥

4127. RĀMĀYAṆACAMPŪḤ.

Burnell's Catalogue No. 4691, Page 161. Right column. Substance—Paper. Size—10½ × 3⅞ inches. Sheets—25. Lines—7 to 10 to a Page. Script—Devanāgarī. No. of Granthas—300. Author—Bhoja. Second Kāṇḍa only.

Beginning:

गच्छता दशरथेन निर्वृतिं

भूभुजामसुलभां भुजाबलात् ।

मातुलस्य नगरे युधाजितः

स्थापितौ भरतलक्ष्मणानुजौ ॥

End and colophon—Same as No. 4112.

Subject: Rāmāyaṇacampū. Ayodhyākāṇḍa.

Remarks:—The Ms. is in a fairly good condition.

॥ रामायणचम्पूः ॥

4128. RĀMĀYAṆACAMPŪḤ.

T. S. Collection No. 703. Substance—Paper. Size—11 × 3⅞ inches. Sheets—24. Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—300. Author—Bhoja. Second Kāṇḍa only.

Beginning, end, colophon and subject—Same as No. 4127.

Remarks:—The Ms. is in a decaying condition.

॥ रामायणचम्पूः ॥

4129. RĀMĀYAṆACAMPŪḤ.

P. A. Collection No. 332. Substance—Paper. Size—$10\frac{5}{8} \times 4\frac{5}{8}$ inches. Sheets—16. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—300. Author—Bhoja. Ayodhyākāṇḍa only.

Beginning end colophon and subject—Same as No. 4127.

Remarks:—The Ms. is in a fairly good condition.

॥ रामायणचम्पूः ॥

4130. RĀMĀYAṆACAMPŪḤ.

J. L. Collection No. 592. Substance—Paper. Size—$10\frac{1}{2} \times 3\frac{7}{8}$ inches. Sheets—14. Lines—7 or 8 to a Page. Script—Devanāgarī. No. of Granthas—150. Author—Bhoja. Āraṇyakāṇḍa only.

Beginning:

प्रविश्य विपिनं.........

End:

सप्राणाचेज्जनक.......... ॥

Colophon: Nil.

Subject: Rāmāyaṇacampū. Āraṇyakāṇḍa only.

Remarks:—The Ms. is in a fairly good condition.

॥ रामायणचम्पूः ॥

4131. RĀMĀYAṆACAMPŪḤ.

J. L. Collection No. 593. Substance—Paper. Size—$10\frac{1}{2} \times 3\frac{7}{8}$

inches. Sheets —8. Lines—7 or 8 to a Page Script—Devanāgarī. No. of Granthas—200. Author—Bhoja. Āraṇyakāṇḍa only. (Wants middle).

Beginning: Same as No. 4130.

End:

अनुकंप्यमानः पंपां अभजत ॥

Colophon:

इति विदर्भराजविरचिते चम्पूरामायणे आरण्यकाण्डः समाप्तः ॥

Subject: Rāmāyaṇacampū. Āraṇyakāṇḍa.

Remarks:—The Ms. is in a fairly good condition.

॥ रामायणचम्पूः ॥

4132. RĀMĀYAṆACAMPŪḤ.

P. A. Collection No. 333. Substance—Paper. Size—11⅛×4 inches. Sheets—10. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—250. Author—Bhoja. Āraṇyakāṇḍa only.

Beginning, end, colophon and subject—Same as No. 4131.

Remarks:—The Ms. is in a fairly good condition.

॥ रामायणचम्पूः ॥

4133. RĀMĀYAṆACAMPŪḤ.

J. L. Collection No. 594. Substance—Paper. Size—10½×3⅞ inches. Sheets—8. Lines—7 or 8 to a Page. Script—Devanāgarī. No. of Granthas—100. Author—Bhoja. Kiṣkindhākāṇḍa only. Wants end.

Beginning:

अथानुजन्मना सार्धं पम्पां प्राप्य स राघवः ।

End:

इत्थं जाम्बवता परावर विदा ...... ॥

Colophon: Nil.

Subject: Rāmāyaṇacampū. Kiṣkindhākāṇḍa.

Remarks:—The Ms. is in a fairly good condition.

॥ रामायणचम्पूः ॥

4134. RĀMĀYAṆACAMPŪḤ.

P. A. Collection No. 334. Substance—Paper. Size—$9\frac{1}{8}\times4\frac{3}{4}$ inches. Sheets—10. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—250. Author—Bhoja. Kiṣkindhā kāṇḍa only.

Beginning, end, colophon and subject—Same as No. 4135.

Remarks:—The Ms. is in very good condition.

After the colophon we find

बृहत्कुचाम्बासमेतमहालिङ्गस्वामिने नमः

This leads us to suppose that the Ms. was copied at Madhyārjunam in the Tanjore Dt. where the titular deity is Mahāliṅga.

॥ रामायणचम्पूः ॥

4135. RĀMĀYAṆACAMPŪḤ.

T. S. Collection No. 704. Substance—Paper. Size—10×4 inches. Sheets—9. Lines—8 or 9 to a Page. Script—Devanāgarī. No. of Granthas—250. Kiṣkindhā Kāṇḍa only.

Beginning:

सतां सतां बुद्धिमिव प्रसन्नां
पंपां वियोगज्वरजातदर्पः ।
विलोकयन् लोकनिविष्टकीर्ति-
रार्तिं रघूणां प्रवरः प्रपेदे ॥ १ ॥

End and colophon—Same as No. 4117.

Subject: Rāmāyaṇacampū Kiṣkindhākāṇḍa.

Remarks :—The Ms. is in a fairly good condition.

॥ रामायणचम्पूः ॥

4136. RĀMĀYAṆACAMPŪḤ.

J. L. Collection No. 595. Substance—Paper. Size—$9\frac{1}{2} \times 4\frac{1}{4}$ inches. Sheets—20. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—250. Author—Bhoja. Fifth Kāṇḍa only.

Beginning:

श्रीगणेशाय नमः ॥ निर्विघ्नमस्तु ॥

ततो हनूमान् दशकण्ठनीतां
सीतां विचेतुं पथि चारणानाम् ।
महेन्द्रशैलस्य खगेन्द्रवेगः
प्रस्थादुदस्थात्प्रथमानमानः ॥

End and colophon—Same as No. 4118.

Subject: Rāmāyaṇacampū, Sundarakāṇḍa.

Remarks :—The Ms. is in a fairly good condition.

॥ रामायणचम्पूः ॥

4137. RĀMĀYAṆACAMPŪḤ.

P. A. Collection No. 535. Snbstance—Paper. Size—9⅛×4¾ inches. Sheets—13. Lines—10 or 11 to a Page. Script—Devanāgarī. No. of Granthas—250. Author—Bhoja. Sundarakāṇḍa only.

Beginning, end, colophon and subject—Same as No. 4136.

Remarks:—The Ms. is in good condition.

आरुह्यशैलं + सूत्रपातम् ॥

This verse is found in this Ms. in addition.

॥ रामायणचम्पूः ॥

4138. RĀMĀYAṆACAMPŪḤ.

Not noticed by Burnell. Ms. No. 15538.

Substance—Paper. Size—8×5 inches. Sheets—32. Lines—7 to 9 to a Page. Script—Devanāgarī. No. of Granthas—500. Author—Lakṣmaṇakavi. Yuddhakāṇḍa only.

Beginning:

यस्य सम्पर्कपुण्येन नारीरत्नमभूच्छिला ।
यदुपास्यं सुमनसां तद्वन्द्वमहमाश्रये ।

End and colophon—Same No. as 4107.

Subject: Rāmāyaṇacampū otherwise known as Lakṣmaṇacampū, Yuddhakāṇḍa.

Remarks:—The Ms. is in a fairly good condition.

॥ रामायणचम्पूः ॥

4139. RĀMĀYAṆACAMPŪḤ.

Burnell's Catalogue No. 10097. Page 161. Right column. Substance—Palm leaf. Size—16 × 1½ inches. Leaves—4. Lines—10 to a Page. Script—Grantha. No. of Granthas —120. Author—Rājacūḍāmaṇidīkṣita. Yuddhakāṇḍa only.

Beginning:

वामालकावल्लभभावमुद्रा
सीमाविभागेन्द्रमणीशिलेव ।
रोमावली राजति यस्य मध्ये
सोमावतंसः स सुखाय भूयात् ॥

भव्यारम्भाय वो भूयादव्याजकरुणानिधिः ।
सव्यार्धालोकने नम्रा दिव्या या कापि देवता ॥

भोजेन रामचरितं ग्रथितं निशयैकया ।
एकेन पूरयत्यह्ना श्रीचूडामणिदीक्षितः ॥

अनन्तरमनिन्दितामवनिनन्दनायाः कथां
प्रभञ्जनतनूभुवः प्रभुरसौ समाकर्णयन् ।
कटाक्षरुचिरेखया कलयति स्म धीरोद्धतं
शरासनमतल्लिकां समधिरोपितज्यामिव ॥

विरोधिपरिमाथिनी हरिवरूथिनी मेदिनी-
सुतादयितसेवनोन्मुखवलीमुखेन्द्रानुगाः ।
हृदन्तरनिरन्तराङ्कुरदभङ्गुराहंक्रिया
चचाल चलवारिधिर्जलधिलङ्घनाश्राघना ॥

क्रीडत्क्रोडेन्द्रघुर्घूरवगरिमसखक्ष्वेडिताम्रेडनाति
त्रस्यत्पञ्चास्यसंसद्द्रुतपरिहृतपर्यन्तदर्यन्तरालम् ।
मुञ्चन्तं द्रागसह्याक्रमणरभसतः सह्यमारुह्य शैलं
सेना सा नालिकेरस्वरसमपिबत्सह्यजातीरजातम् ॥

तरङ्गितामोदमनङ्गवीरतुरङ्गमारिष्टतटाङ्कुटीरम् ।
आटीकतारूढहनूमदंसः पटीरशैलं प्रभुरद्भुतं सः ॥

तदनु च महीमहेन्द्रोऽयमतितुङ्गतरशृङ्गसङ्गतमहेन्द्रपुरं महेन्द्रगिरिमासाद्य विदधे निरवधिमणिशेवधेरुदधेरुपरोधप्रदेशमनुपरोधमपरदुष्प्रवेशं सेनानिवेशम् ॥

End:

द्विषा रुद्धामिद्धानिलसखविशुद्धां प्रियतमां
विधायाङ्के पङ्केरुहदशमशङ्केन मनसा ।
विमानं कौबेरं वियति वलमानं सफलयन्
कपिव्रातोपेतो नगरमुपयातो रघुपतिः ॥

संश्लिष्यन्भरतं पदाग्रमुनतं शत्रुघ्नमत्यादरात्
मातॄणामविशेषतः सविनयं मौलौ वितन्वन्पदम् ।
सर्वानप्यनुरञ्जयन्पुरजनान्साम्राज्यसिंहासने
वीरोऽसौ विहिताभिषेचनविधिर्विश्वं ररक्षाक्षतम् ॥

Colophon:

इति श्रीदन्तिद्योतिदिवाप्रदीपाङ्कसत्यमङ्गलरत्नखेटश्रीनिवासदीक्षिततनयस्य कामाक्षीगर्भसम्भवस्य श्रीमदर्धनारीश्वरगुरुचरणसहजतालब्धविद्यावैशद्यस्य श्रीराजचूडामणिदीक्षितस्य कृतिषु एकदिवससंदृब्धो युद्धकाण्डचम्पूः सम्पूर्णा ॥

शिवाय नमः ॥ त्रिपुरसुन्दर्यै नमः ॥

Subject: Rāmāyaṇacampū Yuddhakāṇḍa.

Remarks:—The Ms. is in a fairly good condition.

A paper transcript of the Ms. is available in this library. See T. V. No. 321. Like Lakṣmaṇa, Rājacūḍāmaṇi Dīkṣita too wrote the Yuddhakāṇḍa. Rājacūḍāmaṇi says that Bhoja wrote the campū in the course of a single night and Rājacūḍāmaṇi finished it in the course of a single day. For further information regarding Rājacūḍāmaṇi, refer to the introduction to the Adyar Edition of the Rukmiṇīkalyāṇa. This is not available in print.

॥ रामायणचम्पूः ॥

4140. RĀMĀYAṆACAMPŪḤ.

P. A. Collection No. 336. Substance—Paper. Size—$9\frac{1}{8} \times 4\frac{3}{4}$ inches. Sheets—20. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—400. Author—?. Yuddhakāṇḍa only.

Beginning:

श्रीगणेशाय नमः ॥

अव्याद्व्याजभक्तिप्रचयपरिचयस्फीतविज्ञानसंप-

त्संपन्नानन्दसान्द्रामृतशिशिरतरस्वान्तसिंहासनाग्रे ।

कृत्वा रामांघ्रियुग्मं किमपि भरतवत्सार्वभौमप्रशस्ति

प्राप्यापश्यद्रघूणां परिवृढमपि यस्सोऽयमस्मद्गुरुर्नः ॥

दुर्लभं जयति देशिकवर्यान्मन्त्ररत्नमतुलं मम लब्धम् ।

कर्णयोर्यदधिकाशि मुमुक्षोः सादरं दिशति चन्द्रवतंसः ॥

श्रीभोजलक्ष्मणसुधीन्द्रकृते प्रबन्धे
लग्नं सदल्पमपि मे लपितं स्वदेत ।
कल्याणरत्नकलशद्वयसंभृतेन
क्षीरेण वारिसहितं महितं किल स्यात् ॥

प्राप्तराज्यमिह राममीक्षितुं पंक्तिकन्धरवधप्रहर्षिताः ।
अंशुमालिवरवंशवर्धनीमागताः किल महर्षयः पुरीम् ॥

End:

आकर्ण्यार्थैतदिति संभृतमन्युश्शतमन्युः आरुह्य प्रसन्नौ-पवाह्यं गजमभ्यापतन्तं हनूमन्तं अन्तिके वज्रेण हनौ वामे जघान ॥ ४३ ॥

पद्य ॥....

Colophon : Nil.

Subject: Rāmāyaṇacampū Yuddhakāṇḍa.

Remarks :—The Ms. is in good condition.

Some other writer again has completed the Yuddhakāṇḍa and this copy represents that work. The author is unkown.

॥ रामायणचम्पूः ॥

4141. RĀMĀYAṆACAMPŪḤ.

T. S. Collection 691. Substance—Paper. Size—7½×4 inches. Sheets—16 (5 – 20). Lines—8 to a Page. Script —Devanāgarī. No. of Granthas—250. Author—Bhoja ; fragment only.

Beginning:

....

राराधयन् वरमवाप परैर्दुरापम् ।

तस्मात्समस्तभुवनं निजशासनस्य

लक्षीकरोति रजनीचरचक्रवर्ती ॥ २१ ॥

End :

अथ दशरथवाणीं तामशृण्वन् प्रसन्नां

भृगुपतिरिदमूचे प्रश्रितं रामभद्रम् ।

अवजिगमिषुरासं जीर्णचापात्तकीर्तेः

अविदितपरशोस्ते दोर्बलं कार्मुकेऽस्मिन् ॥ ११० ॥

Colophon: Nil.

Subject: Rāmāyaṇacampū. Bālakāṇḍa.

Remarks:—The Ms. is in a decaying condition.

॥ रामायणचम्पूव्याख्या ॥

4142. RĀMĀYAṆACAMPŪVYĀKHYĀ.

J. L. Collection No. 595. Substance—Paper. Size—8½ × 6½ inches. Sheets—103. Lines—18 to 19 to a Page. Script—Devanāgarī. No. of Granthas—3500. Author—Rāmacandrabudhendra. (Bālakāṇḍa only) Incomplete.

Beginning:

श्रीगणेशाय नमः ॥

कापि कृपा परिपूर्णा रुचिरजटाजूटघटितशुभ्रांशुः ।

वटभूरुहा(ङ्घ्रि)निलया विजयति......जीमूतः ॥

स्फुरद्बोधाङ्कुरज्योत्स्नाविशदीकृतदिक्तटा ।

मानसे सततं शम्भोर्दक्षिणामूर्तिरस्तु नः ॥

भा....न्दीवरचन्द्रिकां भगवतीं बालार्कदीप्त्युज्ज्वलां

कस्तूरीविलस.........करतलैः पाशाङ्कुशौ बिभ्रतीम् ।

चा···णमपि प्रसन्नवदनां वन्दे परां देवतां
राजीवप्रथमानलोचनयुतां श्रीराजराजेश्वरीम् ॥ ३ ॥

* * * *

वाविल्लान्वयवंशमौक्तिकमणिर्वागीशवद्भूतले
विख्यातः पृथिवीसुरो विजयते श्रीवेङ्कटेशाभिधः ।
यत्पत्नीपति···सुमतिर्लक्ष्मीव गङ्गाम्बिका
यद्गेहे हरिपूजनं प्रतिदिनं यच्छिष्यवर्गो महान् ॥ ९ ॥

सा गङ्गाम्बात्रेरनुसूयेवात्रेयान्वयजलनिधिचन्द्रात् ।
श्रीमद्वेङ्कटविदुषः पुत्रान् प्रासूत त्रीनमलचारित्रान् ॥ १० ॥

तेषु ॥

सुब्रह्मण्योऽनन्तनारायणाख्यो रामस्वामीत्येव ते पण्डितेन्द्राः ।
विद्वद्वर्गं पुस्तकानाञ्च वर्णैर्भर्गं यत्नैस्तोषयन्तो जयन्ति ॥

End:

इतिशब्दः परिसमाप्तौ । विदर्भाणां जनपदानां राजा विदर्भराजो भोजः । तेन विरचिते प्रणीत इति कविसमयकथनम् ।

"गद्यपद्यात्मकं काव्यं चम्पूरित्यभिधीयते ।"

इत्युक्तलक्षणं चम्पूस्तथाभूतं कथनम् । शिष्टं स्पष्टम् ॥

Colophon:

इति श्रीमत्परमयोगीन्द्रबृन्दमानसेन्दीवरसन्दोहामन्दानन्दलाभाभिनन्दितरघुनन्दनचरणारविन्दमकरन्दास्वादनकन्दलितसारस्वतेनाखण्डतपःप्रचण्डमुनिप्रकाण्डमण्डलेश्वरशाण्डिल्यमहामुनिगोत्रावतंसस्य वङ्कनान्वयसुधापारावारपारिजातस्य धन्वन्तर्यवता-

रान्तरस्यायुर्वेदप्रमुखनिखिलविद्यासारसर्वज्ञसार्वभौमस्य कोद-ण्डपण्डितवर्यस्य तनूजेन गङ्गाम्बिकागर्भरत्नाकरसुधाकरेण श्री-**रामचन्द्रबुधेन्द्रेण** विरचितायां चम्पूरामायणव्याख्यायां **साहित्यमञ्जूषिकाख्यायां** बालकाण्डः समाप्तः ॥

रामचन्द्रार्यरचिता रामचन्द्रपदार्पिता ।
बालकाण्डस्य सम्पूर्णा व्याख्या मञ्जूषिकाभिधा ॥

श्रीरामप्रसन्न(ः)

Subject: Campūramāyaṇavyākhyā, otherwise known as Sāhityamañjūṣikā. Bālakāṇḍa only.

Remarks:—The Ms. is in good condition.

Rāmacandrabudhendra's commentary on the Rāmāyaṇa-campū has been published by the Nirṇayasāgara Press, Bombay.

The author's father was Kodaṇḍa Paṇḍita and his mother, Gaṅgāmbikā.

॥ रामायणचम्पूः ॥

4143. RĀMĀYAṆACAMPŪḤ.

J. L. Collection No. 597. Substance—Paper. Size—8×5 inches. Sheets—54. Lines—13 to 17 to a Page. Script—Devanāgarī. No. of Granthas—1650. Author—Ghanaśyāma. Yuddhakāṇḍa. Complete.

Beginning:

कल्याणं वितनोतु वः प्रतिदिनं पादारविन्दानत-
ब्रह्माद्याभयदक्षदक्षिणकरं वेदस्तुतं वस्तु तत् ।

सीत्कारोन्नतपुष्कराग्रजनिते लग्ने पयःशीकर-
स्तोमे यद्दिवि चर्करीति दिवसे नक्षत्रमालाश्रियम् ॥

किञ्च ।

यत्किञ्चिद्द्विजरीहरीतु हृदि नस्त्रैलोक्यभद्रं महः
पूर्वं तारकमाशु तूलमिव यन्नासीर एवादहत् ।
कीनाशेभयभाजि धावति हृषीकेशे सहस्रेक्षणे
धारालाक्षिपरम्परे हतगतौ यक्षे विरिञ्चे जडे ॥

* * * *

End:

खेलन्नयं दयितया विपुलानुभावो
जानन्नशेषमपि मौलिकृतानुभावः ।
सप्रेम पल्लवयति स्म स रामचन्द्रः
धीरः प्रजाः कुमुदिनीरिव पूर्णचन्द्रः ॥ ४०३ ॥

यस्येशोग्रभवः पिता खलु महादेवः स काशीप्रसूः
साधु श्रेयसि सुन्दरीप्रियतमा शाकम्भरी च स्वसा ।
तेनाष्टादशवत्सरेण कविना चौण्डाजिपन्तेन च
श्रीमानारचितश्चिराय जयतु श्रीयुद्धकाण्डो मुदा ॥

* * * *

भूयः किं वा ब्रूमो यः सर्वं पश्येदेनं चम्पुं सारज्ञः ।
सोऽयं रामस्यास्य प्रीतत्वादादौ प्रान्तेपश्येत्कल्याणम् ॥

Colophon:

सम्पूर्णो युद्धकाण्डः ।

Subject: Campūrāmāyaṇa. Yuddhakāṇḍa.

Remarks:—The Ms is in a fairly good condition.

Like Lakṣmaṇa and Rājacūḍāmaṇi Dīkṣita Ghanaśyāmapaṇḍita, the famous Maharatha writer of Tanjore, also wrote the Yuddhakāṇḍa portion alone. This is not available in print.

॥ रामायणचम्पूः ॥

4144. RĀMĀYAṆACAMPŪḤ.

J. L. Collection No. 598. Substance—Paper. Size—9½ × 4¾ inches. Sheets—62. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—1360. Author—Ghanaśyāma. Incomplete.

Beginning—Same as No. 4143.

End:

एनां पुनराकर्ण्य कर्णयोः सुधातुल्यां कल्यां गिरं

भोभो बहुपितामहामहीसुरसत्त...

Colophon: Nil.

Subject: Rāmāyaṇacampū. Yuddhakāṇḍa only.

Remarks:—The Ms. is in a fairly good condition. This Ms. abruptly ends towards the close of the work.

Some sheets are missing in the middle.

॥ रामायणचम्पूव्याख्या ॥

4145. RĀMĀYAṆACAMPŪVYĀKHYĀ.

J. L. Collection No. 598. Substance—Paper. Size—13 × 6½ inches. Sheets—20. Lines—16 to a Page. Script—Devanāgarī. No. of Granthas—600. Author—Ghanaśyāma. Complete.

Beginning:

श्रीगणेशाय नमः ॥

कुशलजगदुदन्तं कूलमुक्तं नदन्तं
चतुरमुनिहृदन्तं चाटुसिद्ध्या वदन्तम् ।
कलितखलमुदन्तं कामितार्थप्रदन्तं
चिरकरधृतदन्तं चिन्तयाम्येकदन्तम् ॥

त्रिजगदवनहेतोस्तादृशं जन्म गृह्णन्
विहतिषु दनुजानां वञ्चनां साधु कुर्वन् ।
सदमपि विगुणो यः सच्चिदानन्दरूपः
परशिव इति योऽयं पातु नारायणो वः ॥

काव्यं प्राकृतसंस्कृताख्यमतुलं यस्यैव यस्या मुखं
नेत्रे षण्मणिविद्धसालविवृतिग्राहं चरित्रं मनः ।
पञ्चाशत्कृतयश्च सद्द्वयमुखाभाः कालिदासाधिक-
स्यास्यैतस्य महाकवेर्मम घनश्यामस्य वाचे नमः ॥

* * * *

श्वासा यस्य निबन्धनान्यनुपमः कण्ठीरवोऽयं कविः
क्रीडाचन्द्रति बाणति प्रबलति क्षेमेन्द्रति प्रौढति ।
श्रीकण्ठत्यपि भर्तृमीढति पुनः श्रीसार्वभौमत्यहो
नैको वा नवखण्डभूमिषु गुणं गृह्णन् विभुर्भोजति ॥ ६ ॥

* *

शुष्यन्यदुष्करकृतेर्मम विद्धसाल-
व्याख्यापितुः कठिनभारतचम्पुटीका ।
दष्यन्नभोक्तुरिह यल्लिकुचोपदंश-
स्तद्भोजचम्पुविवृतिर्जलतक्रपानम् ॥

* * *

अथ विदर्भदेशाधिपतिः कविवदान्यः स्वयं कविर्भोजराजो पञ्चकाण्डीं यशस सङ्गृह्णन् अविघ्नपरिपूर्तये मङ्गलं चरीकरीति ॥ लक्ष्मीमिति ।

End:

भागुनाम्ना कयापि महाराष्ट्रस्त्रिया कारितमिति प्रसिद्धिः । भागान(ग)रमिति लोकव्यवहारः । अंशनगरमिति पर्यायनामचमत्कारः । तथा चांशनगरे यो ग्राम अग्रहारः वीथ्यां वा । "वीथ्यग्रहारसङ्केषु ग्रामः" इति रत्नकोशः । भोजेन आङ् ईषत् आसमन्ताद्वा बोधिताः सूचिताः गद्यपद्यात्मना ग्रथिताः ये पञ्चकाण्डास्तद्विहितानन्दपञ्चकाण्डा इत्येतत्षोडशपदार्थोऽष्टादशद्वीपादिवत्समाधेयम् । काण्डश्चिरं जीयात् ।

Colophon:

इति महाराजपदपरिपूरिते लक्ष्मणचम्पूसञ्जीवनाख्ये टिप्पणे युद्धकाण्डः सम्पूर्णः । घनश्यामपण्डितीयं व्याख्यानं सम्पूर्णम् ।

श्रीसाम्बसदाशिवाय नमः ॥

Subject: Rāmāyaṇacampūvyākhyā.

Remarks:—The Ms. is in a fairly good condition.

Ghanaśyāma, apart from completing the text by writing the Yuddhakāṇḍa portion, has commented upon the whole of the Rāmāyaṇcampū, including the Yuddhakāṇḍa portion, written by Lakṣmaṇa. This commentary is not available in print.

॥ वसुचारित्रचम्पूः ॥

4146. VASUCARITRACAMPŪḤ.

Not noticed by Burnell. Ms. No. 15539.

Substance—Paper. Size—$9\frac{7}{8}\times5$ inches. Sheets—94. Lines—9 or 10 to a Page. Script—Devanāgarī. No. of Granthas—2000. Author—Kālahasti. Complete.

Beginning:

श्रीगणेशाय नमः ॥

वसुचम्पूःप्रारभ्यते ।

कल्याणमावहतु नः करिराजवक्त्रो
ब्रह्माण्डपादकटको बलिसद्मपादः ।
पाथोधिबृन्दवमथुः परमेशभाग्यं
तारासमं हि सुमनस्तबकीकृतेन्दुः ॥

* *

गद्यवाक्यानि । अथ निरतिशयशैशव एव यो महनीयो रुचिभिः फलमोहरुचिभिश्च तरुणतरुणीकवलनसमृद्धिं दर्शयामास ।

* * *

वाल्मीकिपाराशरिकालिदास-
दण्डिप्रहृष्यद्भवभूतिमाघान् ।
वल्गन्मयूरं वरभारविञ्च
महाकवीन्द्रान् मनसा भजे तान् ॥

सन्त्यक्तवृत्तनियमां सकलास्तभावा-
मन्यार्थवञ्चनपरामतिमूर्खनन्द्याम् ।

उत्सेकिनीं कुकवितामुपरि प्रवार्था
धीरोत्तमा न गणयन्ति धृतानुभावाः ।

वाकुशासनप्रथितकुण्डलिवल्लभश्री-
नाथेषु नद्धजननस्थितिपालनेषु ।
सोमे च शोभयति भास्करनाम्नि चान्द्र-
काव्यप्रपञ्चमहिमा स हि माननीयः ॥ १७ ॥

सविबसम्मुखसावयवस्फुर-
द्विविधमन्दकलाविधिदैवतम् ।
द्विरदराजमुखादृतगौरवं
वरदराजगुरुं वरदं भजे ॥

श्रीदक्षिणामूर्त्यपरावतारं
श्रीकण्ठभाष्याम्बुधिपूर्णचन्द्रम् ।
अत्यादरादप्पयदीक्षितेन्द्रं
विद्यागुरुं मन्त्रगुरुं भजामि ॥

व्याधोपचारमखिलं विविधोपचार-
लूतागुणालिमतिलोलवितानपालिम् ।
मत्पादयोरपि ददौ महिताल्पतां यः
श्रीकालहस्तिनिलयं शिवमाश्रये तम् ॥

कामाक्षि देवि करुणामयि कामकोटि
काञ्चीपुरीश्वरि कदम्बवनीनिवासे ।
कान्तैकचूतपतिना कलितावधाना
कर्णामृतं कलय काव्यमिदं मदीयम् ॥

इति पीठिका समाप्ता ॥

वसुप्रभुर्वासवधौतरीत्या
कोलाहलाद्रीशकुमारिकायाः ।
गीतोज्वलाया गिरिजाभिधायाः
कल्याणशालीति कथास्तु पुण्या ॥

End:

कामाक्षि देवि करुणामयि कामकोटि
काञ्चीपुरीश्वरि कदम्बवनीनिवासे ।
कान्तैकचूतपतिना कलितावधाना
कर्णामृतं कलय काव्यमिदं मदीयम् ॥

कामाक्षि देवि करुणां मयि पूरयित्वा
कान्तैकचूतपतिना कवितानुमोदा ।
कान्तं सुवर्णघनवृत्तमलङ्कृतीड्यं
कर्णोचितं कलय काव्यमिदं मदीयम् ॥

Colophon:

इति श्रीकामाक्षिदासकालहस्तिकविकृतौ वसुचरित्रचम्पूकाव्ये षष्ठ आ-
श्वासः । वसुचरित्रचम्पूकाव्यं सम्पूर्णम् ॥

श्रीकामाक्ष्यै नमः ॥ श्रीरस्तु ॥

Subject: Vasucaritracampū 1—6 **Āśvāsas.**

Remarks:—The Ms. is in a good condition. **Each āśvāsa is paged separately.**

Dr. Burnell has given the name of the author of this work as Kāmākṣidāsa, but as a matter of fact the name is Kālahasti. The author was a pupil of the famous Appayya Dīkṣita and so

he belongs to the 16th century. This work is based on the most famous Telugu work of the same name (i.e.) the Vasucaritra of Śrīnātha.

॥ वसुचरित्रचम्पूः ॥

4147. VASUCARITRACAMPŪḤ.

Burnell's Catalogue No. 10254. Page 162. Left column. Substance—Palm Leaf. Size—15½ × 1¼ inches. Leaves—100. Lines—4 or 5 to a Page Script—Telugu. No. of Granthas—1500. Author—Kālahasti. Complete. ?

Beginning, end, colophon and subject—Same as No. 4146.

॥ विक्रमसेनचम्पूः ॥

4148. VIKRAMASENACAMPŪḤ.

Burnell's Catalogue No. 4710. Page 162. Left column. Substance—Paper. Size—10⅞ × 3½ inches. Sheets—18. Lines—7 or 8 to a Page. Script—Devanāgarī. No. of Granthas—400. Author—Nārāyaṇa. Complete.

Beginning:

सायं प्रस्तुतचण्डताण्डवचलद्गङ्गातरङ्गावली-
रिङ्खत्पद्मरजोऽतिवेलकमिलच्छ्रीभृज्जटामण्डलः ।
नृत्ताटोपविलोककौतुकजुषां वैमानिकानां मनः-
पाथोजातविकासवासरमणिः पायादुमायाः पतिः ॥

अस्ति खलु निखिलजननयननालीनसमुदयसुखवि-
धायिगुणगणरमणीया मदजलमेदुरगण्डमण्डलीहिण्डमान-

मधुकरनिकरमधुरझङ्कारकैतवकृतस्वस्तिभिः पद्महस्तिभिः *
अम्बरशालाभिश्च विराजमाना नीतिशास्त्रविशदमतिपण्डि-
तप्रतिष्ठा प्रतिष्ठाभिधाना नगरी राजधान्यासीत् ।

End:

अथ निजमेत्य पत्तनममात्यतनूजयुतो
विपुलतरस्वराज्यपरिपालनलब्धयशाः ।
नरपतिनन्दनमिन्दुमुखीसहितः
सकलकलाकुशलो विललास चिरम् ॥ ६० ॥
विद्वत्कल्पतरोस्त्रियम्बकविभोः पौत्रेण गङ्गाधरा-
मात्यस्यात्मभवेन बालकविना नारायणेन स्वयम् ।
अभ्यासाय महाप्रबन्धकरणे सद्वाप्यसद्वा कृतं
श्रीमद्विक्रमसेनराजचरितं नन्दन्तु सर्वे बुधाः ॥

Colophon:

इति श्रीत्र्यम्बकार्यतार्तीयीकाधमर्ण्यपारीण गङ्गाधरामात्यापत्यनारा-
यणरायसचिवविरचितो विक्रमसेनचम्पूप्रबन्धः स-
माप्तिमगमत् ॥
श्रीनारायणरायेण समास्वष्टादशीष्वसौ ।
विश्वावसौ कृतश्चम्पूप्रबन्धस्स्तान्मुदे सताम् ।
श्रीविक्रमसेनचम्पूप्रबन्धः समाप्तः ॥

Subject: Vikramasenacampū.

Remarks:—The Ms. is in good condition.

The author, Nārāyaṇa Rao was the son of Gaṅgādhara and was a native of Tanjore. The work deals with the history of

King Vikramasena of Pratiṣṭhānapura or the modern Paiṭhan The work has not been printed so far.

॥ विक्रमसेनचम्पूः ॥

4149. VIKRAMASENACAMPŪḤ.

J. L. Collection No. 600. Substance—Paper. Size—10×4½ inches. Sheets—19. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—400. Author—Nārāyaṇa. Complete.

Beginning, end, colophon and subject—Same as No. 4148.

Remarks :—The Ms. is in good condition.

After the colophon is found:—

पिङ्गलनामसंवत्सरे ॥ वृकोपनामसदाशिवबृषभट्टेन लिखितम् ।

पण्डितोपनामनागंभट्टब्राह्मणाय दत्तम् ।

तैलात् + पुस्तकम् ॥

This Ms. was copied by Sadāśivabhaṭṭa and presented to Paṇḍita Nāgambhaṭṭa.

॥ विश्वगुणादर्शचम्पूः ॥

4150. VIŚVAGUṆĀDARŚACAMPŪḤ.

Burnell's Catalogue No. 4718. Page 162. Left column. Substance—Paper. Size—14×6 inches. Sheets—61. Lines—9 to 10 to a Page. Script—Devanāgarī. No. of Granthas—1400. Author—Veṅkaṭācārya. Complete.

Beginning:

श्रीगणेशाय नमः ॥

श्रीराजीवाक्षवक्षस्थलनिलयरमाहस्तवास्तव्यलोल-

ल्लीलाब्जान्निष्पतन्ती मधुरमधुझरी नाभिपद्मे मुरारेः ।

अस्तोकं लोकमात्रा द्वियुगमुखशिशोराननेष्वर्प्यमाणं

शङ्खप्रान्तेन दिव्यं पय इति विबुधैः शङ्कयमाना पुनातु ॥१॥

काञ्चीमण्डलमण्डनस्य मखिनः कर्णाटभूभृद्गुरोः

तातार्यस्य दिगन्तकान्तयशसो यं भागिनेयं विदुः ।

अस्तोकाध्वरकर्तुरप्पयगुरोरस्यैव विद्वन्मणेः

पुत्रः श्रीरघुनाथदीक्षितकविः पूर्णो गुणैरेधते ॥ २ ॥

End:

प्रकाशदोषप्रचुरेऽप्यमुष्मिन्

ग्रन्थे मदीये करुणानुबन्धात् ।

प्रसादवन्तो न कृशानवन्तु

परन्तु विश्वावसवन्तु सन्तः ॥ ७० ॥

Colophon:

इति श्रीपञ्चमतभञ्जननिबन्धनख्यात[1]तातयज्वभागिनेयवाजपेय-
सर्वपृष्ठाप्तोर्यामादियाज्यात्रेयवंशमौक्तिकीभवदप्पयार्यतनूभवश्लेषयमक-
चक्रवर्तिरघुनाथाचार्यदीक्षिततनयस्य श्रीनिवासकृपातिशयसुवि-
दितनयस्य सीताम्बागर्भसम्भवस्य श्रीमत्काञ्चीनगरवास्तव्यस्य
वेङ्कटाचार्ययज्वनः कृतिषु विश्वगुणादर्शः सम्पूर्णः ॥

After the colophon is found:—

श्रीमुखाश्वयुजे मासि तिथौ षष्ठ्यां कवेर्दिने ।

इमां विश्वगुणादर्शमलिखत्कृष्णलेखकः ॥

---

1. The next Ms. reads व्याख्यात्

Subject: Viśvaguṇādarśacampū.

Remarks:—The Ms. is in excellent condition. Alternate sheets are sulpherated.

This work of Venkaṭādhvarin, a Śri Vaiṣṇava Brahmin of Conjeevaram has been printed by the Nirṇayasāgar Press. The work is in the form of a conversation between one Kṛśānu and his friend Viśvāvasu, the topic of the conversation being the merits or otherwise of the various countries of India that they visited in an aerial car.

॥ विश्वगुणादर्शचम्पूः ॥

4151. VIŚVAGUṆĀDARŚACAMPŪḤ.

Burnell's Catalogue No. 4717. Page 162. Left column.
Substance—Paper. Size—$8\frac{1}{4}\times5\frac{1}{4}$ inches. Sheets—84. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—1400. Author—Veṅkaṭācārya. Complete.

Beginning, end and subject—Same as No. 4150.

Colophon:

इति श्री + सम्पूर्णः ॥ श्रीह्यलसाम्बासमेतश्रीमन्मार्ताण्डभैरवार्पणमस्तु ॥ लिखितदिन । पराभवसंवत्सर वैशाखशुद्ध द्वितीया रविवार ॥ The Ms. was copied in the Parābhava year, Vaiśākha month, bright fortnight, 2nd day and Sunday.

साम्बार्पणमस्तु ॥

॥ विश्वगुणादर्शचम्पूः ॥

4152. VIŚVAGUṆĀDARŚACAMPŪḤ.

Burnell's Catalogue No. 4719. Page 162. Left column.

Substance—Paper. Size—12¾ × 5½ inches. Sheets—66. Lines—9 to 11 to a Page. Script—Devanāgarī. No. of Granthas—1400. Author—Veṅkaṭācārya. Complete.

Beginning, end, colophon and subject—Same as No. 4150.

॥ विश्वगुणादर्शचम्पूः ॥

4153. VIŚVAGUṆĀDARSACAMPŪḤ.

Burnell's Catalogue No. 4720. Page 162. Left column. Substance—Paper. Size—10¾ × 4½ inches. Sheets—86. Lines—8 to a page. Script—Devanāgarī. No. of Granthas—1400. Author—Veṅkaṭācārya. Complete.

Beginning, end, colophon and subject—Same as No. 4400.

॥ विश्वगुणादर्शचम्पूः ॥

4154. VIŚVAGUṆĀDARSACAMPŪḤ.

T. S. Collection No. 597. Substance—Paper. Size—10⅝ × 3¾ inches. Sheets —55. Lines —9 to 11 to a Page. Script—Devanāgarī. No. of Granthas—1400. Author—Veṅkaṭācārya. Complete.

Beginning, end, colophon and subject—Same as No. 4150.

Remarks :—The Ms. is in a decaying condition.

॥ विश्वगुणादर्शचम्पूः ॥

4155. VIŚVAGUṆĀDARSACAMPŪḤ.

J. L. Collection No. 601. Substance—Paper. Size —9½ × 5

inches. Sheets—65 (3-67). Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—1300. Author—Veṅkaṭācārya. Incomplete.

Beginning:

...कमलवासिनीनयनसौख्यसंदायिने ।

तमउशमविधायिने तरणिमण्डलस्थायिने ॥ १३ ॥

End:

नाध्यापयिष्यन्निगमान्क्रमेणो-

पाध्यायलोको यदि शिष्यवर्गान् ।

निर्वेदवादं किल निर्वृताना-

मुर्वीतलं हन्त तदा भवि... ॥ ७० ॥

Colophon: Nil.

Subject: Viśvaguṇādarśacampū.

Remarks:—The Ms. is in a decaying condition.

॥ विश्वगुणादर्शचम्पूः ॥

4156. VIŚVAGUṆĀDARŚACAMPŪḤ.

Burnell's Catalogue No. 4721. Page 162. Left column. Substance—Paper. Size—$9\frac{7}{8} \times 4\frac{1}{4}$ inches. Sheets—50 (21-70). Lines—9 to 11 to a Page. Script—Devanāgarī. No. of Granthas—1100. Author—Veṅkaṭācārya. Incomplete.

Beginning:

........................रच्युते ।

तिमिरेभ्यो हि न भयं दीपश्चेल्लभ्यते महान् ॥ ४३ ॥

End, colophon and subject—Same as No. 4150.

Remarks:—The Ms. is in a fairly good condition.

॥ विश्वगुणादर्शचम्पूः ॥

4157. VIŚVAGUṆĀDARŚACAMPŪḤ.

G. K. D. Collection No. 254. Substance—Paper. Size—9×4½ inches. Sheets—21. Lines— 8 to a Page. Script—Devanāgarī. No. of Granthas—300. Author—Veṅkaṭācārya. Incomplete.

Beginning—Same as No. 4150.

End:

अयं खलु + वेदऽशासः सह दश यो वेद वेदाक्षराणि
च ॥

Subject:—Viśvguṇādarśacampu.

Remarks:—The Ms. is in good condition.

॥ वेङ्कटेशचम्पूः ॥

4158. VEṄKAṬEŚACAMPŪḤ.

S. K. Collection No. 212. Substance—Paper. Size—9×5 inches. Sheets—51. Lines—13 to a Page. Script—Devanāgarī. No. of Granthas—1800. Author—Dharmarāja. Complete.

Beginning:

कल्याणं कुरुतां कोऽपि कमलाकामुकः पुमान् ।
श्रीवेङ्कटगिरीन्द्रस्य भृङ्गभूषामणिर्मम ॥

आरम्भे कर्मणां यस्य स्मरणं प्रणवायते ।
वृषभाचलसंस्थं तं विष्वक्सेनं समाश्रये ॥

आनन्दवृन्दमरविन्दभवाद्यलब्धं
गोविन्द एव कुरुतां मरुतामधीशः ।
जातापरा जगति शम्भुकुटुम्बिनी य-
त्पादारविन्दमकरन्दझरी द्वितीया ॥ ३ ॥

मातर्वाणि किमर्भकाद्यसदृया भूयाः किमस्त्यद्भुतं
हुं तत्किं श्वशुरस्त्वैष पुरतः साक्षात्कृतः श्रीपतिः ।
सम्यक्ते नवमल्लिकापरिमलप्रस्पर्धिसन्ध्यानट-
मोद्याद्वाङ्झलझ्झलारववचोगुम्भः समुज्जृम्भताम् ॥ ४ ॥

* * *

द्वन्द्वं तदद्भुतं वन्द्यमिन्द्वङ्कुरपरिष्कृतम् ।
यस्य दक्षिणभागेन शयनं पुरुषायितम् ॥ १४ ॥

किं तातेति प्रवक्ष्यामि किमु वा मातरित्यपि ।
संदिहानं सुतं दृष्ट्वा शिवयोरवतु स्मितम् ॥ १५ ॥

कबलीकृतकान्तार्धं कमनीयकलेबरम् ।
कर्पूरकोमलं किञ्चिदथवा श्यामलं स्तुमः ॥ १६ ॥

* * *

दोषाकरो भवतु वेङ्कटनाथचम्पूः
सन्तस्तथापि शिरसा परिपालयन्तु ।
दोषाकरस्तु लभते निजमूर्ध्नि शम्भोः
सर्वज्ञता न किमसौ सकलोपवन्द्या ॥ १९ ॥

वाणीह रञ्जयति मे रसिकानतीव
सर्वान् खलानपि तथापि न चित्रमेतत् ।

ये निन्दितुञ्च तरुणीमवलोकयन्ति
तानप्यलं झटिति सा हि वशीकरोति ॥ २० ॥

निन्दन्त्वद्य सहस्रशः खलजना नन्दन्तु वा तेन किं
सन्तः सन्तु दयालवः स्तुतिधिया श्रीवेङ्कटाधीशितुः ।
इत्यालोच्य करोति काञ्चनकृतिं श्रीधर्मराजः कविः
गद्यैर्हृद्यपदप्रबन्धसुभगैः पद्यैस्तरङ्गद्रसैः ॥ २१ ॥

* * *

अस्ति समस्तदुरितपुञ्जभञ्जनबिरुदशीकरनिकरनिरन्त-
रतुन्दिलमन्थरविहतिसडम्भगन्धवहडिम्भसञ्चारमात्रपवि-
त्रीकृतादिगन्तरा * *
किं बहुना । अनुपमवैभववैखरी सुवर्णमुखरी

End:

किं बहुना । निरन्तरदीयमाननिखिलपुरुषार्थनिकुरु-
म्बो जयति सततानुरञ्जितसकलजगत्कदम्बः ॥

पर्जन्यः परमादरेण जगतीसञ्जीवनं जीवनं
काले सम्प्रददातु सा च धरणी सस्यैः समृद्धा त्वियम् ।
राजानो निखिला भवन्तु सुतरां धर्मे रताः ब्राह्मणाः
भूयासुः श्रुतिसम्पदः सततषट्तन्त्रस्वतन्त्राः परम् ॥

Colophon:

सूनोः श्रीरघुनाथनामविदुषः श्रीधर्मराजस्य स-
त्काव्ये चारुणि पद्मिनीपरिणये गद्यालिपद्यात्मके ।
आनन्दापरिपूर्तिनूतनसुधाधारावतारादसा-
वाश्वासो विदुषां मुदेस्तु सुतरां पूर्णश्चतुर्थो रसैः ॥ ८५ ॥

Subject: Veṅkaṭeśacampū 1-4 Āśvāsas.

Remarks:—The Ms. is in a fairly good condition. A paper transcript of this Ms. is available here. See T. V. No. 474.

This work deals with the mythological stories relating to God Veṅkaṭeśa at Tirupati. The work is not available in print.

The author was a native of the Tanjore District and belonged to the 17th century.

॥ शिवचम्पूः ॥

4159. ŚIVACAMPŪḤ.

Burnell's Catalogue No. 10188. Page 162. Right column. Substance—Palm Leaf. Size—13 × 2½ inches. Leaves—27. Lines—4 or 5 to a Page. Script—Grantha. No. of Granthas—340. Author—Kavivādiśekhara. Complete.

Beginning:

वन्दे वेतण्डवदनं यच्छुण्डालीलयोद्धृता ।
ब्रह्माण्डमण्डपारम्भस्तम्भतां लभते क्षणम् ॥

वाणी ताण्डवमाधत्तां मम जिह्वाग्रमण्डपे ।
आद्या यद्भूमिका लीला विद्या वेदपुरःसरा ॥

अभूदभूतप्रतिमे महेश्वरे
निरूढचेताः निगमान्तसारवित् ।
कलानिधिः कल्पितकोशवारिधेः
कविः प्रतीतः कविवादिशेखरः ॥

जन्मनः प्रभृति देवतान्तरं
यन्मनः परिविधूय केवलम् ।
कामिनीकबलितार्धविग्रहं
यामिनीरमणचूडमन्वगात् ॥

हेमाद्रेरिव यस्यासीन्नान्यस्मै नमितं शिरः ।
अन्तरेण महादेवमनन्तानन्दसुन्दरम् ॥

श्रीकण्ठदर्शननिरूपितभाग्यलक्ष्या
सिंहासनप्रथमदेशिकया निबन्धः ।
पट्टाभिषेचनविधिः कविता भरायां
शास्त्राम्बुधौ बहुविधे निरतस्य काञ्च्याम् ॥

तमादिशच्चापसवेषधारी
स्वप्ने कदाचित्स्वयमेत्य शम्भुः ।
निजावदानैर्निखिलैरुपेतं
प्रबन्धमेकं परिकल्पयेति ॥

तत इदमपि जातगद्यपद्य-
प्रतिपदपल्लवितप्रसादरम्यम् ।
...तस कविवादिशेखरोऽयं
शिवचरितं रसबन्धुरं प्रबन्धम् ॥ ७ ॥

तथा हि ॥

प्रथमापत्यसौभाग्यं पार्वतीपरमेशयोः ।
भजे गजेन्द्रवदनं प्रत्यूहव्यूहशान्तये ॥

नमस्त्रैलोक्यनलिनीविकासाबिसतन्तवे ।

त्रैय्यन्तसौषवलभीकपोताय कपर्दिने ॥

हृदयेऽस्तु परं वस्तु हल्लेखाशुक्तिमौक्तिकम् ।

शतानन्दादयो देवा यदानन्दादिबिन्दवः ॥

End:

अथेदानीं कालकालस्य कालमथनकथा प्रस्तूयते ।

आसीदाजन्मशुद्धानामासीनो ब्रह्मवादिनाम् ।

मृगकण्डूयनपरो मृकण्डुरिति तापसः ॥

ततः स मुनिनन्दनोऽपि शङ्करप्रसादादातिशयभाजनमात्मानं परमपावनं मन्यमानो जनितपरमानन्दपरिवाहितहृदयाभ्यां स्वमातृपितृभ्यामन्वागतो निमिषमिव तत्परिचरणमहोत्सवैः कल्पमनल्पमपि सुखविभवमन्वभूत् ॥ ॐ तत्सत् ॥ हरिः ॐ ॥

Colophon:

इति श्रीशिवचम्पूः समाप्ता ॥

Subject: Śivacampū.

Remarks:—The Ms. is in good condition. A paper transcript of this Ms. is also available here. See T. V. No. 59.

The Śivacampū deals with the story of Mārkaṇḍeya and his release from the hands of the God of Death by Śiva himself.

The work is not available in print.

॥ शिवविलासचम्पूः ॥

4160. ŚIVAVILĀSACAMPŪḤ.

T. S. Collection No. 686. Substance—Paper. Size—$9\frac{3}{4} \times 4\frac{1}{2}$ inches. Sheets—28. Lines—12 to 18 to a Page. Script—Devanāgarī. No. of Granthas—600. Author—Virūpākṣa. Complete.

Beginning:

श्रीशिवाय नमः ॥

ईश्वरं सर्वभूतानां निश्चलं निर्मलं विभुम् ।
निर्गुणं शाश्वतं शान्तं शिवं वन्देऽहमद्वयम् ॥

यश्च ब्राह्मणपुङ्गवस्य सहसा यान्तं क्रुधा भीषणं
कुष्ठाद्यैः परितो वृतं हरहरेत्युच्चारयन्तं पुरा ।
हत्वेदं यममादराच्च कृपया तज्जीवयित्वा पुन-
र्भक्तस्याशु सुरक्षणञ्च कृतवान् देवस्तमेवस्तुमः ॥

तातो यस्य शिवो गुरुश्च नितरां दासः शिवस्यैव यो
माता यस्य तु गोमती स हि विरूपाक्षाभिधोऽयं कविः ।
श्रीमत्कौशिकगोत्रजः शिवविलासाख्यं शिवप्रीतये
[चम्पूकाव्यमिदं करोति दिशतात्स्फूर्तिं परां शारदा ॥]

आसीदशेषसुरासुरचक्रवन्द्यमानशीतलतोयायाः सम-
च्छवपुषं प्रवाहं हंसजातश्च धारयन्त्याः * * गङ्गायास्तीरे * * अभ्यस्यमानयोगनि-
ष्कल्मषमनोवृत्तिमहाजनपरिष्कृतः, एकतश्च समुदाश्रितद्रा-

नरविप्रणष्टाज्ञानतिमिरनिरभिमाननिरतिशयसुखानुभवतु-
न्दिलमहायोगिजनाध्यासितः धर्माश्रयो नाम यथार्थ-
नामा महानाश्रमः ।

End:

ताहशमागत्य सुहृद्गणपरिवृताय शिष्यजनैरुपसेव्यमा-
नाय निरन्तरशिवध्यानक्षपितकल्मषाय पित्रे मात्रे च नि-
वेद्य वृत्तान्तमखिलं तभ्याञ्च सानन्दमुपाघ्रातो मूर्ध्नि
आलिङ्गितश्चोद्वाह्य कुलजां कन्यामुत्पाद्य च पुत्रानात्मसदृ-
शान् तस्यामेव सर्वकालमप्यनुभवञ्शिवानन्दं मार्कण्डेयो
भगवान् विजयते ।

Colophon:

इति श्रीविरूपाक्षविरचिते शिवविलासाख्यचम्पूकाव्ये
चतुर्थ उल्लासः ॥

Subject: Śivavilāsacampū 1-4 Ullāsas.

Remarks:—The Ms. is in good condition. On the last page are given four loose verses in Marāṭhi.

This Campukāvya deals with the greatness of Śiva and the good that may result out of bhakti in him. The author is Virūpākṣa, son of Śivaguru and Gotami. The work is not printed.

॥ श्रीनिवासचम्पूः ॥

4161. ŚRĪNIVĀSACAMPŪḤ.

J. L. Collection No. 602. Substance—Paper. Size—$7\frac{1}{2} \times 5\frac{1}{16}$

inches. Sheets—27. Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—200. Author—Śrīnivāsa. Complete.

Beginning:

श्रीवेङ्कटेशो जयति । श्रीहयग्रीवाय नमः ॥

अपि खलु द्वापरान्ते तुहिनांशुवंशप्रशंसनीयानामुत्तंसहीरस्य सुवीरनाम्नो राज्ञस्तनयात्सुधर्माभिधेयादुपात्तजन्मा । कलौ कृतधर्माणां दत्तावकाशत्वादाकाश शर्मा कोपि निखिलविद्याशरण्यो नृपवरेण्यः कुलपरंपरोपात्तसंपूर्णसंपदा मुकुटभरपरिक्लृप्तकन्धरो जगदवनधुरन्धरो नगरशतसहस्रबन्धुरामादिक्तटसिन्धुरां समेरुमन्धरां वसुन्धरां चिरमपालयत् ॥

End:

वाक्यम् ॥ अथ सुधाकरकलेव दिने दिने वर्धमाना मानवेष्वनिर्धारणीयं किमपि रामणीयकं प्रपेदे । अलमनुपमं सा बभौ पुण्यशीला ।

श्लोकः ॥

ललाटं विशालं विशाले च नेत्रे
सुदीर्घा च नासा कचा नीलनीलाः ।
मृदू हस्तपादौ कृशो मध्यदेशो
नितम्बो गरीयानहो रूपलीला ॥ ११ ॥

एवं लक्षणैर्वरीयस्या यस्यास्समुपगमादेव पुनरिष्टि-

मिष्टवतो नृपस्य सत्वरं युवत्यपि गुणवत्तरमपत्यमुपेत्य कृतकृत्यतामपद्यत ॥

Colophon:

इति श्रीमद्वाजसनेयशाखायां कौशिकगोत्रोद्भवेन लक्ष्मीवेङ्कटेशाख्ययोस्तनयेन श्रीनिवासेन विरचिते श्रीनिवासचम्पौ पञ्चमस्तबकः ॥

श्रीवेङ्कटेशः प्रीणातु ॥

Subject: Śrīnivāsacampū 5th stabaka only.

Remarks:—The Ms. is in good condition. The work is not available in print.

॥ कथा ॥

KATHĀ.

॥ पञ्चतन्त्रम् ॥

4162. PAÑCATANTRAM.

Burnell's Catalogue No. 5109. Page 165. Left column.

Substance—Paper. Size—9 × 4⅛ inches. Sheets—48. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—1100. Author—?. Complete 1-5 Tantras.

Beginning:

श्रीगणेशाय नमः ॥

वैनायकाय महसे प्रत्यूहतिमिरच्छिदे ।
अपारकरुणापूरतरङ्गितदृशे नमः ॥ १ ॥

मनवे वाचस्पतये शुक्राय च पराशराय ससुताय ।
चाणक्याय च विदुषे नमोऽस्तु नीतिशास्त्रकर्तृभ्यः ॥ २ ॥

ग्रन्थविस्तारभीरूणां बालानामल्पचेतसाम् ।
बोधाय पञ्चतन्त्राख्यमिदं संक्षिप्य कथ्यते ॥ ३ ॥

अन्यदीयोपि लिखितः श्लोको यः प्रक्रमागतः ।
स्वल्पत्वाद्ग्रन्थविस्तारदोषस्तेन न जायते ॥ ४ ॥

अस्ति सकलदेवताधिष्ठानं सकलविद्वज्जननिवासं पाटलीपुत्रनाम नगरम् ॥

End:

अनन्तरं कर्मवशाद्भिक्षार्थमागतं भिक्षुत्रयं लगुडेन व्यापादितम् । तस्याक्रोशेन राजपुरुषैरकर्मकृतं नापितो

व्यापादितः । अतोऽहं ब्रवीमि "कुश्रुतं कुपरिज्ञानम्"
इति ।

मूढो नष्टमतिश्चैव धनहीनश्च यो नरः ।
निरस्तश्चेतरैश्चैव भस्मन्याहुतयो यथा ॥

त्वमपि तादृश एव मूर्खः । तथा च—

सहसा विदधीत न क्रियां
अविवेकः परमापदां पदम् ।
वृणुते हि विमृश्य कारिणं
गुणलुब्धाः स्वयमेव संपदः ॥

Colophon:

इति श्रीसमाप्तमसंप्रेक्ष्यकारित्वं नाम पञ्चमं तन्त्रम् ॥
इति पञ्चतन्त्री समाप्ता ॥
रामाय रामभद्राय + सीतायाः पतये नमः ॥

Subject: Pañcatantram. 1-5 Tantras.

Remarks:—The Ms. is in good condition.

There are several recensions of the Pañcatantra. This recension belongs to the south and is the smaller of the two recensions. It is noteworthy that in the passage given here there is a verse from the Kirātārjunīya of Bhāravi. It therefore follows that this compilation should have been made after the 8th century.

The edition of Dr. Edgerton in the Harward Oriental series is the most important.

॥ पञ्चतन्त्रम् ॥

4163. PAÑCATANTRAM.

Burnell's Catalogue No. 5110. Page 165. Right column. Substance—Paper. Size—$8\frac{3}{10}\times4\frac{3}{10}$ inches. Sheets—60. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—1100. Author—? Complete. 1-5 Tantras.

Beginning:

श्री वेदव्यासाय नमः ।

मनवे वाचस्पतये etc. Same as No. 4162.

End—Same as No. 4162.

Colophon:

असंप्रेक्ष्यकारित्वं नाम पंचमं तन्त्रम् ॥ विभवनामसंवत्सरे माघमासे कृष्णपक्षे शिशिरऋतौ द्वादश्यां शुभतिथौ गुरुवासरे तद्दिने पंचतन्त्री लिखिता समाप्ता ॥

Subject—Same as No. 4162.

Remarks :—The Ms. is in a fairly good condition.

॥ पञ्चतन्त्रम् ॥

4164. PAÑCATANTRAM.

Burnell's Catalogue No. 5112. Page 165. Right column. Substance—Paper Size—$9\frac{3}{10}\times4$ inches. Sheets—77. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—1100. Author—?. Complete. 1-5 Tantras.

Beginning and subject—Same as No. 4163.

End:

सहसा विदधीत + स्वयमेव संपदः ॥

एवमभिहितो ···चोक्तं । प्रतिकूलता........विधौ वि-

फलत्वमेति बहुसाधनता । अवलंबनाय दिनभर्तुरभू........

लालयन् गृहे सुचिरं सुखातिशयसंपन्न उवास ॥

Colophon:

इत्यसमीक्ष्यकारित्वं च पंचमतन्त्रम् ॥

Remarks:—The Ms. is in good condition. The first and last page contains the name बाबाजिनायक्

The owner of the Ms. was one Bābājināyaka.

॥ पञ्चतन्त्रम् ॥

4165. PAÑCATANTRAM.

Burnell's Catalogue No. 5116. Page 165. Right column. Substance—Paper. Size—$10\frac{7}{10} \times 4\frac{1}{10}$ inches. Sheets—49 (2-50). Lines—8-15 to a Page. Script—Devanāgarī. No. of Granthas—1100. Author—?. Complete, wants beginning.

Beginning:

···(ब)हुमानपुरस्सरं तस्मै विष्णुशर्मणे कुमारान्स-

मर्पितवान् । तेन कथाद्वारेण पंचतन्त्राणि परिकल्प्य राज-

पुत्रान्नीतिशास्त्रं ग्राहयितुमुपक्रान्तम् ॥

End, colophon and subject—Same as No. 4162.

Remarks:—The Ms. is in a fairly good condition.

After the colophon there are certain subhāṣitas. The verse धन्वन्तरिक्षपणक etc. is also given therein.

॥ पञ्चतन्त्रम् ॥

4166. PAÑCATANTRAM.

Not noticed by Burnell. Ms. No. 14657.

Substance—Paper. Size—10 × 3$\frac{9}{10}$ inches. Sheets—51. Lines—8-10 to a Page. Script—Devanāgarī. No. of Granthas—1100. Author—Kṣemendra. Complete.

Beginning, end and subject—Same as No. 4163.

Colophon: (Sheet No. 23, 32, and 45.)

इति क्षेमेन्द्रेण कृतायां मित्रभेदो नाम प्रथमतन्त्रः समाप्तः ॥

(Sheet No. 51)

पञ्चतन्त्रे पञ्चमं तन्त्रं समाप्तम् ।

Remarks:—The Ms. is in a decaying condition. This Ms. gives the name of the author as Kṣemendra.

॥ पञ्चतन्त्रम् ॥

4167. PAÑCATANTRAM.

P. A. Collection No. 346. Substance—Paper. Size—12$\frac{1}{8}$ × 4$\frac{3}{8}$ inches. Sheets—31. Lines—11-12 to a page. Script—Devanāgarī. No. of Granthas—850. Author—?. Incomplete.

Beginning:

...प्यर्थवृद्धिः करणीयेति मतिरासीत् । तथा हि ।

लब्धस्य लाभो लब्धस्य परिरक्षणम् । रक्षितस्य...वर्धितस्य तीर्थे प्रतिपादनं च । तत्र लब्धं किंचिदस्तु अरक्षितस्य सद्यो विनाशः । अवर्धमानो जन.... । अनुपभुज्य-

मानोऽपि निष्प्रयोजनः अनुपलब्धतुल्य एव । तथा च

उपार्जितानामर्थानां........रक्षणम् ।
तटाकोदरसंस्थानां परिवाह इवाम्भसाम् ॥

End, colophon and Subject—Same as No. 4162.

Remarks:—The Ms. is in a decaying condition.

There are several omissions in the middle and the beginning too is abrupt.

The first tantra ends on page			20.
„ third	„	„	31.
„ fourth	„	„	34.

॥ पञ्चतन्त्रम् ॥

4168. PAÑCATANTRAM.

Burnell's Catalogue No. 1024. Page 165, Right column. Substance—Palm leaf. Size—$15\frac{1}{2} \times 1\frac{1}{8}$ inches. Leaves—61. Lines—5 or 6 to a Page. Script—Grantha. No. of Granthas—650. Author—? Incomplete. 1-3 Tantras.

Beginning:

कपोलनिष्पन्दिमदाम्बुधारा-
सन्तर्पिताळीव्रजझङ्कृतौघैः ।
उद्गीयमानं गिरिराजपुत्रि
पुत्रं गणेशं हृदि (भावयामि) ॥

मनवे वाचस्पतये etc. Same as No. 4163.

End:

तच्छ्रुत्वा तपःप्रभावात् संवर्तकनाम मेघमाहूयात्र-

वीत्। इयं स्त्रीक्रियतामिऽति ॥ सोऽप्याह—वायुर्बलवान्मां चलयतीति । तमाहूयाब्रवीत् । इयं स्वीक्रियतामिति ॥

Colophon: (Leaf No. 46)

इति सुहृल्लाभो नाम द्वितीयतन्त्रं समाप्तम् ॥

Subject: Pañcatantram 1-3 Tantras, 3rd Incomplete.

Remarks;—The Ms. is in a fairly good condition.

॥ पञ्चतन्त्रम् ॥

4169. PAÑCATANTRAM.

Burnell's Catalogue No. 10242. Page 165. Right column. Substance—Palm leaf. Size—$15\frac{1}{8} \times 1\frac{1}{8}$ inches. Leaves—35. Lines—5 to a Page. Script—Telugu. No. of Granthas—50. Author—? Incomplete. 1–2, Tantras.

Beginning—Same as No. 4163.

End:

सेवेव मानमखिलं ज्योत्स्नेव तमो जरेव लावण्यम् ।
हरिं हरिकथेव दुरितं गुणशतमप्यर्थिता हरति ॥

तत्कथमहं परपिण्डेनात्मानं (योजयामि)। लज्जे योजयितुमाग्रहमकर(वं) । बृहस्पतिना लगु(डेन)...॥

Colophon: (Leaf No. 29)

इति मित्रभेदो नाम प्रथमतन्त्रं समाप्तम् ॥

Subject: Pañcatantram 1, 2, Tantras. 2nd Incomplete.

Remarks:—The Ms. is in a fairly good condition.

॥ पञ्चतन्त्रम् ॥

4170. PAÑCATANTRAM.

Burnell's Catalogue No. 5111. Page 165. Right column. Substance—Paper. Size—9½ × 4¼ inches. Sheets —23. Lines— 9 or 10 to a Page. Script—Devanāgarī. No. of Granthas—396. Author—? Complete. 1st Tantra only.

Beginning:

श्रीगणेशाय नमः ।

ग्रन्थविस्तारभीरूणां etc. Same as No. 4162.

End:

सत्याऽनृता च परुषा प्रियवादिनी च
हिंस्रा दयालुरपिचार्थपरा वदान्या ।
नित्यव्यया प्रचुरनित्यधनागमा च
वेश्याङ्गनेव नृपनीतिरनेकरूपा ॥

इति मदनकेन (दमनकेन) परितोषितः पूर्ववद्राज्यसुखमनुभवन्नास्ते ॥

Colophon:

इति मित्रभेदो नाम प्रथमतन्त्रं समाप्तम् ॥

Subject: Pañcatantram, 1st Tantra only.

Remarks:—The Ms. is in good condition.

॥ पञ्चतन्त्रम् ॥

4171. PAÑCATANTRAM.

Burnell's Catalogue No. 10241. Page 165. Right column

Substance— Palm leaf. Size—$11\frac{1}{10} \times 1\frac{3}{8}$ inches. Leaves—25. Lines—7-9 to a Page. Script—Grantha. No. of Granthas—380. Author—? 1st Tantra Incomplete.

Beginning—Same as No. 4170.

End:

करटको दमनकमाह— दुरात्मन् तव दुर्मन्त्रविलसितान्यनुभवन्स्वामी—

मृ (गृ)ढसान्त्वं प्रयोक्तव्यपादौ कार्यं विजानता ।
सामसिद्धा हि विषयो न तु यान्ति पराभवम् ॥

यद्यप्युदाराश्चत्वारो विहिताः कार्यसिद्धये ।
संख्यामात्रफलं तेषां सिद्धिस्साम्नि व्यवस्थिता ॥

Colophon: Nil.

Subject: Pañcatantra. 1st Tantra, Incomplete.

Remarks:—The Ms. is in a fairly good condition.

॥ पञ्चतन्त्रम् ॥

4172. PAÑCATANTRAM.

Burnell's Catalogue No. 5113. Page. 165. Right column. **Substance**—Paper. Size—$9\frac{4}{5} \times 4\frac{1}{5}$ inches. Sheets —43. Lines—6-8 to a Page. Script—Devanāgarī. No. of Granthas—378. Author—? Complete 1st Tantra only.

Beginning—Same as No 4163.

End, colophon and subject—Same as No. 4170.

Remarks:—The Ms. is in good condition. This Ms. contains also

the beginning of the 2nd Tantra (सुहृल्लाभः) after the colophon.

॥ पञ्चतन्त्रम् ॥

4173. PAÑCATANTRAM.

T. S. Collection No. 688. Substance—Paper. Size—8 × 5¼ inches. Sheets—31. Lines—12-15 to a Page. Script—Devanāgarī. No. of Granthas—600. Author—? Incomplete.

Beginning:

....

......................काकाखुमृगकूर्मवत् ॥

राजपुत्रः पृच्छति—कथमेतत्? विष्णुशर्मा कथयति— अस्ति दाक्षिणात्ये जनपदे प्रमदासेव्यं नाम नगरम्। तस्य च नातिदूरे महाच्छायो महास्कन्धशाखोपचितो न्यग्रोधपादपः सर्वा...योऽस्ति। उक्तं च...

End:

अथ चत्वारोऽपि तत्कल्याणशरीरे कच्छपे परस्परस्नेहेन वर्तमानाः पुनर्जातमिव आत्मानं मन्यमानाः सुखेन तिष्ठन्ति। तस्मात्

तिरश्चामपि यत्रेदृक्संगतं लोकसंमतात्।
तत्र लोके मनुष्याणां......शालिनाम् ॥

Colophon:

संपूर्णं चेदं मित्रसंप्राप्तिः द्वितीयं तन्त्रम्।

Subject: Pañcatantra—second tantra, Mitrasamprāpti.

Remarks:—The Ms. is in a decaying condition.

॥ पञ्चतन्त्रम् ॥

4174. PAÑCATANTRAM.

Not noticed by Dr Burnell. Ms. No. 15333 (b).

Substance—Palm leaf. Size—$14\frac{3}{8} \times 1\frac{2}{8}$ inches. Leaves—10. Lines—6 to Page. Script—Telugu. No. of Granthas—200. Author—?. Incomplete.

Beginning:

अथ सुहृल्लाभो नाम द्वितीयं तन्त्रमारभ्यते ।

तत्रायमाद्यः श्लोकः—

असाधना वित्तहीना बुद्धिमन्तः सुहृत्तमाः ।
साधयन्त्याशु कार्याणि काककूर्ममृगाखुवत् ॥

End:

ततो लुब्धकः स्वकर्मवशात् निरशनो निराशश्च स्वगृहमागतः । मुद्गरादयः सर्वे च मुक्तापदः स्वस्थानं गत्वा यथासुखमवस्थिताः ॥

Colophon:

इति मित्रप्राप्तिर्नाम द्वितीयं तन्त्रम् ।

Subject: Pañcatantra—Second tantra—Suhṛllābha.

Remarks:—The Ms. is in a good condition. The beginning of the next tantra is also given thus

अथेदानीं सन्धिविग्रहो etc.

॥ पञ्चतन्त्रम् ॥

4175. PAÑCATANTRAM.

T. S. Collection No. 682. Substance—Paper. Size—$7\frac{3}{4} \times 5\frac{1}{2}$

inches. Sheets—25. Lines—17 to a Page. Script—Devanāgarī. No. of Granthas—700. Author—Viṣṇuśarman. Incomplete.

Beginning:

श्रीपरदेवतायै नमः ।

अथेदानीमारभ्यते काकोलूकीयं नाम तृतीयतन्त्रम्,

यस्यायमाद्यः श्लोकः—

न विश्वसेत्पूर्वविरोधितस्य
शत्रोरपीष्टत्वमुपागतस्य ।
दग्धां गुहां पश्यत घूकपूर्णां
काकप्रणीतेन हुताशनेन ॥ १ ॥

End:

एवं मत्तका...कर्णचंचलां राज्यलक्ष्मीमवाप्य न्यायैक-निष्ठो भूत्वा उपभुङ्क्ष्व ॥

Colophon:

संपूर्ण चेदं सन्धिविग्रहादिषाड्गुण्यसंबन्धां काकप्रणीतेन हुता-शनेन ॥ ३ ॥

अथेदानीमारभ्यते लब्धप्रणाशनं नाम चतुर्थं तन्त्रम् ॥

इदं पुस्तकं पोतदारबाबाजीनायकानां ज्ञेयम् ॥

श्रीरस्तु ॥

Subject: Pañcatantra—Third tantra.

Remarks:—The Ms. is in good condition. The Ms. belonged to one Potadāra Bābājīnāyaka.

॥ पञ्चतन्त्रम् ॥

4176. PAÑCATANTRAM.

Burnell's Catalogue No. 5114. Page 165. Right column. Substance—Paper. Size—10 × 4½ inches. Sheets—87. Lines—15 to a Page. Script—Devanāgarī. No. of Granthas—3200. Author—Viṣṇuśarman. Complete.

Beginning:

नमो मनुबृहस्पतिपराशरव्यासादिभ्यो महाकविभ्यः ।

मनवे वाचस्पतये शुक्राय पराशराय ससुताय ।
चाणक्याय च विदुषे नमोस्तु सर्वशास्त्रकर्तृभ्यः ॥ १ ॥

सकलार्थशास्त्रसारं
समालोक्य विष्णुशर्मा ।
तन्त्रैः पञ्चभिरेतत्
चकार सुमनोहरं शास्त्रम् ॥

तद्यथानुश्रूयते । अस्ति दाक्षिणात्ये जनपदे महिळापुरं नाम नगरम् । तत्र सकलार्थिसार्थकल्पद्रुमः अपरनृपमुकुटमणिमरीचिचयचर्चितचरणः सकलकलापारङ्गत अमरशक्तिर्नाम राजा बभूव । तस्य त्रयः पुत्राः परं दुर्मेधसो वसुशक्तिरुग्रशक्तिरनेकशक्तिश्चेति बभूवुः । अथ तान् शास्त्रविमुखान्समालोक्य राजा सचिवानाहूय प्रोवाच—भो ज्ञातमेतद्भवद्भिर्यन्ममैते पुत्राः शास्त्रविमुखाः विवेकरहिताश्च तदेतान्पश्यतो मे महदपि राज्यं न सौख्यमावहति । अथवा साध्विदमुच्यते ।

अजातमृतमूर्खेभ्यो मृताजातौ सुतौ वरम् ।

यतस्तौ स्वल्पदुःखाय यावज्जीवोऽन्त्यमो दहेत् ॥ १ ॥

End:

ब्राह्मणोऽपि प्रबुद्धो यावत्पश्यति तावत्समीपे कृष्णसर्पो विदारितवक्त्रो भक्षितकर्पूरपुटिको मृतस्तिष्ठति । तं दृष्ट्वा व्यचिन्तयत् । अहो सत्यमाभिहितं ममांबया यत् द्वितीयः कापुरुषोऽपि सहायः कार्यः । पथि नैकाकिना गन्तव्यम् । अतो मया श्रद्धापूरितचेतसा तद्वचनमनुष्ठितम् । तेनाहं कर्कटेनापि सर्पव्यापादनात् रक्षितः । अथवा साध्विदमुच्यते......... ....

मन्त्रे (तीर्थे द्विजे)देवे दैवज्ञे भिषजे गुरौ ।

यादृशी भावना यत्र सिद्धिर्भवति तादृशी ॥

एवमुक्त्वासौ यथाभिप्रेतं गतः । अतोऽहं ब्रवीमि । काकपुरुषो द्वितीय इति । सुवर्णसिद्धिरपि तं चक्रधरमनुज्ञाप्य स्वगृहं प्रति प्रस्थितः ।

Colophon:

समाप्तञ्चेदं अपरीक्षितकारकं नाम पञ्चमं तन्त्रम् । समाप्तञ्चेति मङ्गलम् ।

(विष्णु)शर्मणा विप्रेण राजकुमाराणां प्रबोधनार्थे पञ्चमं तन्त्रं नाम नीतिशास्त्रं विरचितं समाप्तम् ॥ ५ ॥

संवत् १७३५ वर्षे माघ....॥

Subject: Pañcatantram.

Remarks:—The Ms. is old and is in a decaying condition. This

represents the northern recension. It is dated samvat 1735 or A. D. 1678.

॥ पञ्चतन्त्रम् ॥

4177. PAÑCATANTRAM.

Burnell's Catalogue No. 5115. Page 165. Right column. Substance—Paper. Size—$9\frac{9}{10} \times 4\frac{3}{10}$ inches. Sheets—184 (22-205). Lines—9 or 10 to a Page. Script—Devanāgarī. No. of Granthas—3776. Author—? Incomplete. Wants beginning.

Beginning:

....................शाकटो यथा ।

धृष्यते यो दशालंबी नितंबे विनिवेशितः ॥ १६३ ॥

अलक्तको यथा रक्तो निष्पीड्य पुरुषस्तथा ।

अबलाभिर्बलाद्रक्तः पादमूले निपात्यते ॥ १६४ ॥

End and subject—Same as No. 4175.

Colophon:

इति श्रीपञ्चोपाख्याने अपरीक्षितकरणं नाम पञ्चमं तन्त्रं समाप्तमिति । समाप्तमिदं पञ्चाख्यानकं नाम राजनीतिशास्त्रम् ॥

शुभमस्तु । श्रीरामाय नमः । श्रीकृष्णाय नमः ॥

Remarks:—The Ms. is in a fairly good condition.

॥ बृहत्कथामञ्जरी ॥

4178. BṚHATKATHĀMAÑJARĪ.

Burnell's Catalogue No. 4879. Page 166. Left column.

Substance—Paper. Size—$13\frac{3}{10} \times 5\frac{2}{8}$ inches. Sheets—282. Lines—11 to 13 to a Page. Script—Devanāgarī. No. of Granthas—7300. Author—Kṣemendra. Incomplete. 1-4 Lambhas.

Beginning:

श्रीगणेशाय नमः ॥

उमाप्रणामसङ्क्रान्तचरणालक्तकश्शशी ।
सन्ध्यारुण इवाभाति यस्य पायात्स वः शिवः ॥ १ ॥

सरस्वतीविभ्रमदर्पणानां
सूक्तामृतक्षीरमहोदधीनाम् ।
सन्मानसोल्लाससुधाकराणां
कवीश्वराणां जयति प्रकाशः ॥ २ ॥

ओजोरञ्जनमेव वर्णरचनाश्चित्रा न कस्य प्रिया
नानालङ्कृतयो न कस्य हृदये सन्तोषमातन्वते ।
काव्ये किन्तु सतां चमत्कृतिकृतः सूक्तिप्रबन्धास्फुटं
तीक्ष्णाग्रा झटिति श्रुतिप्रणयिनः कान्ताकटाक्षा इव ॥ ३ ॥

एवं किल पुराणेषु सर्वागमविधायिषु ।
विभु(?)शासनशालिन्या श्रुतौ च श्रूयते कथा ॥ ४ ॥

अस्ति विद्याधरवधूविलासहसितद्युतिः ।
जाह्नवीनिर्झरोष्णीषः शर्वाणीजनको गिरिः ॥ ५ ॥

End:

इत्युक्त्वा प्रददौ तस्मै भोजनं बहळासवम् ।
सोऽपि भुक्त्वा मधुक्षीबो निद्रां भेजे रतिश्रमात् ॥

ऊर्ध्ववेश्मस्थितं साथ संज्ञयाहूय वल्लभम् ।
भर्तारं घातयामास दारकस्यैव पश्यतः ॥

तस्मिन्प्रयाते चुक्रोश चोरैरभिहतेव सा ।
ततस्ससंभ्रमास्सर्वे बान्धवास्तूर्णमभ्ययुः ॥

देवदासं हतं दृष्ट्वा तद्भ्राता शोकविह्वलः ।
विललापाश्रुलुलितं वेष्टमानो महीतले ॥

स्वभार्यया हतं ज्ञात्वा बालकस्य गिरा ततः ।
तां च तत्कामुकं च द्राक् जघ्नुरन्विष्य बान्धवाः ॥

इत्येवं पापशीलानां स्त्रीणां कैर्ज्ञायते गतिः ।

Colophon:

दुश्शीलाख्यायिका ॥

(Sheet No. 242)

इति क्षेमेन्द्रविरचितायां बृहत्कथायां पंचलम्भको नाम त्रयोदशो लम्भकः ॥

Subject: Bṛhatkathāmañjarī 1-14 Lambhas. 14th Incomplete.

Remarks :—The Ms. is in good condition.

The work is available in print having been printed by the Nirṇayasāgara Press, Bombay. The work itself is a summary of the Bṛhatkathā of Guṇāḍhya, which was written in the Prākṛt, technically called Paiśācī. The original is now lost to us.

॥ बृहत्कथामञ्जरी ॥

4179. BṚHATKATHĀMAÑJARĪ.

Burnell's Catalogue No. 4880. Page 166. Left column. Substance—Paper. Size—$9\frac{1}{2} \times 5$ inches. Sheets—365. Lines—9 or 10 to a Page. Script—Devanāgarī. No. of Granthas—7300. Author—Kṣemendra. Incomplete 1—14 Lambhas.

Beginning, end, colophon and subject—Same as No. 4178.

Remarks:—The Ms. is in good condition.

॥ बृहत्कथामञ्जरी ॥

4180. BṚHATKATHĀMAÑJARĪ.

Burnell's Catalogue No. 10231. Page 166. Left column. Substance—Paper. Size—$18\frac{7}{10} \times 1\frac{3}{10}$ inches. Sheets—274. Lines—4 or 5 to a Page. Script—Devanāgarī. No. of Granthas—7300. Author—Kṣemendra. Incomplete. 1-14 Lambhas.

Beginning, end, colophon and subject—Same as No. 4178.

Remarks:—The Ms. is in good condition.

॥ भोजप्रबन्धः ॥

4181. BHOJAPRABANDHAḤ.

Burnell's Catalogue No. 4740. Page 160. Right column. Substance—Paper. Size—$14\frac{1}{8} \times 6$ inches. Sheets—46. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—1210. Author—Ballāla. Complete.

Beginning:

श्रीगणेशाय नमः ।

स्वस्ति श्रीमन्महाराजस्य भोजस्य प्रबन्धः कथ्यते । आदौ धाराराज्ये सिन्धुलसंज्ञो राजा चिरं प्रजां पर्यपालयत् । अस्य च वृद्धत्वे भोज इति पुत्रः समजनि । स यदा पञ्चवार्षिकस्तदा आत्मनो जरां ज्ञात्वा मुख्यामात्यानाहूयानुजं मुञ्जं च महाबलमालोक्य पुत्रं च बालमालोक्य विचारयामास । यदाहं राज्यभारधारणसमर्थं सोदरमपहाय राज्यं पुत्राय प्रयच्छामि तदा पुत्रहानिर्वंशोच्छेदश्च ।

End:

इन्दुं कैरवणीव कोकपटलीवांभोजिनीवल्लभं
मेघं चातकमण्डलीव मधुपश्रेणीव पुष्पावलिम् ।
माकन्दं पिकसुन्दरीव रमणीयात्मेश्वरं प्रोषितं
चेतोवृत्तिरियं सदा नृपवर त्वां द्रष्टुमुत्कण्ठते ॥ ६ ॥

राजा चमत्कृतः प्राह— सुकुमारि त्वां लीलादेव्यनुमत्या स्वीकुर्म इति धारानगरं नीत्वा तथैव स्वीकृतवान् ॥

Colophon:

इति श्री भोजचरितं सम्पूर्णम् ॥

ईश्वरे भाद्रकृष्णे च द्वितीया स्थिरवासरे ।
गोपालाख्येन लिखितं चरितं भोजभूपतेः ॥ १ ॥

श्रीरस्तु ॥

Subject: Bhojaprabandha.

Remarks:—The Ms. is in excellent condition. The work pur-

ports to be a history of Bhoja, the king of Dhārā. In fact it is a collection of certain fantastic stories, bringing together a number of tales about Bhoja, Kālidāsa and others. The work has been published by the Nirṇayasāgar Press, Bombay.

॥ भोजप्रबन्धः ॥

4182. BHOJAPRABANDHAḤ.

Burnell's Catalogue No. 4739. Page 160. Right column. Substance—Paper. Size—$9\frac{7}{10} \times 5\frac{1}{10}$ inches. Sheets—56. Lines—10 or 11 to a Page. Script—Devanāgarī. No. of Granthas—1210. Author—Ballāla. Complete.

Beginning, end and subject—Same as No. 4180.

Colophon: Nil

Remarks: —The Ms. is in good condition.

॥ भोजप्रबन्धः ॥

4183. BHOJAPRABANDHAḤ.

Burnell's Catalogue No. 4741. Page 160. Right column. Substance—Paper. Size—11×4 inches. Sheets—52. Lines—9 to 10 to a Page. Script—Devanāgarī. No. of Granthas—1210. Author—Ballāla Complete.

Beginning, end, colophon and subject—Same as No. 4181.

Remarks:—The Ms. is in a fairly good condition. One corner of the left side is eaten by the rat. The father's name of Bhoja is given in this Ms. as बन्धुल instead of सिन्धुल.

॥ भोजप्रबन्धः ॥

4184. BHOJAPRABANDHAḤ.

Burnell's Catalogue No. 10256. Page 160. Right column. Substance—Palm leaf. Size—$16\frac{3}{8} \times 1\frac{1}{8}$ inches. Leaves—25. Lines—7 to 11 to a Page. Script—Grantha. No. of Granthas—1050. Author—Ballāla. Incomplete.

Beginning—Same as No. 4181.

End:

दत्ता तेन कविभ्यः पृथ्वी सकलापि कनकसंपूर्णा ।
दिव्यां सुकाव्यरचनां श्रमं च तेषां तु यो विजानाति ॥

अधरस्य मधुरिमाणं
कुचकाठिन्यं दृशो(श्च)स्तैक्ष्ण्यम् ।
कवितायाः परिपाकं
ह्यनुभवरसिको विजानाति ॥

अपूर्वो भाति भारत्याः
काव्यामृतफले रसः ।
चर्वणे सर्वसामान्ये
स्वादुवित्केवलं कविः ॥

Colophon: Nil.

Subject: Bhojaprabandha. Incomplete.

Remarks:—The Ms. is in a fairly good condition.

॥ भोजप्रबन्धः ॥

4185. BHOJAPRABANDHAḤ.

Burnell's Catalogue No. 10843(b). Page 114. Right column,

Substance—Palm leaf. Size—15×1½ inches. Leaves —51. Lines—5 to a Page. Script—Grantha. No. of Granthas—765. Author—Ballāla. Incomplete.

Beginning—Same as No. 4181.

End:

ततो राजा तयोर्हरिशर्मदेवजययोरन्योन्यवैरं ज्ञात्वा मिथ आलिङ्गनादिना वस्त्रालंकारादिदानेन च मित्रत्वं व्यधात्। ❀ ❀ इति राजा देवानां सुखं कृतं सचाह। निवासं काद्य...मोजनक काचलः। इति व्य....योहा वा भोजा वार्तेति न्यूनता.... ॥

Colophon: Nil

Subject: Bhojaprabandha.

Remarks:—The Ms is very much worn out. The other work contained in this Ms. is Tattvacintāmaṇi (Anumāna) of Gaṅgeśopādhyāya.

॥ भोजप्रबन्धः ॥

4186. BHOJAPRABANDHAḤ.

J. L. Collection No. 38. Substance—Paper. Size—9½×3¾ inches. Sheets—18. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—350. Author—Ballāla. Incomplete.

Beginning—Same as No. 4181.

End:

मयूरः।

ते वन्द्यास्ते महात्मानः तेषां लोके स्थिरं यशः।
यैर्निबद्धानि काव्यानि ये च काव्ये प्रकीर्तिताः॥

....

कवीनां मार्गेऽस्मिन्स्फुरति बुधमात्रस्य धिषणा ॥

Colophon: Nil

Subject: Bhojaprabandha.

Remarks:—The Ms. is in much worn out.

॥ भोजप्रबन्धः ॥

4187. BHOJAPRABANDHAḤ.

Burnell's Catalogue No. 4742. Page 160. Right column. Substance—Paper. Size—$9\frac{1}{2} \times 4\frac{1}{4}$ inches. Sheets—13. Lines—9 to a Page Script—Devanāgarī. No. of Granthas—250. Author—?, Incomplete.

Beginning:

श्रीगणेशाय नमः ॥

ॐकारः कल्पकारस्करनिकरतिरस्कारिदानातिरेकः
शब्दब्रह्मैकरत्नाकरहिमकिरणः कारणं मङ्गळानाम् ।
देयाद्वश्शुद्धबुद्धिं निरवधिमहिमाम्भोनिधिस्सार्वसिद्धा-
चार्योपाध्यायसाधूनभिदधदधिकं धीमदाराधनीयः ॥

जयति जिनपतिः श्रीपार्श्वदेवस्स दिव्य-
द्रुम इव सुरसेव्यः सर्वदत्ते हितार्थः ।
मणिकुसुमसमूहं बिभ्रती यस्य मौळौ
फणिपतिफणमाला कल्पवल्लीव रेजे ॥ २ ॥

श्रीवाग्देवी शरदिजनिशारत्नरोचिश्शरीरा
सर्वाङ्गीणाभरणकिरणारम्यमाणेन्द्रचापा ।

देयादर्हद्वदनकमलोत्सङ्गलीलामराली
कल्याणं वः कविकुलमनःकामनाकामधेनुः ॥ ३ ॥

श्रीसोमसुन्दरगुरुं
भूरीश्वरं रत्नशेखराचार्यम् ।
श्रीनन्दिरत्नसुगुरुं
वन्दे भक्त्या त्रिसन्ध्यमहम् ॥ ४ ॥

दृष्टश्रुतश्रीलघुभोजभूप-
प्रभूतसंबन्धनिधानकल्पम् ।
प्रबन्धराजं रचयामि गद्यै-
र्विनोदहेतोस्सुधियामनल्पम् ॥ ५ ॥

इह हि भोजनपाशकादिकदृष्टान्तदशकदुरासदम-
त्रकर इव माणिक्यम्, क्षारसमुद्र इव मिष्टपानीयकूप-
मसारे संसारे मानुष्यमासाद्य सद्यः सुधिया निर्धनेनेव
धनाय श्रीजेन धर्माराधनाय विधेयः प्रयत्नः ॥

यतः ।

राज्यं निस्सचिवं गतप्रहरणं सैन्यं विनेत्रं मुखं
वर्षा निर्जलदा धनी च कृपणो भोज्यं तथाज्यं विना ।
दुश्शीला दयिता सुहृन्निकृतिमान्राजा प्रतापोज्झितः
शिष्यो भक्तिविवर्जितो न हि विना धर्मं नरश्शस्यते ॥ ६ ॥

End:

कूटः कङ्कणवायुरेवायं उज्जयिन्याश्चाटितोऽस्ति यन्मध्ये
आगतं किमपि वस्तु बहिर्न निस्सरतीति । एवंविधास्तु
नगर्यो बह्वयोपि सन्ति । परं 'क्षीरनीरविकोऽयं मीनाना-

मपि विद्यते । प्रसिद्धो राजहंसस्य यशः पुण्यैरवाप्यते ॥'
॥ ५ ॥ तां वार्तां सप्तमगवाक्षस्था धारागणिका श्रुत्वा
पुरी पानीयोत्तारभयाद्गवाक्षादुत्तीर्याह— भो किमस्ति
वस्तु यन्नगर्यां न विक्रीयते । वालुकाः सन्तीति तेनोक्ते
साह— कथमर्पयसि । तेनोक्तं —अधोमुखपापेनार्प-(?)
यामि । प्राघ्वरेण लामितेनोक्तं । किं ग्रहीष्यसि । तेना-
भाणि— तैलमित्युक्ते वेश्यया पुरुषप्रमाणादर्शपृष्ठेन धूळि
गृहीता । प्राघ्वरेण दर्शेन तैलं दत्तम् । वंचितश्रेष्ठी रक्षतं
पुरपानीयं कियत्तैलं लात्वा स्वस्थाने गतः । तया नगर-
परिसरे शिकताराशिरकारि गिरिसङ्काशः । वाह्केल्यां वि-
लसन् भोजस्तं रा................ ॥

Colophon: (Sheet No. 12)

इति प्रबन्धराजे भोजजन्ममुञ्जस्वर्गमनवाच्योऽधिकारः प्रथमः ॥

मुञ्जस्वर्गमनप्रबन्धः ।

Subject: Bhojaprabandha 1, 2, Prabandha 1st complete 2nd beginning only.

Remarks:—The Ms. is in good condition and is full of scriptorial errors. This author is different from Ballāla.

A Jaina seems to have been the author of this work. As preserved, the work is incomplete.

॥ माधवानलकथा ॥

4188. MĀDHAVĀNALAKATHĀ.

Burnell's Catalogue No. 5081. Page 160. Right column.

Substance—Paper. Size—10¼ × 4¼ inches. Sheets—16. Lines—8-11 to a Page. Script—Devanāgarī. No. of Granthas—430. Author—? Complete.

Beginning:

श्रीमङ्गळमूर्तये नमः ॥

प्रणम्य परया भक्त्या हंसयानां सरस्वतीम् ।
यस्य प्रसादमासाद्य करिष्यामि कथामिमाम् ॥ १ ॥

अस्ति सकलसंसारतिलकभूता पुष्पावती नाम नगरी । यत्र हि—

निरामया निरातङ्कास्सन्तुष्टाः परमायुषाः ।
यस्यां निवसन्ति सुखैः कालज्ञाता इव प्रजाः ॥ २ ॥

तत्र राजा गोविन्दचन्द्रो नाम । तस्य राज्ञी सप्तशतानि (?) । तासां मध्ये रुद्रा महादेवी पट्टराज्ञी वर्तते । यतो योषितां चतस्रो जातयः । प्रथमतः पद्मिनी । तस्याः लक्षणम् ।

भवति कमलनेत्रा नासिका क्षुद्ररन्ध्रा
अविरळकुचयुग्मा दीर्घकेशी कृशाङ्गी ।
मृदुवचनसुशीला नृत्तगीतानुरक्ता
कलभतनुसुवेशा पद्मिनी पद्मगन्धा ॥

End:

ततो वेताळेनागत्यामृतं तयोरुपरि क्षिप्तम् । क्षणमात्रेण द्वावपि जीवितौ । ततो राजा सहर्षो जातः ।

विजेतव्या लङ्का चरणतरणीयो जलनिधिः
विपक्षः पौलस्त्यो रणभुवि सहायाश्च कपयः ।

तथाप्येको रामः सकलमवधीद्राक्षसकुलं
क्रियासिद्धिस्सत्वे वसति महतां नोपकरणे ॥ १ ॥

ततो राज्ञा विक्रमादित्येन तयोर्विवाहः कारितः ॥
लोकास्तु हर्षतो(?)भूताः ॥

Colophon:

इति माधवानलकथा समाप्ता ॥

Subject: Mādhavānalakathā.

Remarks:—The Ms. is in a fairly good condition. A paper transcript of this work is available in this library. See T. V. No. 419. The work seems to be a portion of the Vetālapañcavimśati.

॥ विक्रमार्कचरितम् ॥

4189. VIKRAMĀRKACARITAM.

Burnell's Catalogue No. 5105. Page—166. Right column. Substance—Paper. Size—$8\frac{1}{2} \times 4\frac{1}{8}$ inches. Sheets—121. Lines—8 or 9 to a Page. Script—Devanāgarī. No. of Granthas—1920. Author—? Complete.

Beginning:

श्रीगणेशाय नमः ॥

पुरा लङ्केश्वरभुजाकेयूरनिकषोपले ।
शैले शैलेन्द्रसुतया जगदे जगदीशिता ॥ १ ॥

देव चित्रकथाः काश्चिदन्तरालस्य मोचनीः ।
मह्यं शुश्रूषवे ब्रूहि मनः प्रह्लादिनीश्शुभाः ॥ २ ॥

अथोवाच महादेवो भवानीं प्रीतमानसः ।
शरच्चन्द्रांशुनिष्यन्दसुधामधुरया गिरा ॥ ३ ॥

अस्ति सिंहासनं किंचिद्दुहनीयं महत्तरम् ।
परितस्तस्य विद्यन्ते द्वात्रिंशत्सालभंजिकाः ॥ ४ ॥
कदाचिदुचिते काले कलाकुशलसङ्कुले ।
भोजराजसभामध्ये कथयन्ति स्म ताः कथाः ॥ ५ ॥

End:

इत्युक्तः पुत्रिकावृन्दैः भोजराजोऽवदत्पुनः ।
पुत्रिका वः प्रसादेन सर्वमाशास्यमस्ति मे ॥
युष्मद्दर्शनतोऽन्यत्र किं वा श्रेयो मयार्थ्यते ।
तथापि विक्रमार्कस्य भवतीभिर्ममेरितम् ॥
चरितं शृण्वतां पुंसां सन्तु सर्वा विभूतयः ।
तथेति भोजभूपालं पुण्यश्लोकशिखामणिम् ॥
अभिष्टुत्याभवन्सर्वाः प्रसन्नाः पुत्रिका भृशम् ।
भोजोपि भुवनश्लाघ्यं सिंहासनमुपेयिवान् ॥
शशास धरणीमेनां शङ्कराराधनोत्सुकः ॥

Colophon:

इति विक्रमादित्यचरिते सिंहासनद्वात्रिंशत्सालभञ्जिकायां द्वा-
त्रिंशत् (?) कथा ॥

इति द्वात्रिंशत्सालभञ्जिका समाप्ता ॥

श्रीसांबसदाशिवार्पणमस्तु ॥

यादृशं पुस्तकं + मम दोषो न विद्यते ॥

Subject: Vikramārkacaritam or Dvātrimśatsālabhañjikā.

Remarks :—The Ms. is in good condition. The mythical story of Vikramāditya who ascended the famous throne which had 32 steps and a Sālabañjikā in each step is narrated in this

work. It has been published several times over.

॥ विक्रमार्कचरितम् ॥

4190. VIKRAMĀRKACARITAM.

Burnell's Catalogue No. 10221. Page 166. Right column. Substance—Palm leaf. Size—16 × 1 3/10 inches. Leaves—67. Lines—8 to a Page. Script—Grantha. No. of Granthas—1920. Author— Complete.

Beginning, end, colophon and subject—Same as No. 4189.

Colophon:

संवत्सरे प्रभवनामके शुभे द्वन्द्वस्थिते भास्वति शुक्लपक्षे शुक्रपञ्चम्या सहिते च नारायणेन गाथा लिखिता समाप्ता ॥

Remarks:—The Ms. is in good condition.

॥ विक्रमार्कचरितम् ॥

4191. VIKRAMĀRKACARITAM.

Burnell's Catalogue No. 10218. b Page 166. Right column. Substance—Palm leaf. Size—16 × 1 3/10 inches. Leaves—86 (58-143). Lines—6 or 7 to a Page. Script—Grantha. No. of Granthas—1900. Author—? Incomplete.

Beginning:

अन्यदीयोऽपि लिखितः श्लोको यः प्रक्रमागतः ।
...ल्पगत्वात् ग्रन्थविस्तर........................ ॥

पुरा लङ्केश्वरभुजा etc., Same as No. 4189.

End:

अत्र सिंहासने स्थित्वा सहस्रं शरदां सुखम् ।
भुवं पाल्य..................... च ॥

....सुखीतिष्ठेत्यनुजग्राह चैषा माम् ।
विदग्धावागुपन्यासद्वात्रिंशत्पुत्रिका युतम् ॥

सामर्थ्यं विद्यते कस्य तत्त्वमारोह रे ध्रुवम् ।
अहमप्यद्य दास्यामि बुद्ध्यैव भवते प्रभो ॥

द्वितीयं भुवि साहस्रं हायना नाम संशयम् ।
इत्युक्ते कुत एवैतदिति पृ.................. ॥

Colophon: (Leaf No. 140).

इति सिंहासनद्वात्रिंशिकायां वेतालकथा एकत्रिंशती

Subject: Vikramārkcarita.

Remarks:—The Ms. is decaying.

॥ विक्रमार्कचरितम् ॥

4192. VIKRAMĀRKACARITAM.

Burnell's Catalogue No. 10222. Page 160. Right column. Substance—Palm leaf. Size—14×1—inches. Leaves—102. Lines—6 or 7 to a Page. Script—Grantha. No. of Granthas—1900. Author—Nandikeśvara. (Wants beginning).

Beginning:

........जस्य मङ्गला रात्रिका कृता ।
नानाविधानि वाक्यानि सहितानि सहस्रशः ॥

पौराश्चालङ्कृताश्चासन्यथा.............................. ।
वक्तुं मुहूर्तं दैवज्ञाः प्राप्तास्त्रिस्कन्धवेदिनः ॥
भोजराजोऽपि वेगेन व्यधादभ्यङ्गमज्जनम् ।

End:

इत्याशिषः प्रयुज्याथ देव्यो मौनं प्रपेदिरे ।
ततो भोजमहीपालस्तस्मिन्सिंहासनोत्तमे ॥
ब्राह्मणैरभ्यनुज्ञातः सुहृद्बन्धुजनैस्सह ।
आरूढः पृथिवीं कृत्स्नां पालयामास भूपतिः ॥
विजितविमतं शौर्याद्भूमेरुपद्रवशान्तये
सकलजनतारक्षो दक्षस्स्वधर्मविवृद्धये ।
रचितगुणसूक्त्यै शश्वत्कलापरिशीलनात्
सुरपतिमुदे धर्मादवादीत्स भोजनृपो महीम् ॥

Colophon:

इति श्रीमन्नन्दिकेश्वरविरचितायां सिंहासनद्वात्रिंशिकायां विक्रमादित्यगुणप्रशंसनद्वारेण द्वात्रिंशत्सालभञ्जिकाशापमोक्षो नाम द्वात्रिंशत्कथा ॥

Subject: Vikramārkacarita.

Remarks:—The Ms. is in a decaying condition. This Ms. gives the name of the author of the work as Nandikeśvara.

॥ विक्रमार्कचरितम् ॥

4193. VIKRAMĀRKACARITAM.

Burnell's Catalogue No. 5106. Page 166. Right column.

Substance—Paper. Size—$9\frac{3}{5} \times 3\frac{4}{5}$ inches. Sheets—109. Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—1635. Author—Nandīśvarayogī. Incomplete.

Beginning:

श्रीगणाधिपतये नमः श्रीसांबाय परस्मै ब्रह्मणे नमः ।
श्रीगुरुचरणारविन्दभ्यां नमः ।
नरनारायणभुजा केयूरनिकषोपले । etc.,

Same as No. 4189.

End:

इत्थं शनैर्लब्धवरोऽवरुह्य नगरं ययौ ।
त्वमेवावर्तितुं शक्तो भूषयैतद्वरासनम् ॥

तद्दारुपुत्रिकावाक्यप्रलोभितमनोरथः ।
पुनरन्तःपुरं राजा भोजानां प्रत्यपद्यत ॥

Colophon:

इति सिंहासनद्वात्रिंशिकायां पञ्चविंशतिका कथा ।

Subject: Vikramārkacaritam 1-25 Kathās.

Remarks:—The Ms. is in good condition.

The first śloka

"पुनः कदाचित् + संस्कृता"

of the 26th kathā is given after the colophon. The last page contains the following:

श्रीतुलजाराजस्येदं पुस्तकम् ।
सिंहासनपंचवीसी ॥ २५ ॥
सिंहासनबतीशी पैकीं कथा ॥ २५ ॥

The owner of this Ms. was Tulajārāja.

॥ विक्रमार्कचरितम् ॥

4194. VIKRAMĀRKACARITAM.

Burnell's Catalogue No. 5107. Page 166. Right column. Substance—Paper. Size—10 $\frac{3}{10}$ × 4 inches. Sheets—87. Lines—7 or 8 to a Page. Script—Devanāgarī. No. of Granthas—1400. Author—Nandīśvarayogī. Incomplete. 3-25 Kathās.

Beginning:

इति दि॰यलापिकाः ॥

ततश्च विक्रमादित्यो ररक्ष क्षितिमण्डलम् ।
भूदेवानपि देवांश्च पूजयामास भक्तिमान् ॥

पुपोषानुदिनं दीनाननाथान्कृपणादिकान् ।
स्वापराधावरोधेन दुर्विनीतांश्च शिक्षयन् ॥

End:

अतिथीनां तथा पूजा प्रसङ्गस्सततं सताम् ।
विद्याभ्यासविधात्रास्था धर्मकार्येष्वतित्वरा ॥

मैत्रकैतवनिर्मुक्तो सर्वत्राप्यनवाक्क्रिया ।
एवंविधा गुणगणाः धर्मस्यावयवाः प्रभो ॥
भवन्तमाश्र........................ ।

Colophon: (Sheet No 87).

इति विक्रमादित्यचरिते चतुर्विंशतिकथा ॥

Subject: Vikramārkacaritam 3-25 Kathās.

Remarks:—The Ms. is in good condition.

॥ विक्रमार्कचरितम् ॥

4195. VIKRAMĀRKACARITAM.

J. L. Collection No. 603. Substance—Paper. Size—11½ × 5 inches. Sheets—37. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—1100. Author—?. Complete.

Beginning:

श्रीगणेशाय नमः ।

अनन्तशब्दार्थगतोपयोगिनः
पश्यन्ति पारं न हि यस्य योगिनः ।
जगत्त्रयाशेषतमोविनाशकं
ज्योतिः परं तज्जयति प्रकाशम् ॥ १ ॥

अनेकवैचित्र्यमयं जगत्त्रयं
प्रयाति साक्षात्प्रतिबिंबरूपताम् ।
यस्यानिशं ज्ञानमयैकदर्पणे
प्रणौमि तं श्रीभगवन्तमादिमम् ॥ २ ॥

ये पूजनीयाः सुमनस्समूहैः
ते सन्तु मे श्रीगुरवः प्रसन्नाः ।
तदा नवो यत्प्रतिभाप्रकर्षः
पुनन्तु ते श्रीकवयश्च वाचम् ॥ ३ ॥

सकलसुरासुरनरनिकरनायकप्रणतपादारविन्दश्रीसर्वज्ञशासनप्रभावकस्य परमगुरुश्रीसिद्धसेनदिवाकरस्य प्रणीतोपदेशपेशलविवेकस्य जगदद्भुतधैर्यगाम्भीर्यपरमौदा-

र्यादिगुणगणालङ्कृतस्य विक्रमाक्रान्तत्रिविक्रमस्य श्री-विक्रमनरेश्वरस्य कश्चित्प्रबन्धः प्रारभ्यते ॥

तस्यायं पूर्वकविसम्प्रदायः । यत्पूर्वं देवताधिष्ठित-चन्द्रकान्तरत्नमयसिंहासनस्थाभिः द्वात्रिंशत्पुत्रिकाभिः प्रवरराज्यलक्ष्मीनिवासाम्भोजस्य श्रीभोजनरेश्वरस्य पुरतो महाश्चर्यमयद्वात्रिंशत्कथानकैः श्रीविक्रमादित्यगु-णोत्कीर्तनं चक्रे ।

तत्र केपि जिज्ञासवः कथयन्ति । कस्य तत्सिंहासनं केन कस्यार्पितं कथं भोजेन लब्धं कानि कानि कथान-कानि इति । तत्सर्वमावेद्यमानं श्रूयताम् । तथाहि— कृत-चतुष्पुरुषार्थप्रवेशे माळवदेशे अनीतिलतालवनासिधारारा-जनीतिवल्लीवितानवारिधारा अनेकपुरुषस्त्रीरत्नधारा धा-रानाम पुरी ॥

End:

तत्सिंहासनं यदा तुष्टेन शक्रेण श्रीविक्रमाय दत्ता तणो(?)त्प्रोक्तं यदा तु मनुष्यलोके भोजराजसभायां श्रीविक्रमादित्यस्य यथास्थितगुणोत्कीर्तनं करिष्यथ तदा युष्माकं पुनर्दिव्यदेहं स्वर्गागमनं भविष्यति नान्यथा । अतो राजन् त्वयास्माकं तव प्रसादेन शापानुग्रहो ... तेन तुष्टा वयम् । त्वं याचस्व किमपि वरम् । ततो राजा प्राह नाहं याच्ञां कुर्वे । न च मे केनापि प्रयोजनम् । ततस्ता प्राहुः... जराजकश्चित(?) एतत् श्रीविक्रमादित्य-चरितं देवाङ्गनासंवादसुन्दरं पठिष्यति तस्य श्रुति-

कीर्तिलक्ष्मी स.... कल्याणावाप्तिर्भविष्यतीति वरं दत्वा देवाङ्गनाः स्वर्गं जग्मुः । श्रीभोजस्तु जलधिमेखलाया-मखण्डशासनः चिरेण राजलक्ष्म्याः ... ॥

Colophon:

इति सिंहासनद्वात्रिंशिका समाप्ता ।

शुभमस्तु ।

संवत् १८११ समये वैशाख शुटि १२ रवौ अकबरपाति साहराज्ये लहौ रशुभस्थाने ॥ श्रीकृष्णाय नमः । श्रीरामाय नमः ॥

Subject: Vikramārkacaritam.

Remarks:—The Ms. is in good condition. This Ms. is dated Samvat 1811 or A. D. 1754.

॥ वेतालपञ्चविंशतिः ॥

4196. VETĀLAPAÑCAVIMŚATIḤ.

Burnell's Catalogue No. 5103. Page 167. Left column. Substance—Paper. Size—$10\frac{1}{2} \times 4\frac{3}{5}$ inches Sheets—82. Lines—6 to 9 to a Page. Script—Devanāgarī. No of Granthas—1250. Author—?. Complete.

Beginning:

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥

अथ व्रजन्दक्षिणाशां दयितावापि दक्षिणाम् ।
मृगाङ्कदत्तो विपिनं विवेश सचिवैः सह ॥

ततो मध्याह्नविस्फूर्तिप्रचण्डकिरणे रवौ ।
अध्वन्यवनितातापदह्यमान इवाखिले ॥

पङ्कावगाहसन्नद्धमहिषक्रोडकुञ्जरे ।

लोके प्रत्यग्रदिग्दाहधूमपुञ्जैरिवावृते ॥

End :

इत्युर्वीवलये तुषारकिरणस्पष्टाट्टहासच्छविः

पाताले फणिनायकस्फुटफणानिष्फारफेनोज्वला ।

व्योम्नि ब्रह्म विमानहंसविकसत्कान्तिप्रकाशद्युतिं

तस्याकल्पमनल्पपुण्यपदवी गंगेवकीर्तिर्बभौ ॥

Colophon:

इति वेतालपञ्चविंशतिस्समाप्ता

श्रीसदाशिवार्पणमस्तु ॥

Subject: Vetālapañcaviṃśati.

Remarks:—The Ms. is in a good condition.

॥ वेतालपञ्चविंशतिः ॥

4197. VETĀLAPAÑCAVIMŚATIḤ.

Burnell's Catalogue No. 10218 a. Page 167. Left column. Substance—Palm leaf. Size—16 × 1 3/8 inches. Leaves—52 (6-57). Lines—6-7 to a Page. Script—Grantha. No. of Granthas—1000. Author—?. Complete. Wants beginning.

Beginning:

....................विश्वपदा ॥

तां विलोक्येन्दुवदनां नयनानंदकौमुदीम् ।

सहसा राजपुत्रोऽभूत्किमप्युल्लासमानसः ॥

सापि तं वीक्ष्य मदनसदृशं तं............ ।
बभौ बालानिलालोला वल्लीव ललिताकृतिः ॥
लीलावती समादाय सा निजं......... ।

End, colophon and subject—Same as No. 4196.

Remarks:—After the colophon is found:—

पिङ्गलसंवत्सरे वृश्चिकमासे कृत्तिकानक्षत्रशुभयोगशुभकरणयुक्तायां पौर्णमास्यां पुण्यतिथौ शैवसिद्धान्तनिरूपणशिवपुरज्ञानप्रकाशसत्यज्ञानदर्शनपादाम्बुज अचञ्चलापयुक्तायां अघोरदेवदेशिका वेतालपञ्चविंशतिः ।

वाद्ध्यार् अरुणनादिदेवन् स्वहस्तलिखितम् ।

सोमास्कन्दाय नमः ॥

॥ वेतालपञ्चविंशतिः ॥

4198. VETĀLAPAÑCAVIMŚATIḤ.

Burnell's Catalogue No. 10219. Page 167. Left column. Substance—Palm leaf. Size—$14\frac{29}{10} \times 1\frac{2}{8}$ inches. Leaves—73. Lines—4 to a Page. Script—Telugu. No. of Granthas—1000. Author—?. Incomplete. (Stories 1-22.)

Beginning:

स्फूर्जत्प्रचण्डमार्तण्डकिरणाकुलकारणे ।
अध्वन्यवनितातापाद्दह्यमान इवाखिले ॥

etc., Same as No. 4196.

End:

इति श्रुत्वैव वेतालो गत्वा पुनरलम्बत ।
नृपोऽपि तं गृहीत्वा तु प्रययौ लघुविक्रमः ॥

Colophon:

इति द्वाविंशो वेतालः

Subject: Vetālapañcavimśati.

Remarks:—The next vetāla begins after the colophon. The Ms. is in good condition.

॥ वेतालपञ्चविंशतिः ॥

4199. VETĀLAPAÑCAVIMŚATIḤ.

Burnell's Catalogue No. 10220. Page 167. Left column. Substance—Palm leaf. Size—$18\frac{1}{10}\times1\frac{3}{10}$ inches. Leaves—59. Lines—6 to a Page. Script—Grantha. No. of Granthas—1000. Author—?. Incomplete (stories 1-22).

Beginning, end, colophon and subject— Same as No. 4198.

Remarks:—The Ms. is in good condition.

॥ वेतालपञ्चविंशतिः ॥

4200. VETĀLAPAÑCAVIMŚATIḤ.

Burnell's Catalogue No. 10232. Page 167. Left column. Substance—Palm leaf. Size—$15\frac{1}{2}\times1\frac{1}{8}$ inches. Leaves—26. Lines—8-9 to a Page. Script—Grantha. No. of Granthas—450. Author—?. Incomplete (stories 1-15).

Beginning:

शुक्लां + शान्तये ॥ अथ व्रजन्

etc., Same as No. 4196.

End:

चक्रवर्तिश्रियं भेजे ततो जीमूतवाहनः ।
स प्राप्य काञ्चनपुरं हिमाद्रिशिखरे स्थितम् ॥

पित्रा(तृ)सेवावृतो राज्ये रराम दयितासखः ।
कथयित्वेति वेतालः पप्रच्छ क्ष्माविशेषकम् ॥

Colophon: (Sheet No. 22.)

इति बृहत्कथामञ्जर्यां पञ्चदशो वेतालः

Subject: Same as No. 4196.

Remarks:—The Ms. is in good condition.

॥ वेतालपञ्चविंशतिः ॥

4201. VETĀLAPAÑCAVIṀŚATIḤ.

Burnell's Catalogue No. 5104. Page 166. Right column. Substance—Paper. Size—7½ × 4 inches. Sheets—44 (29th and 30th wanting.) Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—500. Author—Śivadāsa. Incomplete.

Beginning:

श्रीगणेशाय नमः ॥

प्रणम्य शिरसा देवं गणनाथं गणाधिपम् ।
लोकानां हि विनोदाय करिष्येऽहमिमां कथाम् ॥

प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः ।
विघ्नैस्सहस्रगुणिरपि(ः पुनः पुनरपि प्रति)हन्यमाना
प्रारब्धमुत्तमगुणा न परित्यजन्ति ॥

केचित्प्राञ्जल(?)तिष्ठन्ति केचिद्वक्त्रवचो बुधाः ।
केचित्कथारसं कान्तमतस्सर्वं विधीयते ॥

अस्ति दाक्षिणापथे प्रतिष्ठानं नाम नगरम् । तत्र राजा विक्रमसेनो नाम ।

..........मंगिवर्गयुक्तपुरस्कृतः ।

कंदर्प इव रूपाढ्यो हरिवज्जनवल्लभः ॥

End

राज्ञोक्तम् । यदि देवि त्वं तुष्टासि पुत्रं देहि सुशोभनम् ।

देव्योक्तम् । पुत्रस्ते भविता राजन् शूरो धीरपराक्रमः ॥ १५ ॥

राजा तत्र गव्यूतिप्रमाणेन मालवणिचण्डिकायां भुवनमालापितं अग्रे चतुरस्रं कुण्डं मत्सरोवरम्........... ॥

Colophon: (sheet 42)

इति शिवदासविरचितं पञ्चमीकथानकम् ॥

Subject: Same as No. 4196.

Remarks:—The Ms is full of scriptorial errors. The Ms. is well preserved.

॥ शुकसप्ततिः ॥

4202. ŚUKASAPTATIḤ.

Burnell's Catalogue No. 5108. Page 167. Left column. Substance—Paper. Size—$7\frac{4}{5} \times 1\frac{7}{10}$ inches. Sheets—165. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—2640. Author—? Complete.

Beginning:

श्रीगणेशाय नमः ।

सख्यो यथार्हमभिपूज्य सप्रदक्षिणं प्रणामं निर्माय

आत्मानं पुत्रविषयिणं कर्तुमुपक्रमे मेदिनीनायकप्रियः। भो तत्रभवतो भवन्तः—प्रत्येकशो बृहस्पतिसमानवैभवाः। तर्हि मम संपत्तिरतिशायिनी। नाहं धनस्य विद्यमानस्य संख्यां कलयामि। परं तु मम तनयो नास्ति। किमत्र कारणम्? ततस्तैः समस्तैरपि संभूय जगदे।

End:

अन्येद्युः विनयकन्दर्पः पृथिवीपतिः प्रभावतीमन्दिर-मियाय। प्रभावती च निजमन्दिरमागतं महीपालं महता प्रेमभरेण संदर्शनेन संभाव्य तत्रोपवेष्टुं सिंहासनमचीक्लृ-रत्। राजा च सिंहासनमध्यरुक्षत्। तदा पञ्जरशायिनं कीरं निरीक्ष्य तं जिघांसुः मार्जारः क्रियासमभिहारेण विरौति स्म। तथा रोरूयमाणं मार्जारं प्रोवाच शुकः:

किं त्वं रोदिषि मार्जार न चारिर्न च तस्करः।
नन्दभूपकुमारोऽयं परनारीसहोदरः॥

इत्थं कीरगिरमाकर्ण्य बद्धमौन एव निरगात् विनयक-न्दर्पः॥

Colophon:

इति कथाकोशे शुकसप्ततिः समाप्ता॥

Subject: **Śukasaptatiḥ.**

Remarks:—The Ms. is in good condition. The work is a collection of stories as narrated by a parrot to its mistress. The German edition of the Śukasaptati is noteworthy.

॥ शुकसप्ततिः ॥

4203. ŚUKASAPTATIḤ.

Burnell's Catalogue No. 12341. Page 167. Left column. Substance—Paper. Size—14×6 inches. Sheets—93. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—2325. Author—? Incomplete.

Beginning—Same as No. 4202.

End:

ततस्ते आगते अभिवीक्ष्य सर्वेऽप्यहमहमिकयात्मानि
परीक्ष्य वैचक्षण्यं बिभ्राणाः परिवार्य वीक्षितुं प्रावर्तिष्टत।
परं न कश्चन निर्णेतुमीष्टे। राजा त........॥

Colophon:

इति सप्तपञ्चाशत्कथा।

Subject: Śukasaptatiḥ. Incomplete.

Remarks:—The Ms. is in good condition.

॥ हितोपदेशः ॥

4204. HITOPADEŚAḤ.

P. A. Collection No. 347. Substance—Paper. Size—$8\frac{1}{2}\times6\frac{3}{4}$ inches. Sheets—118. Lines—16-24 to a Page. Script—Devanāgarī. No. of Granthas—2500. Author—? Incomplete.

Beginning:

श्रीविश्वेश्वराय नमः। हितोपदेशः।

सिद्धिः साध्ये सतामस्तु प्रसादात्तस्य धूर्जटेः।
जाह्नवीफेनलेखेव यन्मूर्ध्नि शशिनः कला॥ १॥

श्रुतो हितोपदेशोऽयं पाटवं संस्कृतोक्तिषु ।
वाचां सर्वत्र वैचित्र्यं नीतिविद्यां ददाति च ॥ २ ॥

End:

तन्ममसम्मतेन तदेव क्रियताम् ।
अश्वमेधसहस्राणि सत्यं च तुलया धृतम् ।
अश्वमेधसहस्राद्धि सत्यमेवातिरिच्यते ॥

Colophon:

इति हितोपदेशे विग्रहो नाम तृतीयः कथासङ्ग्रहः समाप्तः ॥

Subject: Hitopadeśa 1-5 parts 4th Incomplete.

Remarks:—The Ms. is in a decaying condition.

॥ हितोपदेशः ॥

4205. HITOPADEŚAḤ.

T. S Collection No. 684. Substance—Paper. Size—9½ × 4⅓ inches. Sheets—17. Lines—6 to a Page. Script—Devanāgarī. No. of Granthas—17÷. Author—? Incomplete.

Beginning—Same as No. 4204.

End:

तच्छ्रुत्वा मार्जारो भूमिं स्पृष्ट्वा कर्णौ स्पृशति । कृष्ण कृष्ण ब्रूते च । मया धर्मशास्त्रं श्रुत्वा वीतरागेणेदं पुष्करं व्रतं... ॥

Colophon:—Nil.

Subject: Hitopadeśa. 1st part. Incomplete.

Remarks :—The Ms. is in good condition.

॥ हितोपदेशः ॥

4206. HITOPADEŚAḤ.

T. S. Collection No. 685. Substance—Paper. Size—$9\frac{3}{4} \times 5$ inches. Sheets—21 (54-74). Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—450. Author—? Incomplete.

Beginning:

पुनः कथारम्भकाले राजपुत्रा ऊचुः । आर्य राजपुत्रा वयम् ! तद्विग्रहं श्रोतुं नः कूतूहलमस्ति ! विष्णुशर्मणोक्तम्— यदेव भवद्भ्यो रोचते कथयामि श्रूयताम् । यस्यायमाद्यः श्लोकः—

हंसैस्सह मयूराणां विग्रहे तुल्यविक्रमे ।
विश्वास्य वञ्चिता हंसा काकैः स्थित्वारिमन्दिरे ॥ २ ॥

End:

विष्णुशर्माब्रवीत् । अपरमप्येवमस्तु ।
विग्रहः करितुरगपतिभिः
न कदाचिद्भवतां महीभुजाम् ।
नीतिमन्त्रपवनैस्समाहतः
संश्रयन्तु गिरिगह्वरं द्विषः ॥

Colophon:

इति हितोपदेशे विग्रहोनाम तृतीयकथासङ्ग्रहः समाप्तः ॥

Subject: Hitopadeśa 3rd part Complete.

Remarks :—The Ms. is in very good condition.

॥ चरितम् ॥

CARITA.

॥ पुरुराजवंशक्रमः ॥

4207. PURURĀJAVAMŚAKRAMAḤ.

Burnell's Catalogue No 5133. Page 159. Right column. Substance—Paper. Size—$5\frac{4}{5} \times 3\frac{1}{2}$ inches. Sheets—7. Lines—9 to a Page. Script—Devanāgarī. No of Granthas—70. Author—? Incomplete.

Beginning :

श्रीरस्तु । पुरुराजस्य वंशः कथ्यते । पुरोर्वंशे भरतः । तद्वंशे कुरुः । तद्वंशे प्रतीपः । प्रतीपस्य त्रयः पुत्राः । देवापिः, बाह्लिकः, शन्तनुश्च । देवापिः कुष्ठयुक्तो वनं जगाम । बाह्लिकः पुत्रिकापुत्रतां यातो बाह्लिकदेशाधिपतिर्जातः । स बाह्लिकः पूर्वं प्रह्ला....दानीवाय वा(वाय्वा) विष्टः । तस्य पुत्रः सोमदत्तः । स च पूर्वपत्रतापाख्य ... । सोमदत्तस्य त्रयः पुत्राः । भूरिः, भूरिश्रवाः, शलश्च । तत्र भूरिः अजे(अजए)कपात् । भूरिश्रवाः अहिर्बुध्नः । स च इदानीं शिवादिसर्वरुद्राविष्टः तद्वरवांश्च । शलस्तु विरूपाक्षः । इति बाह्लिकवंशः ॥

End:

तस्यां देवक्यां कृष्णो जातः । कृष्णाद्रुक्मिण्यां प्रद्युम्नो जातः । रुक्मिणी भीमकपुत्री । स भीष्मको मित्रनामा सूर्य अग्निपुत्रस्य शुचेरावेशवान् राहंशमुक्तश्च भीष्मकानुजौ क्रमवैशकौ तौचाग्निपुत्रौ पवमानशुंधी । भीष्मकसुतौ रुग्मीस इल्वलाख्यदैत्यः । रुग्मिणीपुत्रः प्रद्युम्नश्च कामः ।

प्रद्युम्नाख्यविष्ण्वाविष्टः । रुग्मिणीपुत्री रुग्मवती तद्भार्या सा रती ।

Colophon : Nil.

Subject: Pururājavamśakrama.

Remarks :—The Ms. is in a fairly good condition. The author of this short work is unknown. This work gives the succession list of the kings of Ancient Purāṇic India beginning with Puru.

॥ शङ्कराचार्यचरितम् ॥

4208. ŚAṄKARĀCĀRYACARITAM.

Burnell's Catalogue No. 4745. Page 97. Left column. Substance—Paper. Size—9½×4 inches. Sheets—49. Lines—6 to 9 a Page. Script—Devanāgarī. No. of Granthas—612. Author—Govindanātha. Complete. 1-9 Adhyāyas.

Beginning:

श्रीगणेशाय नमः ॥

गणेशाय नमस्तस्मै यत्प्रसादविवस्वता ।
प्रत्यूहध्वान्तविध्वंसः क्रियते भक्तकर्मणाम् ॥ १ ॥
मदीयरसनारङ्गनटनेषु समुत्सुका ।
एषा सरस्वती भूयात्सतामानन्ददायिनी ॥
समाश्रितपदाम्भोजजनतासुरपादपः ।
सर्वं मम शुभाभीष्टं पूरयेत्पार्थसारथिः ॥

क्षिप्त्वा ज्ञानतमोराशिं पदार्थानथ दर्शयन् ।
गुरुरत्नप्रदीपो मे मनोधामनि भासताम् ॥

विष्णुलीलामृतादीनां कर्तारः कविपुङ्गवाः ।
जयन्ति सुतरां लोके वाल्मीकिव्यासशङ्कराः ॥

सर्वागमास्पदं व्यासः....चलमिमं कविम् ।
बभूव शङ्कराचार्यकीर्तिकल्पो निलीयतः(?) ॥

अस्त्युत्तमस्य काव्यादेर्व्यासाचलभुवोऽखिलम् ।
अर्थप्रसूनमादातुमसमर्थोऽहमद्भुतम् ॥

दुःखमत्यङ्कुशग्राहं गृहीत्वा कलयामि तत् ।
सर्वेषां गुरुरस्माकं सर्वज्ञो यतिपुङ्गवः ॥

जातः श्रीशङ्कराचार्यः कस्मिन्देशे सुपावने ।
आर(भ्य) जन्मतः कस्मिन्वत्सरे भिक्षुतां गतः ॥

केषां निबन्धनानाञ्च कर्ताऽभूत्स यतीश्वरः ।
कति शिष्या महात्मानस्तस्याभूवन्महामतेः ॥

सशिष्यैर्विचरन्भूमौ कानि चक्रेऽद्भुतानि सः ।
सायुज्यं कुत्र देवेन प्राप्तवानपि तत्त्ववित् ॥

एतत्सर्वमपि श्रोतुं गुरोः कौतुकवानहम् ।

End:

इत्युवाच यतिश्रेष्ठः शङ्कराचार्यसत्कथाम् ।
श्रोतुकामाय शिष्याय भक्तियुक्ताय भक्तिमान् ॥

अन्वहं पठितुं सर्वमाचार्यचरितं महत् ।
द्विषट्कञ्चाथ पद्यानां शिष्यायोपदिदेश सः ॥

देशे कालडिनाम्नि केरलधराशोभाकरे सद्द्विजे
जातः श्रीपतिमन्दिरस्य सविधे सर्वज्ञतां प्राप्तवान् ।
भूत्वा षोडशवत्सरे यतिवरो गत्वा बदर्याश्रमं
कर्ता भाष्यनिबन्धनस्य सुकविः श्रीशङ्करः पातु नः ॥

* * *

श्रीमच्छङ्करदेशिकस्य चरितस्तोत्रं प्रबोधप्रदं
निर्दिष्टाखिलपापवृन्दविपिनं संक्षिप्तमेतन्नराः ।
ये शृण्वन्ति पठन्ति सादरयुताः सञ्चिन्तयन्त्यन्वहं
ते लब्ध्वा भुवि सम्पदश्च सकलामन्ते....निश्चितम् ॥

Colophon:

इति श्रीशङ्कराचार्यचरिते नवमोऽध्यायः ॥

श्रीशङ्करस्य जयतीह यतीश्वरस्य
त्रैलोक्यविश्रुतमिदं चरितं सुपुण्यम् ।
पापं समस्तमपि संहरदेव नित्यं
संशृण्वतां कथयतां स्मरतां नराणाम् ॥

विजयाब्दे वसन्ततौं चैत्रे दीपाम्बिकाकृते ।
पौर्णमास्यां सोमवारे वेङ्कटेश्वरशास्त्रिणा ॥

शङ्कराचार्यचरितं लिखितं पावनं महत् ।
कृतं गोविन्दनाथेन यतिभक्तिसहायतः ॥

श्रीमच्छङ्कराचार्यार्पणमस्तु ॥

Subject: Śaṅkarācāryacarita. 1-9 Adhyāyas.

Remarks:—The Ms. is in a fairly good condition. Alternate sheets are sulpherated.

Govindanātha, the author of this Life of Śaṅkarācārya, summarises in 9 chapters the well-known incidents of his life. The one important feature of this work is that it does not commit the mistake of identifying Sureśvara with Maṇḍanamiśra.

The work does not seem to have been printed anywhere. It is good in style and composition and is therefore important. Of this rare work there is only one manuscript available. The work does not appear to be available in any other library.

॥ शङ्करविजयः ॥

4209. ŚAṄKARAVIJAYAḤ.

Burnell's Catalogue No. 10181. Page 162. Right column. Substance—Palm leaf. Size—$15\frac{3}{10} \times 1\frac{1}{10}$ inches. Leaves —91 (12-102). Lines—5 or 6 to a Page. Script—Grantha. No. of Granthas—1400. Author—Vyāsādrikaviḥ. Incomplete.

Beginning:

....

....

....

......श्रुतवानिदमद्भुतम् ॥

स च विस्माय भृशं मुनिपुत्रका-

दतिसुरासुरकर्मणि विष्ठितात् ।

किमाभिलाषितपश्चरतीत्यसौ
मम................ ॥
...रिहयोऽप्सरसां गणमब्रवीत्
व्रजत यत्र मुनिस्तप आचरन् ।
वसति तत्र जगत्त्रयमीदृशा
सुचकितं चकितैर्नणी(?)दृशे ॥

End:

गोबृन्दैरभिभासयन्नममतानर्थान्विशिष्टार्थान् (?)
व्योमव्यापिपदे स्थितो निरवधा वृत्ताय गोत्रोत्तमान्(?) ।
संगृह्णन् वसुधातले विपुलभास्सारं रसं पूजितः
श्रीमच्छङ्करभास्करो विजयते पुष्णन् जनानां तनूम् ॥
श्रीमच्छङ्करदेशिकेन्द्रचरणद्वन्द्वांबुजन्मान्वयी
श्रद्धाभक्तिवशेन केवलमियं तद्गोचरा सत्कथा ।
आख्याता न च पूजनाय कथिता नो भूमिवित्ताप्तये
वाचं मे पवितुं तदीयचरिताम्भोभिस्सदा तद्वदाम् ॥
यत्रोच्यते वादिगुणानुयोग-
व्याजेन सिद्धान्तरहस्यमद्धा ।
स द्वादशोऽगाद्विजयेऽत्र सर्गः
श्रीशङ्करे व्यासगिरिप्रणीते ॥

Colophon:

इति श्रीशङ्करविजये द्वादशः सर्गः ॥
श्रीगीर्वाणेन्द्रसरस्वतीदिव्यश्रीचरणारविन्दाभ्यां नमः ॥
(शङ्करविजयं) समाप्तम् ॥

Subject: Śaṅkaravijayam 3-12 Sargas.

Remarks:—The Ms. is in good condition.

This is another life of Śaṅkara. The word गीर्वाणेन्द्रसरस्वती leads us to think that the Ms. might once have been in the possession of the family of Nīlakaṇṭhadīkṣita.

॥ शङ्करविजयम् ॥

4210. ŚAṄKARAVIJAYAṂ.

Burnell's Catalogue No. 10183. Page 162. Right column.

Substance—Palm leaf. Size—$18\frac{3}{10} \times 1\frac{2}{5}$ inches. Leaves—56. Lines—7 to a Page Script—Telugu. No. of Granthas—1400. Author—Vyāsagiri. Incomplete.

Beginning, end, colophon and subject—Same as No. 4209.

Remarks:—The Ms. is much injured and the leaves are broken.

॥ संक्षेपशङ्करविजयः ॥

4211. SAṄKṢEPAŚAṄKARAVIJAYAḤ.

Burnell's Catalogue No. 10182. Page 96. Right column.

Substance—Palm leaf. **Size** —$13\frac{4}{5} \times 1\frac{1}{10}$ **inches.** Leaves—4 or 5 to a Page. Script—Telugu. No. of Granthas—1040. Author—Mādhavaḥ. Incomplete. 1-8 Sargas.

Beginning:

श्रीगुरुभ्यो नमः ॥

श्रीदक्षिणामूर्तये नमः ॥

प्रणम्य परमात्मानं श्रीविद्यातीर्थरूपिणम् ।
प्राचीनशङ्करजयसारः सङ्गृह्यते स्फुटम् ॥ १ ॥

व्यासाचलप्रमुखपूर्विकपण्डितक्ष्मा-
भृत्संभृतोच्चतरकाव्यतरोस्सुगूढात् ।
विद्वन्मधुव्रतसुखोरुरसानि सर्वा-
ण्यादार्क(तु)मर्थकुसुमान्यहमक्षमोऽस्मि ॥ २ ॥

यस्मादनल्पधिषणा सृणिना ग्रहीतुं
शक्यं तदत्र सरसं सकलं गृहीत्वा ।
काचिन्महेश्वरगुरुस्मृतभक्तमोहः
सङ्क्षेपशङ्करजयस्रजमातनोमि ॥ ३ ॥

पीयूषद्युतिमण्डखण्डनकृपारूपोत्तरश्रीगुरु-
प्रेमस्थेमसमर्हणार्हमधुरग्रथाहारस्रूनोत्करः ।
प्रौढोऽयं नवकालिदासकवितासन्तानसन्तानको
दद्यादद्य समुद्यतः सुमनसामामोदपारम्परीम् ॥ १२ ॥

सामोदैरनुमोदितां मृगमदैरानन्दितां चन्दनै-
र्मन्दारैरभिनन्दिता प्रियगिरा काश्मीरजैस्मेरिता ।
वागेषा नवकालिदासविदुषो दोषोज्झिता दुष्कवि-
व्रातैर्निष्करुणैः क्रियेत विकृता धेनुस्तुरुष्कैष्विव ॥ १३ ॥

End:

अपि कदाचिदुदेष्यति कोविदः
सरसवादकथापि भविष्यति ।
इति कुतूहलिनो मम सर्वदा
जयमहो जयमहो स्वयमागतः ॥ ४१ ॥

भवतु सम्प्रति वादकथावयोः
फलतु पुष्कलशास्त्रपरिश्रमः ।

उपनताः स्वयमेव न गृह्यते

नवसुधा वसुधा... ॥ ४२ ॥

Colophon: (Leaf No. 122)

इति श्री माधवीये तद्व्याससन्दर्शिचित्रगः ।

संक्षेपशङ्करजये सर्गोऽस्यौ सप्तमो भवेत् ॥

श्रीदक्षिणामूर्तये नमः ॥

Subject: Saṅkṣepaśaṅkarajaya. 1-8 sargas.

Remarks:—This Ms. is in good condition This Ms. abruptly ends in the middle of the 8th sarga.

The life of Śrīśaṅkara is available in print. The Ānandāśrama Press of Poona has published the work. Though tradition attributes this work to Mādhavācarya, it is extremely doubtful.

॥ शङ्कराचार्यविजयम् ॥

4212. ŚAṄKARĀCĀRYAVIJAYAM.

Burnell's Catalogue No. 12365. Page 96 Right column. Substance—Paper. Size—14 × 5¾ inches. Sheets—49. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—1250. Author—Anantānantagiri ? Incomplete.

Beginning:

श्रीगणेशाय नमः ॥ श्रीगुरुभ्यो नमः ॥ श्रीसरस्वत्यै नमः ॥

ॐ नमो शङ्कराचार्यगुरुपादसरोरुहम् ।

यस्य प्रसादान्मूढोऽपि सर्वज्ञोऽहं सदास्म्यहम् ॥

अनन्तानन्तगिरिरहमप्रतिहतशिष्यः मम परमगुरोरवतारकथां तदुपकृतिपोषितजगत्परम्पराविच्छिन्नशुद्धाद्वैत-

विद्याप्रतिष्ठां तदाशाविजयकौतूहलं तद्व्यासदर्शनं विचित्रप्रस्तावं तच्छरीरावसानकालब्रह्मदेववचनव्यासदत्तायुःप्रपञ्चं वियन्मार्गसञ्चारं कैलासदर्शनं भट्टसमागमं * * बहुदुष्टनिबर्हणमिदानीङ्करोमि ॥

End:

पुनराह ॥ स्वामिन् भगवदनुकूलं भवद्भिरुक्तम् । अङ्गाभावः पुरुषो निरवलम्ब एव भवति । कस्यापि देव स्याभिमानाभावात् । अतः साङ्गेन पुम्सा भवितव्यम् ॥ य....... ।

Colophon:

इत्यनन्तानन्तगिरिकृतौ शास्त्रोपकरणं नाम प्रथमं प्रकरणम् ॥

Subject: Śaṅkarācāryavijaya.

Prakaraṇa.	Subject.	Sheets.
I	शास्त्रोपकरणम्	1
II	गुर्ववतारकथनम्	1
III	अद्वैतस्वरूपकथनम्	6
IV	शैवमतनिबर्हणम्	10
V	शिवमतैकदेशिनिबर्हणम्	18
VI	भागवतमतनिबर्हणम्	25
VII	वैष्णवमतनिबर्हणम्	29
VIII	पाञ्चरात्रमतनिबर्हणम्	31
IX	वैखानसमतनिबर्हणम्	34
X	कर्महीनवैष्णवमतनिबर्हणम्	38
XI	हैरण्यगर्भमतनिबर्हणम्	40

Prakaraṇa.	Subject.	Sheets.
XII	अग्निवादिमतनिबर्हणम्	43
XIII	सौरमतनिबर्हणम्	44
XIV	गुरुस्तुतिः	47
XV	?	Last Sheet

Remarks:—The Ms. is in good condition.

This is an incomplete manuscript. The work purports to have emanated from the hands of one Anantānantagiri. A perusal of the work will convince anybody that the work is very unreliable. It is full of discrepencies and mistakes. The work, at least a portion of it, was printed in the Bibliotheca Indica Series at Calcutta.

॥ चोलचम्पूः ॥

4213. COLACAMPŪḤ.

J. L. Collection No. 604. Substance—Paper. Size—9¼ × 4¼ inches. Sheets—27. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—540. Author—Virūpākṣa. Complete.

Beginning:

शिवाय नमः ॥

नन्द्यादीन् गणपान् शिवस्य परमानन्दामृताम्भोनिधीन्

मन्दस्मेरमुखाब्जगद्गुरुपदान्कुन्ताभदन्तच्छवीन् ।

वन्देऽहं शिवपूजनैकनिरतान्सन्देहभेदे पटून्

कन्दाशैलसुदशैश्च यत्पदरजो वन्द्यं मुकुन्दादिभिः ॥ १ ॥

अस्ति खलु समस्तसुरासुरस्तोमवन्दितचरणारविन्दस्य भगवतश्चन्द्रशेखरस्य निवासभूतः सङ्गीतसाहित्यादिनानाविधनिरवद्यविद्याचतुरचातुर्वर्ण्यजनपरिपूरितः * * कावेर्यास्तीरे महान् खर्वटो नाम ग्रामः ।

End:

निर्दुःखलेशमखिलाः सुखिताश्च लोका-
स्तस्मिन् प्रशासतितरां नरनायकेन्द्रे ।
धर्माभिवृद्धिरभवत्सततं सुवृष्टि-
स्सम्पन्नसस्यनिकरा पृथिवी बभूव ॥ ८७ ॥

कृत्वा शिवप्रियकरान् बहु कारयित्वा
धर्मान्छिवैकशरणः स च देवचोलः ।
राज्यञ्चकार सुखितः शिवभक्त एत-
चस्मै नमो हृदि करोमि शिवस्य दासः ॥ ८८ ॥

Colophon:

इति श्रीविरूपाक्षविरचितं चोलचम्पूकाव्यं समाप्तम् ॥

Subject: Colacampū.

Remarks:—The Ms. is in good condition.

Virūpākṣa, the author of this campū seems to have been a native of Tanjore. The work deals with the history of the Colas, mainly Kulottuṅga cola. The colas are represented in this work as belonging to the fourth caste. They were not Kṣatriyas according to the author. On the other hand many of the inscriptions of the Colas trace the origin of the family to the kings of the Solar race.

॥ साहसाङ्कचरितम् ॥

4214. SĀHASĀṄKACARITAM.

Burnell's Catalogue No. 10203 a. Page 163. Left column. Substance—Palm leaf. Size—18 × 1¼ inches. Leaves—75 (94-168). Lines—5-6 to a Page. Script—Grantha. No. of Granthas—1550. Author— Kālidāsa (Parimala). (1-17 sargas). Incomplete.

Beginning:

कट्या(क्रिया)त्सवो यस्य निसर्गवक्त्रः
स्पृशत्यभिज्यं स्मरचापलीलाम् ।
जटापिनद्धोरगराजरत्न-
मरीचिलीढोभयकोटिरिन्दुः ॥ १ ॥

जूटा(चूडा)भिरत्नद्वि(शु)तिपाटलोऽव्या-
त्सवश्शशी शङ्करमौलिरत्नम् ।
श्रुत्वा यशोकाङ्कुरकौतुकेन
यं वर्तुमिच्छत्यचलेन्द्रकन्या ॥ २ ॥

कुम्भस्थली रक्षतु वो विनिर्य-
त्सिन्दूररेणुर्द्विरदाननस्य ।
प्रशान्तये विघ्नतमश्छटानां
निष्ठ्यूतबालातपपल्लवेन ॥ ३ ॥

चक्षुस्तदुन्मेषि सदासुखेन(ः)
सारस्वतं शाश्वतमाविरस्तु ।
पश्यन्ति येनावहिताः कवीन्द्राः
त्रिविष्टपाभ्यन्तरवर्तिर(व)स्तु ॥ ४ ॥

तत्त्वस्पृशस्ते कवयः पुराणाः
श्रीभर्तृमेण्ठप्रमुखा जयन्ति ।
निस्त्रिंशधारासदृशेन येषां
वैदर्भमार्गेण गिरः प्रवृत्ताः ॥ ५ ॥

पूर्णेन्दुबिम्बादपि सुन्दराणि
तेषामपूरेपुरतो यशांसि ।
ये भर्तृमेण्ठादिकवीन्द्रसूक्त-
व्यक्तोपदिष्टेन पथा प्रयान्ति ॥ ६ ॥

सरस्वतीकल्पलतैककन्दं
वन्दामहे वाक्पतिराजदेवम् ।
यस्य प्रसादाद्वयमप्यमुत्र
कवीन्द्रचीर्णे पथि सञ्चरामः ॥ ७ ॥

दिवं यियासुर्मम वाचि यां मुदा-
मदत्त यां वाक्पतिराजदेवः ।
तस्यानुजन्मा कपिबान्धवस्य
भिनत्ति तां सम्प्रति विक्रमार्कः ॥ ८ ॥

नैते कवीन्द्राः कति काव्यबन्धे
तदेष राज्ञा किमहं नियुक्तः ।
किं वालुकापर्वतके धरेय-
मारोप्यते सत्सु कुलाचलेषु ॥ ९ ॥

अहो महत्साहसमेतदेव
यद्वर्णनीयो नवसाहसाङ्कः ।

दूरे परिच्छेदकथा हि सत्य-
मेतद्गुणानाम्बुदधेरपाश्च ॥ १० ॥
भक्त्याथ वास्यैव मम प्रबन्धे
तीक्ष्णो यदुन्मीलति शक्तिलेशः ।
उल्लङ्घिता यत्कपिना पयोधिः
सैवानुभावः स रघूद्वहस्य ॥ ११ ॥
समत्सरे चेतसि दुर्जनानां
न जातुचित्सूक्तिगणो गुणाय ।
निसर्गकृष्णेन्द्रवधूकपोले
निरर्थकः कुङ्कुमपत्रभागः ॥ १२ ॥
किमन्यदस्याश्चरितैर्नृपस्य
मुक्तावदातैः कृतमण्डनायाः ।
मदीयसूक्तैर्मकरीभवन्तु
स्वभावशुद्धानि सतां मनांसि ॥ १३ ॥
नमोऽस्तु साहित्यरसाय तस्मै
निषक्तमन्तःपृषतापि यस्य ।
सुवर्णतां वक्तुमुपैति साधो-
र्दुर्वर्णतां याति च दुर्जनस्य ॥ १४ ॥
श्रीसाहसाङ्कोज्वलकीर्तिगर्भा
ममाथवा किं न हरन्ति वाचः ।
कस्यातलोभाय न शुक्तयस्ता-
मुक्ता हि यासामुदरे स्फुरन्ति ॥ १५ ॥
एतान्यवन्तीश्वरपारिजात-
जातानि तारापतिपाण्डुराणि ।

सम्प्रत्यहं पश्यत दिग्वधूनां
यशःप्रसूनान्यवतंसयामि ॥ १६ ॥

अस्ति क्षितावुज्जयिनीति नाम्ना
पुरीविहायस्यमरावतीव ।
बबन्ध यस्यां पदमिन्द्रकल्पो
महीपतिर्वाक्पतिराजदेवः ॥ १७ ॥

End:

इत्यब्रवीदुरगनेत्रपरम्पराभि-
रापीयमानवपुरित्थमवन्तिनाथम् ।
कैलासशैलवसतेर्गिरिशोऽपरोधा-
द्द्वारप्रवेशविनिषेधकषायितेन ॥ १८ ॥

शप्तो मृकण्डुमुनिना य…पितुस्ते
श्रीहर्षदेवनृपतेः मतिभ…पालः ।
राज्ञा फणीन्द्रदुहितुः कनकारविन्दं
कर्णे करिष्यति यदा नवसाहसाङ्कः ॥

स्वं रूपमाप्स्यसि तदेति ममादिदेश
शापा…………कपल्लवेन ।
दत्ताभयोपरतपौर्वशताप्यमाण
रत्नोप…मथ सालवतीं प्रविश्य ॥

तं संयुगस्फुटपरीक्षितशौर्यसारं
राज्ये रिपोः फणिकुमारकमभ्यषिञ्चत् ।
…………………………

…………………………पुरीम् ॥

Colophon:

इति कालिदासस्य कृतौ साहसाङ्कचरिते हेमकमलहरणः सप्तदशः सर्गः ॥ १७ ॥

Colophon: Leaf 120.

इति परिमलकालिदासस्य कृतौ महाकाव्ये साहसाङ्कचरिते सप्तमः सर्गः ॥

Subject: Sāhasāṅkacarita 1-17 sargas.

Sarga	Leaf	Sarga	Leaf
1	98	9	127
2	102	10	131
3	?	11	137
4	106	12	?
5	110	13	142
6	115	14	151
7	120	15	155
8	124	16	160

Sargas 17 Leaves 168

Remarks:—The Ms is in good condition. This Ms. abruptly ends with the beginning of the 18th sarga.

The author of this kāvya Padmagupta, otherwise known as Parimala Kālidāsa should not be coufounded with the famous poet. In several places in literature we find verses cited in the name of Parimala and probably they are taken from this work. This work has been published in the Bombay Sanskrit Series under the title Navasāhasāṅkacarita.

॥ साहसाङ्कचरितम् ॥

4215. SĀHASĀṄKACARITAM.

Burnell's Catalogue No. 10202 (b). Page 163. Left column.

406

Substance—Palm leaf. Size—$14\frac{1}{2} \times 1\frac{1}{2}$ inches. Leaves—51 (97-147). Lines—6 or 7 to a Page. Script—Telugu. No. of Granthas—1050. Author—Parimala Kālidāsa (1-10 sargas) Incomplete.

Beginning—Same as No. 4214.

End:

भद्रैतद्व्रजरत्नचूडनिबिडप्रेमार्द्रमस्मद्वच-
स्तस्यास्तत कुरङ्गशावकदृशः कर्णावतंसीकुरु ।
शापान्ते बत विस्मरिष्यसि यदि भ्रान्तस्तदेकाकिम-
प्यादाय स्वयमेव तत्प्रतिवचः पार्श्वं ममाभ्येष्यसि ॥

इति नरपतिः स्वान्ते कृत्वा मुनेर्मृगवागुरां
गिरमुदगमन्निस्त्रिंशाभे नभस्य शनैः शुकः ।
चिरविनिहितां दृष्टिं तस्मान्निवर्त्य तथोत्सुको
रुगिति गमने देवोऽप्यासीत्सहसहलाञ्छनः ॥

Colophon:

इति श्रीकालिदासकृतौ साहसाङ्कचरिते
रत्नचूडसम्प्रेषणं नाम दशमः सर्गः ॥

Subject: Sāhasānkacarita 1-10 sargas.

Remarks:—The Ms is in good condition. This Ms. abruptly ends with the 10th sarga.

॥ अच्युतरायाभ्युदयः ॥

4216. ACYUTARĀYĀBHYUDAYAḤ.

Burnell's Catalogue No. 10209. Page 156. Right column. Substance—Palm leaf. Size—$17\frac{1}{2} \times 1\frac{1}{2}$ inches. Leaves—26 (189-214, 212th missing). Lines—9 to 11 to a Page.

Script—Grantha. No. of Granthas—950. **Author—Rājanātha.** Incomplete.

Beginning:

अव्यादपूर्वो निधिरागमाना-
माद्यो वृषाद्रेः पतिरच्युतेन्द्रम् ।
निरीक्षितुं निस्पृहकाङ्क्षितं यं
निरञ्जना एव जना क्षमन्ते ॥ १ ॥

धम्मिल्लशैवालधराविलोल-
दपाङ्गमीनाधरविद्रुमाभा ।
धन्या पितृच्छायतयाब्धिकन्या
तन्यादवन्यां श्रियमच्युतेन्दोः ॥ २ ॥

सुवर्णरूपैश्शुभनावकाङ्क्षै-
रौज्वस्यवद्भिर्ध्वनिमश्नुवानैः ।
परिक्षिदादिक्षितिपान्प्रबन्धैः
प्राचेतसाद्यान्प्रणुमः कवीन्द्रान् ॥ ३ ॥

कथन्नु वर्ण्या भुवि कालिदास-
मयूरमङ्खादिमहाकवीन्द्राः ।
पुरातनीं पूरुषभूमिकां य-
द्वेषेण धृत्वा विननर्त वाणी ॥ ४ ॥

End:

नीलारविन्ददलव...नदामलक्ष्मीं
नेता भुवोऽथ विपणिं रमणीकटाक्षैः ।
उल्लङ्घ्य वासगृहमागमदुत्तमाङ्ग-
सम्भावित...चरसङ्कुलहेतिसङ्घः ॥ ३८ ॥

वर्षैकं वसन्ते वसुवस(?)मधिकं वाञ्छ.. द्याचकानां
मन्वादीनाविवृण्वन्मित्र नयपदवीम्पानवा...यित्वा ।
आतन्वन्नर्मगोष्ठीं कविभिर....तामश्र...... ...
क्षोणीपालः पारा...रैपरितामवती वसुमतीं प्राज्यसाम्राज्यलक्ष्मीः ॥

Colophon :

इति राजनाथस्य कृतावच्युतरायाभ्युदयनाम्नि महाकाव्ये द्वादशस्सर्गः ॥

Subject : Acyutarāyābhyudaya 1-12 sargas.

Remarks :—The Ms. is in a fairly good condition. Last two leaves are much injured.

Rājanātha's Acyutarāyābhyudaya has been printed in the Śri Vāni Vilās Press. The work deals with the life and doings of Acyutarāyā, one of the most important severeigns of the Vijayanagar Empire. Acyutarāya came to the throne in 1530 A. D. The author, Rājanātha was a contemporary of the famous Appayya Dīkṣita.

For a summary of the contents of this work, see 'Sources of Vijayanagar History' pages 158-160 (Madras University Series)

॥ अच्युतरायाभ्युदयः ॥

4217. ACYUTARĀYĀBHYUDAYAḤ.

Burnell's Catalogue No 10210. Page 156. Right column. Substance—Palm leaf. Size—$17\frac{1}{4} \times 1\frac{1}{2}$ inches. Leaves—34 (83-119, 91, 115, 118 are missing). Lines—8 to a Page. Script—Grantha. No. of Granthas—900. Author—Rājanātha. Incomplete.

Beginning:

....

....

....

...सायान्प्रणुमः कवीन्द्रान् ॥ ३ ॥

कथन्नु वर्ण्या भुवि कालिदास-

मयूरमुख्यादिमहाकवीन्द्राः ।

पुरातनीं पूरुषभूमिकां य-

द्वेषेण धृत्वा(विननर्त वाणी) ॥ ४ ॥

End:

नृपागमाकर्णनतः परस्या

नेत्रे मुदाक्रान्तवतंसपुष्पे ।

अनङ्गमस्त्रं किमु लङ्घयेतां

मोज्यं विभज्येति तदाप्तिसौख्यम् ॥ २७ ॥

Colophon:

इत्यच्युतरायाभ्युदये द्वादशः सर्गः ॥

Subject: Acyutarāyābhyudaya 1-12 Sargas.

Remarks :—The Ms. is in a fairly good condition. Leaves 83-94 are rat-eaten on the right side. Last two ślokas of 12th sarga are not found in this Ms.

॥ अच्युतरायाभ्युदयः ॥

4218. ACYUTARĀYĀBHYUDAYAḤ.

Burnell's Catalogue No. 10211. Page 156. Right column. Substance—Palm leaf. Size—18⅛ × 1½ inches. Leaves—80 (1-38, 22, 23 & 30th are missing). Lines—6 to a Page.

Script—Telugu. No. of Granthas—850. Author—Rājanātha. Incomplete.

Beginning:

नाळीकाक्षमळीकाक्षं नागेशयमगेशयम् ।
त्रिपुङ्गवध्वजं धाम पुङ्गवध्वजमाश्रये ॥

अव्यादपूर्वः etc., Same as No. 4216.

End:

दक्षस्याध्वरदळनात्तकक्ष्यमीशं
दैतेयप्रळयकृतोद्यमं च देवम् ।
गाण्डीवाङ्कमपि खाण्डवावतीर्णं
सक्रोधं युधि सुभटाश्शशङ्किरे तम् ॥ ४० ॥
प्रासाग्रात्कातिचनपङ्कसेन कांश्चित्

....

Colophon: (Leaf No. 31.)

इति राजनाथस्य कृतौ अच्युतरायाभ्युदयनाम्नि महाकाव्ये दशमः सर्गः ॥

Subject: Acyutarāyābhyudaya 1-11 sargas.

Remarks:—The Ms. is in a fairly good condition. This Ms. abruptly breaks off in the forty-first stanza of the eleventh Sarga.

॥ अच्युतरायाभ्युदयः ॥

4219. ACYUTARĀYĀBHYUDAYAḤ.

Burnell's Catalogue No. 10212. Page 156. Right column. Substance—Palm leaf. Size—15½ × 1 inches. Leaves—45 (61-107, 102, 103 are missing). Lines—6 to a Page.

Script—Grantha. No. of Granthas—950. Author—Rājanātha.

Beginning, end and subject—Same as No. 4216.

Colophon:

इत्यच्युतरायाभ्युदयनाम्नि महाकाव्ये द्वादशः सर्गः ।

अवसितमच्युतरायाभ्युदयम् ॥

Remarks:—The Ms. is very old.

॥ वरदाम्बिकापरिणयः ॥

4220. VARADĀMBIKĀPARIṆAYAḤ.

Burnell's Catalogue No. 10250. Page 156. Right column. Substance— Palm leaf. Size—$18\frac{1}{4}\times1\frac{1}{3}$ inches. Leaves —49. Lines—5 or 6 to a Page. Script—Grantha. No. of Granthas—1200. Author—Tirumalāmbā. Complete.

Beginning:

अस्ति खलु समस्तजगदानन्दमूलकन्दलमिन्दीवरकुलतपःफलमिन्दिरारमणहृदन्तरसत्त्वपरिणतिः शङ्करकिरीटशृङ्गाटकप्राङ्गणोपलाल्यशैशवः सलिलराशिलहरीलासिकानटनविलासारम्भगुम्भितकुसुमाञ्जलिसमञ्जसकिरणमञ्जरीको निखिलदैवतकुलजीवितकलासरणीसमुदयसुधासारकासारो वैसारिणकेतुजीवातुरोषधीपतिर्नाम ।

तदन्वयोद्भूतमहीपतीनां

दानाम्भसामेष तरङ्गमाली ।

अलङ्कृतो वेत्यवधार्य यस्तं
मुहुः प्रवृद्धया मुखरीकरोति ॥

भक्तानजस्रं भवतापतप्तान्
सन्त्रातुकामः सरसैः कटाक्षैः ।
निष्यन्दमानामृतशीतलं यं
नालीकनाभो नयनञ्चकार ॥

* * * *

अनन्यसामान्यगुणातिसान्द्र-
स्तदन्ववायार्णवपूर्णचन्द्रः ।
कौक्षेयसाक्षीकृतवीरलक्ष्मी-
करग्रहोऽभूद्भुवि तिम्मभूपः ॥ ७ ॥

पुरहरि(?)पुत्रमसूत देवकी-
मुदूह्य कश्चिद्यदुरित्युदारधीः ।
स देवकीनाम्नि परिग्रहे शुभे
सुतं प्रसूयेश्वरमत्यशेत तम् ॥ ८ ॥

विजितपरपुरो वृषाश्रयोऽयं
करगतमेव धनञ्जयं विधृण्वन् ।
अवहदनुगतार्थमात्मनाम
स्फुरदुरुभूतिरहीनभोगहारि ॥ ९ ॥

आर्यां गुणौघैरथ बुक्कमाम्बां
स राजमौलिर्विधिनोपयम्य ।
नृसिंहनामानमुदग्रशक्ति-
निबर्हितारिं सुषुवे कुमारम् ॥ १० ॥

प्रह्लादमानसहितो नखरात्युदग्र-
विक्रान्तिरश्रमकृतोरुहिरण्यदानः ।
यः सिह्मसंहननतानुसरज्जयश्री-
र्निष्कण्टकां वसुमतीं निखिलामतानीत् ॥ ११ ॥

End :

अत्यादरादच्युतदेवरायं
वरेण्यशीलां वरदाम्बिकाञ्च ।
श्रेयोनिधानं श्रितवेङ्कटाद्रिं
श्रीवेङ्कटेशश्चिरकालमव्यात् ॥

Colophon:

इत्येकवाराकर्णनमात्रदृढावधारितनव्यकाव्यनाटकालङ्कारपुराणागमरह-
स्यसारस्यानुबन्धसमिन्धानस्वाभाविकप्रतिभानुभावया विद्याविशेष-
निरवद्यविद्वद्वरसकलकविकुलश्रवणानन्दचिन्नितानन्ताभीष्टफलाश्र -
यणविश्राणकामगवीभवदशेषभाषाविषयसविशेषोन्मेषचतुरिमगर्भि-
तसरसप्रबन्धसन्दर्भया विविधविद्याप्रगल्भराजाधिराजाच्युतराय -
सार्वभौमप्रेमसर्वस्वविश्वासभुवा निरुपाधिकमहोपकारनिर्माणधर्म -
निर्मलहृदयया निखिललिपिविलेखनानियतवितरणकृतहस्तहस्तारवि-
न्दया विरिञ्चचञ्चलनयनानखाञ्चलसमुदञ्चितविपञ्चीप्रपञ्चित-
पञ्चममधुरिमोदञ्चनविकस्वरकण्ठस्वरया विपुलतलातलावहारवि-
नोदसाकारावतीर्णशतपर्णासनवरवर्णिनीमतिनिर्णायिकया नानादेश-
प्रतिष्ठितवाजपेयपौण्डरीकसर्वतोमुखमहाध्वरद्विजवर्यवितीर्यमाणा -
शीर्विशेषपरिपोषितभाग्यसौभाग्यया नियतरक्षित...... कविकुटुम्ब-
या तिरुमलाम्बया निर्मितं वरदाम्बिकापरिणयं नाम च-
म्पूकाव्यमाचन्द्रतारमभिवर्धताम् । परिसमाप्तम् ॥

करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ।

अक्षरं यत्परिभ्रष्टं मात्राहीनन्तु यद्भवेत् ।

क्षन्तुमर्हन्ति विद्वांसः क्षमा हि विदुषां धनम् ॥

Subject: Varadāmbikāpariṇaya.

Remarks:—The Ms. is in a fairly good condition. After the colophon is given the following:

स्वामिन्नच्युतरायभूषितमहासिंहासनं स्वामह-

नाथं प्रागचले किलैक्ष्य सहसा नन्तुं नरेन्द्रैर्भुवि ।

विन्यस्ता मुकुटाश्चकासति भवद्दोःसारमायाविदा

शत्रुश्रीगुल....न्तरयितुं सौवर्णपात्यस्तत: ॥

चित्रे श्रीहरिभक्तिमद्दक्षिणकरुणाशृङ्गे भुजस्यक्षमां

वक्षःसीम्नि रमां वहन्नविरतं वक्त्रे च वाग्देवताम् ।

मत्सक्तोऽयमि......मतीमां नैष धत्ते तनौ

केनेत्यच्युतराय वक्तुमिव ते कीर्तिर्दिगालीं श्रिता ॥

वल्गाद्दिक्करिगर्वकर्कशगिरोऽवस्थानवित्रासिनी

क्ष्वेलज्ज्वालमिलत्फणीश्वरफणाकोणाधिरोहा सह ।

निर्यन्निर्झरपिच्छिलाचलनिराधाराधरा संप्रति

त्वारुह्यांसलमंसमच्युतमहाराजस्य विश्राम्यति ॥

त्वदुपकण्ठयुतंसितचामर-

द्वितयमच्युतरायविचारते ।

तव महोदयदानजलार्णव-

प्लवनकेलिजुषो यशसो भुजौ ॥

श्रीरङ्गराजाय नमः ॥

This is one of these few works that have perpetuated the names of Sanskrit Authoresses. The authoress Tirumalāmbāl

narrates the story of the marriage of **Varadāmbā** with **Acyutarāyamahārāja**, the king of Vijayanagara, who came to the throne in 1530 A. D.

The work seems to have been composed during the days of **Kṛṣṇa** Deva Rāya, king of Vijayanagara.

A paper transcript of this work is available in this library. See T. V. No. 55.

॥ साहित्यरत्नाकरः ॥

4221. SĀHITYARATNĀKARAḤ

Burnell's Catalogue No. 10291. Page 58. Left column. Substance—Palm Leaf. Size—$11\frac{1}{4} \times 1\frac{1}{2}$ inches. Leaves—198. Lines—5 or 6 to a Page Script—Grantha. No. of Granthas—2400. Author—Yajñanārāyaṇadīkṣita. (1-16 sargas) Incomplete.

Beginning:

वप्रक्रियायां वलयत्वमेत्य
दन्तार्गले दीव्यति चक्रवाले ।
जगत्प्रकाशं जनयन्मनीषां
वेतण्डवक्त्रो विशदीकरोतु ॥ १ ॥

मुदे सदा मोदकमादधाना
भूयादमेया तव कापि माया ।
विदन्ति यां वेदविदः पुराणीं
सञ्चारिणीं सम्पदमम्बिकायाः ॥ २ ॥

सव्याङ्घ्रिसञ्चारसुहृन्मरालो
भव्याय भूयाद्भवतां स भूमा ।

मञ्जरीशिञ्जारव एव यस्य
मनीषिमौखर्यविधानिधानम् ॥ ३ ॥

साहित्यसौहित्यभरं विधत्तां
द्वन्द्वं तदिन्दङ्कुरशेखरं वः ।
अदत्तपैशुन्यवचोऽवकाश-
मज्ञातलीलाकलहोपलम्भम् ॥ ४ ॥

तन्वी तवेयं तरुणेन्दुमौलेः
तन्वीत सारस्वतसारधाराम् ।
नटज्जटाटीरजटाकुटीर-
तटीलुठद्द्योतटिनी सपत्नी ॥ ५ ॥

राज्याभिवृद्धिं रघुनाथनेतुः
कुर्वीत गुर्वीं कुलशैलकन्या ।
नतो हरः पादनखे व्यलासी-
द्यस्याः स्फुटैकादशरूपभेदः ॥ ६ ॥

वीरोऽधिकं ते विभवं करोतु
विरोचनीयाय वहन्विरोधम् ।
वितीर्य सुग्रीवविभीषणाभ्यां
राज्यं ततः प्राप्तमवाप्तवान्यः ॥ ७ ॥

अभीप्सितादभ्यधिकं तनोतु
राज्यं स देवो रघुनाथनेतुः ।
प्रसूनमेकं प्रिययार्थितोऽदा-
द्यः पारिजातद्रुममेव तस्यै ॥ ८ ॥

अन्यात्तदव्याजकृपं महस्त्वा-
मव्याहतव्याकरणावतंसः ।
बालोऽपि वाचां बत धूतमोचां
यत्कम्बुसम्बन्धवशाद्दियाय ॥ ९ ॥

तन्यादवन्यां तव कौतुकानि
कन्यामणी सा कलशाम्बुराशेः ।
उरोमणौ या स्वमुदीक्ष्य विष्णो-
रासेतरामन्तरपीतिहृष्टा ॥ १० ॥

वासं विधत्तां रघुनाथनेतु-
र्वक्त्राम्बुजे विश्वसृजः पुरन्ध्री ।
नाथस्य नारायणनाभिपद्मे
निषेदुषी नीतिकलानुकर्त्री ॥ ११ ॥

वीणागुणास्त्रावणशोणपाणि-
नखाग्रलग्नस्फटिकाक्षमालाम् ।
मुहुर्लिहन् दाडिमबीजमोहा-
न्मुञ्चः शुकस्त्वस्तु मुदे स देव्याः ॥ १२ ॥

अद्वैतविद्याविभवावलम्बान्
गोविन्दयज्वेन्द्रगुरूनुपासे ।
निर्मथ्य षड्दर्शननीरधीन्ये
धियैव सारान् ददते बुधेभ्यः ॥ १३ ॥

सेव्या मुनीनां त्रितयी त्रयीव
त्रेतेव पुण्येन समप्रधानम् ।

व्यधत्त यो शम्भुवरेण शब्दा-
नुशासनं विद्वदनुग्रहाय ॥ १४ ॥
चातुर्यमाद्यस्य कवेर्धरित्री-
श्रवोभुवः कस्य न विस्मयाय ।
स्वच्छन्दचाराय वचोऽधिदेव्याः
सदा भवत्यत्कृतपादबन्धः ॥ १५ ॥
वल्मीकजन्मा कथमेव भूया-
त्सनिर्ममः कर्म मम स्तुतीनाम् ।
यस्य प्रबन्धाद्दशकन्धरारि-
रिन्धे जगत्यामितरावतारात् ॥ १६ ॥
* * *
सा मालतीमाधवसंविधान-
कर्त्री मनीषा कविलोकवन्द्या ।
प्रपञ्चयन्ती भुवि शब्दसृष्टिं
पद्मासनस्थाप्यकृताद्भुतं या ॥ २१ ॥
जैवातृकः कीर्तिशरीरधारी
जीयात्स यावत्क्षिति भोजराजः ।
अद्यापि यस्या सुलभाः कवीन्द्राः
प्रबन्धशेषं परिपूरयन्तः ॥ २२ ॥
बाणेन तेनेव परेण केना-
प्युपासिता चेदियमुक्तिदेवी ।
तस्यापि वाचां ग्रथनस्य भूया-
दुच्छेषणं सर्वजनोक्तिरीतिः ॥ २३ ॥

विभावनीयं भुवि विश्वरूपं
देव्या गिरां किञ्चन देदिवीति ।
जिज्ञासितं तद्यदि शीलनीया
श्रीहर्षवाणी सरसैः कवीन्द्रैः ॥ २४ ॥

ध्वनिः कवीन्द्राध्वनि कोऽप्यवेद्य-
श्श्रोत्रेण वेद्यः स तु लोचनेन ।
येषामहीनस्त इमे सहस्र-
मुखं विपक्षान्मुहुराक्षिपन्ति ॥ २५ ॥

अशब्ददाम्पत्यमबन्धहृद्य-
मव्यङ्ग्यचातुर्यमरीतिपोषम् ।
काव्यं सदा ग्रन्थयितुं बिभेमि
शिक्षाकरे दण्डिनि देशिकेन्द्रे ॥ २६ ॥

अन्ये प्रथन्तां कवयः सहस्र-
मकद्वदा वा भुविकद्वदा वा ।
ते प्रस्तुता नेह परन्तु कालि-
दासे कवौ नैव कदाप्युदासे ॥ २७ ॥

नयामि मामेव ततो नमस्या-
शतं महासाहसजन्मभूमिम् ।
यस्मादमुं वर्णयितुं यतिष्ये
रमेशरूपं रघुनाथभूपम् ॥ २८ ॥

प्राचां प्रबन्धान् रसयन्तु भव्या-
नसद्वचोऽप्याददतां रसज्ञाः ।

आस्वादयन्तो मधुराणि वस्तू-
न्यम्लं न किं जंफलमाद्रियन्ते ॥ ३३ ॥

* * *

पातञ्जलं भाट्टमतश्च तर्क-
मद्वैतराद्धान्तमवैमि किं तैः ।
प्रबन्धसन्दर्भभरैः कवित्व-
विद्यामिदानीं विशदीकरोमि ॥ ५१ ॥

* * *

देव्या गिरामवतरस्य दिशेन्मदुक्तिः
स्वल्पापि तस्य रघुनाथविभोः प्रमोदम् ।
भक्त्या सुधा स वसुमाभरणस्य शम्भो-
र्धुत्तूरपुष्पमिव दीनजनोपनीतम् ॥ ५६ ॥

End:

अम्लानाभिरपास्तरज्जुनहनक्लेशाभिरम्भोरुह-
स्रग्भिः सौधजुषामपाङ्गजानिभिः सश्लाघमेणीदृशम् ।
आयुष्मान्रघुनाथभूमिपरिणीरभ्यार्चितो भूयसा
सञ्जातप्रमदो बलेन निरगात्तञ्जापुरीतो बहिः ॥ ७४ ॥

* * *

जलनिधिगर्भवासवशनिर्भरदर्परिपु-
प्रतिहतिहेतुसेतुकृतिनूतनदाशरथे ।
कविबुधगायकाभिमतकल्पनकल्पतरो
जयकरुणासनाथ रघुनाथ जनाधिपते ॥
प्रौढश्रीरघुनाथभूपतिकृपास्फारीभवत्साहिती-
साम्राज्यो निगमागमार्थनिपुणः श्रीयज्ञनारायणः ।

सर्गं षोडशमप्यपूरयदयं सङ्ग्रामणीर्यज्वना-
मत्राकद्रुदविद्रुदद्भुतकरे साहित्यरत्नाकरे ॥

Colophon :

इति पदवाक्यप्रमाणपारावारपारीणश्रीमदद्वैतविद्याचार्यसाग्निचित्यसर्व-
तोमुखातिरात्रसाग्निचित्याप्तवाजपेययाजिगोविन्ददीक्षितवरनन्दनस्य
साग्निचित्यसर्वक्रतुयाजिनः **श्रीयज्ञनारायणयज्वनः** कृतौ
साहित्यरत्नाकरे महाकाव्ये षोडशः सर्गः ॥

हरिः ॐम्

Subject. Sāhityaratnākara. 1-16 sargas.

Sargas	Ślokas	Leaves	Sargas	Ślokas	Leaves
I	62	11	IX	78	109
II	71	22	X	106	122
III	82	36	XI	132	139
IV	69	49	XII	99	154
V	61	60	XIII	95	169
VI	78	75	XIV	77	180
VII	82	87	XV	68	188
VIII	101	100	XVI	76	198

Remarks :—The Ms. is in good condition.

The Sāhityaratanākara is by Yajñanārāyaṇa Dīkṣita, the son of the famous Govinda Dīkṣita, minister of the Nāyak kings of Tanjore. Yajñanārāyaṇa Dīkṣita's palmy days were spent in the court of Raghunāthanāyakā, the son of Acyutappa and the most famous of the Nāyak kings. The work is a biography of his patron and throws much light on the social and political conditions of Tanjore in those days.

॥ साहित्यरत्नाकरः ॥

4222. SĀHITYARATNĀKARAḤ.

Burnell's Catalogue No. 10290. Page 58. Left column.

Substance—Palm leaf. Size—19¼ × 1¼ inches. Leaves—101. Lines—4 to a Page. Script—Telugu. No. of Granthas—1100. Author—Yajñanārāyaṇadikṣita. (1-10 sargas) Incomplete.

Beginning—Same as No. 10291.

End:

अक्षुद्रमधुरताद्रवतिक्षुद्रवजवनकननसक्नवनः ।
उद्धृतवृत्तिरिपुस्थितियुद्धतलभ्राजमानभुजतेजः ॥ १०४ ॥
जलनिधि॰ जनाधिपते ॥ १०५ ॥
श्रीगोविन्दमखीन्दुवंशमणिना श्रीयज्ञनारायणा-
भिख्येनाध्वरिणा कृतं मधुसुधारोधाय मेधाविना ।
सर्गोऽयं दशमो द्विषन्मदशमोऽप्यासीत्समग्रैर्गुणै-
रत्राकद्ददविद्वदद्भुतकरे साहित्यरत्नाकरे ॥

Colophon:

इति ॰ श्रीसाहित्यरत्नाकरे महाकाव्ये दशमः सर्गः ॥

Subject: Sāhityaratnākara. 1-10 Sargas.

Remarks:—The Ms. is in good condition. The Ms. abruptly ends with the 10th sarga.

A paper transcript of this work is available in this Library. See T. V. No. 49.

॥ शिवभारतम् ॥

4223. ŚIVABHĀRATAM.

Burnell's Catalogue No. 1409. Page 162. Right column.

Substance—Paper. Size—11½ × 5½ inches. Sheets—232. Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—2660. Author—Paramānanda Kavīndra. Incomplete.

Beginning:

श्रीगणेशाय नमः । श्रीसांबसदाशिवाय नमः ।

श्रीमहाकालीमहालक्ष्मीमहासरस्वतीदेवताभ्यो नमः ।

श्रीरस्तु ॥

वन्दारुविबुधोदारमौळिमन्दारदामभिः ।
स्विद्यत्पादारविन्दाय गोविन्दाय नमो नमः ॥ १ ॥

कदाचित्परमानन्दशर्मा ब्राह्मणसत्तमः ।
तीर्थयात्राप्रसङ्गेन पुरीं वाराणसीं ययौ ॥ २ ॥

मुच्यन्ते यत्र सर्वेऽपि मुक्तिरेव न मुच्यते ।
यत्रोपदिशति ब्रह्मतारकं स्वयमीश्वरः ॥ ३ ॥

तत्र तीर्थविधिं कृत्वा दृष्ट्वा देवं महेश्वरम् ।
पुण्ये भागीरथीतीरे निषसाद स धर्मवित् ॥ ४ ॥

तं वै पद्मासनासीनं विस्फुरद्ब्रह्मवर्चसम् ।
वेत्तारं सर्वशास्त्राणां वित्तमध्यात्मवित्त(म)म् ॥ ५ ॥

पौराणिकानां प्रवरं भट्टगोविन्दनन्दनम् ।
एकवीराप्रसादेन लब्धवाक्सिद्धिवैभवम् ॥ ६ ॥

कवीन्द्रं परमानन्दं परमानन्दविग्रहम् ।
दृष्ट्वा प्रमुदितास्तत्र विज्ञाः काशीनिवासिनः ॥ ७ ॥

स तानुदारचरितान्प्रत्युत्थायाभिवाद्य च ।
पूजयामास विधिवत्संप्राप्तानतिथीनिव ॥ ८ ॥

परिवार्योपविविशुस्ते सर्वे तं द्विजोत्तमाः ।
शुश्रूषमाणाश्चरितं प्रथितं शिवभूपतेः ॥ ९ ॥

ततः प्रमनसः सर्वे तमूचुस्ते मनीषिणः ।
कर्तारं चारुकाव्यानामवतारं बृहस्पतेः ॥ १० ॥

मनीषिण ऊचुः—

यः शास्ति वसुधामेतां राजा राजगिरीश्वरः ।
तुलजायाः प्रसादेन लब्धराज्यो महातपाः ॥ ११ ॥

विष्णोरंशो विशेषेण लोकपालांशसंभवः ।
मनस्वी सुप्रसन्नात्मा प्रतापी विजितेन्द्रियः ॥ १२ ॥

भीमादपि महाभीमः सीमा सर्वधनुर्भृताम् ।
धीमानुदारचरितः श्रीमानद्भुतविक्रमः ॥ १३ ॥

कृती कृतज्ञः सुकृती कृतात्मा कृतलक्षणः ।
वक्ता वाक्यस्य सत्यस्य श्रोता चातिविचक्षणः ॥ १४ ॥

देवद्विजगवां गोप्ता दुर्दान्तयवनान्तकः ।
प्रपन्नानां परित्राता प्रजानां प्रियकारकः ॥ १५ ॥

तस्यास्य चरितं ब्रह्मन्ननेकाध्यायगर्भितम् ।
भगवत्याः प्रसादेन भवता यत्प्रकाशितम् ॥ १६ ॥

उदारशब्दसन्दर्भं भूरिभावार्थमद्भुतम् ।
माधुर्यादिगुणोपेतमलङ्कारैरलङ्कृतम् ॥ १७ ॥

निचितं धर्मशास्त्रार्थैरर्थशास्त्रसमन्वितम् ।
विश्रुतं सर्वलोकेषु पुराणमिव नूतनम् ॥ १८ ॥

समस्तदोषरहितं सहितं लक्षणैर्निजैः ।
तदशेषमशेषज्ञ शंस नः शंसितव्रत ॥ १९ ॥

इति वाराणसीस्थेन मण्डलेन मनीषिणाम् ।
प्रोक्तः प्रोवाच धर्मात्मा कवीन्द्रो वदतां वरः ॥ २० ॥

कवीन्द्र उवाच—

एकवीरां भगवतीं गणेशं च सरस्वतीम् ।
सद्गुरुं च महासिद्धं सिद्धानामपि सिद्धिदम् ॥ २१ ॥

प्रणिपत्य प्रवक्ष्यामि महाराजस्य धीमतः ।
चरितं शिवराजस्य भरतस्येव भारतम् ॥ २२ ॥

End:

प्रतिवासरकल्पितांभसः
सरसीः पङ्कनिषण्णसारसाः ।
विरमज्झषकच्छपावली-
र्विदधे तीव्रतरातपस्तपः ॥ ८ ॥

प्रतिफुल्लशिरीषपाटली-
पटसौरभ्यभृता नभस्वता ।
स्मरतापमबीभरन्मनः
सुधियां निर्विषयात्मनामपि ॥ ९ ॥

Colophon: (Sheet No. 231)

इत्यनुपुराणे सूर्यवंशे निधिवासकरपरमानन्दकवीन्द्रप्रकाशितायां शतसाहस्र्यां संहितायां शृङ्गारपुरप्रवेशो नामाध्यायः ॥

Subject: Śivarājacaritam 1-31 Chapters.

Remarks:—The Ms. is in good condition and recent.

The Śivabhārata is a history of the famous Śivāji the founder of the Maharatha Empire. Paramānandakavīndra, the author of the work narrates the story of Śivāji in the form of a dialogue. The work has been published recently by the Bhārata Itihāsa Saṃśodhaka Mahāmaṇḍala, at Poona, from the manuscripts available in this library only.

॥ शिवभारतम् ॥

4224. ŚIVABHĀRATAM.

Burnell's Catalogue No. 1410. Page 162. Right column.

Substance—Paper. Size—$10\frac{1}{2} \times 5\frac{3}{10}$ inches. Sheets—142. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—2660. Author—Pramānanda Śarman. Incomplete.

Beginning, end, colophon and subject—Same as No. 4223.

Remarks:—The Ms. is in good condition.

The śloka

" नारायणं नमस्कृत्य + ततो जयमुदीरयेत् ॥ "

is also given in this Ms. at the beginning.

The first verse found in the previous copy is not found herein.

॥ शिवभारतम् ॥

4225. ŚIVABHĀRATAM.

Burnell's Catalogue No. 1411. Page 162. Right column.

Substance—Paper. Size—12½×6½ inches. Sheets—77. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—1068. Author—Paramānanda Śarman. Incomplete.

Beginning—Same as No. 4223.

End:

सुवर्णशर्मणो वाचमिमां श्रुत्वा नृपोत्तमः ।

माननीयोऽतिमहतां माननीयाममन्यत ॥ ६४ ॥

प्रभुत्वं बिभ्राणस्त्रिभुवनपरित्राणकरणे

पितृद्वेषि.............................. ।

....

.... ॥ ६५ ॥

Colophon: Nil.

Subject: Śivabhārata 1-16 chapters, 16th Incomplete.

Remarks:—The Ms. is in a fairly good condition.

॥ शिवभारतम् ॥

4226. ŚIVABHĀRATAM.

Burnell's Catalogue No. 1412. Page 162. Right column. Substance—Paper. Size—13½×5½ inches. Sheets—36 (5-40). Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—960. Author—Paramānanda Śarman. Incomplete.

Beginning:

.... ।

.................................पितः ॥ १०५ ॥

स्वरेण स्निग्धतारेण जगुर्गीतानि गायनाः ।
पेठुश्च प्रथितामुच्चैर्वन्दिनो विरुदावलिम् ॥ १०६ ॥

End:

कण्ठेकालेन कैलासः सुमेरुः शंभुपाणिना ।
अभ्यन्तरमपां पत्युः शिश्रिये दनुजारिणा ॥ ६० ॥
न दुर्गं दुर्गमित्येव दुर्गमं............ ।
.... ॥

Colophon : Nil.

Subject: Śivabhārata 1—16 chapters, 16th incomplete.

Remarks :—The Ms. is in good condition. This Ms. abruptly begins in the 105th śloka of the 1st chapter.

॥ पर्णाळपर्वतग्रहणाख्यानम् ॥

4227. PARṆĀḶAPARVATAGRAHAṆĀKHYĀNAM.

Burnell's Catalogue No. 4756. Page 162. Right column. Substance—Paper. Size—$9\frac{4}{8} \times 4\frac{1}{4}$ inches. Sheets—20. Lines—10 or 11 to a Page. Script—Devanāgarī. No. of Granthas—350. Author—Jayarāma. Complete.

Beginning:

श्रीगणेशाय नमः । श्रीसरस्वत्यै नमः ।
श्रीगुरुभ्यो नमः । अविघ्नमस्तु ।

गणाधीशं नमस्कृत्य वाग्देवीं च गुरुं तथा ।
पर्णाळग्रहणाख्यानं श्रीशिवाख्यस्य वर्ण्यते ॥ १ ॥
तत्रातिप्रीतितः श्रोता वीरत्रयधुरन्धरः ।
निरूप्यते स एवादौ शृणुध्वमवधानतः ॥ २ ॥

आस्तेऽस्मिन्भूतले श्रीमानेक एव महीपतिः ।
सर्वलक्षणसम्पन्नः शौर्यौदार्यगुणान्वितः ॥ ३ ॥

स राजा राजकार्यार्थकुशलैः सचिवैः सह ।
कविभिः पण्डितैर्भ्राजत्सभ्याभरणभूषितः ॥ ४ ॥

* * * *

कविर्निवेदयाञ्चक्रे सर्वं कुशलपूर्वकम् ।
शृणु तावन्महाराज श्रीशिवस्याग्रजस्य ते ॥ १६ ॥

चरितं देववर्यस्य विष्णोरिव जगत्प्रभोः ।
कल्किनो निष्कलङ्कस्य तुरुष्कवरमर्दनम् ॥ १७ ॥

प्रोच्यते भावि यच्छास्त्रे तदिदानीं निरूप्यते ।
यथाभूतं हि तद्युद्धं कविभिर्वर्णितं पुरा ॥ १८ ॥

* * * *

राजोवाच—
श्रुतमस्ति मया पूर्वमिदानीन्तनमादितः ।
कथयन्तु कथं जातं भवतां राजदर्शनम् ॥ २३ ॥

इदानीं स्थीयते कस्मिन्महाराजेन पर्वते ।
वर्षत्रयमितो गत्वा भवद्भिर्यदनुष्ठितम् ॥ २४ ॥

तत्सर्वं श्रोतुमिच्छामि भवन्तः कवयः खलु ।

End:

अथ तद्वार्कि(?)नस्तावन्मृत्युमाकर्ण्य विह्वलः ।
प्रतापदर्शिते मार्गे बाहुलोलो विनिर्गतः ॥ १०५ ॥

पश्चाच्चस्यातिसंविग्रहस्त्यश्वरथसङ्कुलम् ।
कटकं लुण्ठयामास स कृष्णो भास्करात्मजः ॥ १०६ ॥

विजयपुरसमुद्रादुच्छलच्चक्रचक्रा-
त्समुदितबहलोलः पार्वणोऽसौ शशाङ्कः ।
इति खलु निजलक्ष्मीं प्राक्षिपत्कृष्णपक्षे
प्रतिपदिव समशेषा भास्करादुत्थितेऽस्मिन् ॥ १०७ ॥

Colophon:

इति श्रीमज्जयरामकविविरचिते पर्णाळपर्वतग्रहाख्याने
शिवराजचरित्रे पञ्चमोल्लासः ॥
श्रीविश्वेश्वरार्पणमस्तु ॥

Subject: Parṇāḷaparvatagrahaṇākhyāna 1-5 Ullāsas.

Remarks :— The Ms. is in a fairly good condition. A paper transcript of this Ms. is available in this library. See T. V. No. 461.

Parṇālaparvata was an impregnable hill fortress and the work deals with the capture of the fortress by Śivāji. The work is by one Jayarāma Kavi.

॥ पर्णाळपर्वतग्रहणाख्यानम् ॥

4228. PRAṆĀḶAPARVATAGRAHAṆĀKHYĀNAM.

Burnell's Catalogue No. 5019. Page 162. Right column.
Substance—Paper. Size—$9\frac{3}{10} \times 5\frac{5}{8}$ inches. Sheets—22.
Lines—13 to a Page. Script—Devanāgarī. No. of Granthas—350. Author—Jayarāma. Complete.

Beginning, end, colopon and subject—Same as No. 4227.

Remarks: —The Ms. is in a fairly good condition

॥ राजारामचरितम् ॥

4229. RĀJĀRĀMACARITAM.

Burnell's Catalogue No. 4863. Page 161. Right column. Substance—Paper, Size—$9\frac{7}{10} \times 4\frac{1}{2}$ inches. Sheets—34. Lines—6 to 8 to a Page. Script—Devanāgarī. No. of Granthas—300. Author—Keśavapaṇḍita. Complete 1-5 Sargas.

Beginning:

श्रीगणेशाय नमः ॥

जयति रघुवंशतिलकः
कौसल्यानन्दवर्धनो रामः ।
दशवदननिधनकारी
दाशरथिः पुण्डरीकाक्षः ॥ १ ॥

नमस्तस्मै मुनीशाय श्रीयुताय तपस्विने ।
सर्वज्ञानाधिवासाय तस्मै वाल्मीकये नमः ॥ २ ॥

त्रैलोक्याधिपतिः श्रियःपतिरसौ रामावतारत्रयं
कृत्वा संविदधे जगत्त्रयमिदं निष्कोणपं सर्वतः ।
भूपोऽयं जगतां शिवाय सदयो मानुष्यदेहं दध-
द्राजाराममहीपतिर्विजयते दिल्लीशदर्पापहः ॥ ३ ॥

प्रणम्य जानकीनाथं राजाराममहीपतेः ।
यशःप्रबन्धं तनुते पण्डितः केशवाभिधः ॥ १ ॥

श्रीमान्परशुरामोऽसौ यस्मिन्क्षेत्रे प्रपूज्यते ।
तत्क्षेत्रवासी विप्रस्तु विधिज्ञः सत्यवाक्छुचिः ॥ २ ॥

वेदवेदाङ्गनिपुणः षट्कर्मनिरतस्सुधीः ।
भगवद्भक्तिनिष्णातः सर्वप्राणिहिते रतः ॥ ३ ॥

न्यायार्जितधनेनैव कुटुम्बपरिपोषकः ।
शम्भुवर्माणि भूपाले दिष्टधर्ममुपेयुषि ॥ ४ ॥

चिन्तयामास मनसि कथं क्षेमं भवेन्नृणाम् ।
अस्मिन्कलियुगे घोरे महाम्लेच्छजयावहे ॥ ५ ॥

म्लेच्छराजेन सर्वत्र वर्णधर्मविघातिना ।
धर्मक्षेत्रेषु सर्वेषु नाशितेषु दुरात्मना ॥ ६ ॥

एवं चिन्तयमानं तं स्वसमाधिमुपागतम् ।
शुक्लवर्षे माघमासे शुक्लपक्षे शनेर्दिने ॥ ७ ॥

चतुर्थ्यां भाविवृत्तान्तं राजारामजयावहम् ।
शिवनारदसंवादरूपेणैव सविस्तरम् ॥ ८ ॥

द्विजः स्वप्ने समवदद्भवानीपतिसन्निभः ।
हिताय सर्वलोकानां भक्तानुग्रहणाय च ॥ ९ ॥

कदाचिन्नारदो योगी त्रिदिवं गिरिशालयात् ।
जगाम सत्कृतस्तत्र देवेन्द्रप्रमुखैः सुरैः ॥ १० ॥

End:

अस्मिन्देवालये स्वामी वर्तते लघु गच्छत ।
इति वाक्यामृतेनैव सन्तुष्टाः काकडादयः ॥ ४७ ॥

यथाप्रधानं पुरतः शिरश्चुम्बिमहीतलाः ।
उपायनानि पुरतो महार्हाणि निधाय ते ॥ ४८ ॥

प्रणेमुस्तं महाराजं वीरत्रयगुणान्वितम् ।
वाग्भिः कांश्चित् स्मितैः कांश्चित् दृशा कांश्चिदरिन्दम ॥ ४९ ॥

संभावयामास नृपः सुभटास्तत्र सङ्गतान् ।
अकारयन्महाराजः स्वस्यागमनसूचकान् ॥ ५० ॥

वादित्रशब्दान्बहुशो नलयन्त्रमहाध्वनीन् ।
तद्वन्महानुत्सवोऽभूज्जनानां देशवासिनाम् ॥ ५१ ॥

धर्मराजागमे यद्वदिन्द्रप्रस्थनिवासिनाम् ।
स्वराज्यं प्राप्य तद्वद्धं सर्वलोकनमस्कृतः ॥ ५२ ॥
प्रतिपच्चन्द्रसदृशः कलाभिर्ववृधे नृपः ॥

एवं श्रीभवशालवंशतिलकः श्रीरामराजप्रभुः
दिल्लीशेन महाबलैः पथिकृतान्प्रत्यूहशैलानिव ।
सर्वान् म्लेच्छगणान्विमथ्य महसा श्रीवैष्णवेनाधुना
तेषामेव पराभवाय विजयी वर्वर्ति कर्णाटके ॥ ५३ ॥

Colophon:

इति श्रीमन्महाराजाधिराजमहाराजछत्रपतिराजारामचरिते काव्ये
केशवपण्डितकृतौ पञ्चमः सर्गः ॥

Subject: Rājārāmacarita. 1-5 Sargas. Complete.

Remarks:—The Ms. is in good condition.

This Rājārāma was the son of the famous Śivāji. The work deals with the life and doings of Rājārām. The details relating to the struggle for Mahārāṭha independence in the Carnatic and the Mahārāṭha country is well depicted in this work. The author Keśavapaṇḍita was probably a contemporary of Rājārām. This work has not been printed so far.

॥ शाहेन्द्रविलासः ॥

4230. ŚĀHENDRAVILĀSAḤ.

Burnell's Catalogue No. 10261. Page 162. Right column. Substance—Palm Leaf. Size—$13\frac{1}{2} \times 1\frac{1}{2}$ inches. Leaves—56. Lines— 5 to a Page. Script—Telugu. No. of Granthas—650. Author—Śrīdhara Veṅkaṭeśa Complete.

Beginning:

विश्वम्भराधूर्वहमङ्घ्रिपद्म-
विभूषणं यस्य विभोश्चकास्ति ।
शिरोविभूषा तु निलिम्पलोक-
सञ्जीवनी पुष्यतु वः स देवः ॥ १ ॥

श्रीकालिदासप्रमुखान् कवीन्द्रान्
वन्दे यदीयानि मुखाम्बुजानि ।
भारत्यधिष्ठाय तथान्वमंस्त
न वैधसीमाननसौधभीमाम् ॥ २ ॥

श्रेयांसि भूयांसि गुणाम्बुराशेः
श्रीशाहभूमीकमितुर्विधत्ताम् ।
स्कन्देन साकं गिरिकन्यया च
नन्दन्स मन्दस्मितमिन्दुमौलेः ॥ ३ ॥

करोमि शाहेन्द्रविलासनाम-
काव्यं प्रसिद्धं त्विह पण्डितेन्द्राः ।
निबन्धनं हि प्रगुणं गृणन्ति
श्लाघ्येन नेत्रा मणिनेव हेम ॥ ४ ॥

अस्ति प्रतीतं भुवनेऽनवद्यं
भास्वत्कुलं भोसलनामधेयम् ।
साम्राज्यलक्ष्मीरनपायिनी यत्
प्रसूतिभाजः सवितुः प्रभेव ॥ ५ ॥

अभूयतेक्ष्वाकुभगीरथश्री-
रामादिभिर्यत्र यशोधुरीणैः ।
आहुस्तदेवाक्षरभङ्गिभेदै-
र्भास्वत्कुलं भोसलनामधेयम् ॥ ६ ॥

रामादिनामान्तरतां प्रपन्नै-
र्मालोजिराजादिभिरेष वंशः ।
कमप्युदारं गमितः प्रहर्षं
कल्पद्रुमाद्यैरिव दुग्धसिन्धुः ॥ ७ ॥

मन्वादयश्चारुमहामहीन्द्रा
भुवं कृतादाविव पुण्यशीलाः ।
कलावन्तोऽकलयन्त हृद्यां
जाताः कुलेऽस्मिन् जगति प्रशस्तिम् ॥ ८ ॥

नृपा इमे शम्भुकृपाविवर्ता
महासुरत्राणमनोज्ञशीलाः ।
अशोभयन्त क्षितिमत्युदारा
दिवं मयूखा इव शीतरश्मेः ॥ ९ ॥

प्रतापसौजन्यवदान्यताद्यैः
शैली गभीरा नृपतिष्वमीषु ।

अनन्यसामान्यतया व्यलासी-
त्सुधाम्बुधेरूर्मिषु माधुरीव ॥ १० ॥

End:

ग्रामोत्तुङ्गतुरङ्गदन्तिशिबिकाहेमाभिषेकादिभिः
सानन्दं कविबृन्दमाकलयतः शाहेशितुः कीर्तये ।
मुक्तादामपरम्परापरिलसन्मल्लीमतल्लीस्रजः
भद्रश्रीरचना भजन्ति ककुभामाकल्पमाकल्पताम् ॥ ९१ ॥

श्रीमद्भोसलवंशमौक्तिकमणेः श्रीशाहपृथ्वीपते-
रायुः स्फीतिमुपैतु सन्तु तनयः प्रख्यातभाग्यश्रियः ।
पारावारपरीतभूवलयसन्त्राणस्थितिर्वर्धतां
गौरीकान्तकृपाकटाक्षविभवैराचन्द्रमातारकम् ॥ ९२ ॥

पश्यत्पादनयादिमाखिलनयस्वातन्त्र्यमूर्जस्वल-
धर्मिग्राहकमानसिद्धममृतस्फीताश्रयस्योक्तयः ।
तस्य श्रीधरवेङ्कटेशसुधियो लिङ्गार्यसूनोः कृतौ
श्रीशाहेन्द्रविलासकाव्यतिलके सर्गोऽजनिष्टाष्टमः ॥

श्रीसाम्बाय परब्रह्मणे नमः ॥

Colophon:

श्रीशाहेन्द्रविलासकाव्यं सम्पूर्णम् ॥

श्रीकृष्णाय नमः ॥

Subject: Śāhendravilāsa 1-8 sargas.

Remarks:—The Ms. is in a fairly good condition.

Śrīdhara Veṅkaṭeśa, better and familiarly known as Ayyāvāl was one of the 46 persons on whom Śahaji showered his benefactions. He was one of the donees of the village of Śahaji-

rājapuram. He has immortalised the name of his patron in this work. This work has not yet been printed.

॥ धर्मविजयचम्पूः ॥

4231. DHARMAVIJAYACAMPŪḤ.

Burnell's Catalogue No. 10169. Page 158. Right column. Substance—Palm leaf Size—$14\frac{3}{4} \times 1\frac{1}{4}$ and $9\frac{1}{8} \times 1\frac{1}{4}$ inches. Leaves—36. Lines 6 or 7 to a Page. Script—Grantha. No. of Granthas—600. Author—Nallādīkṣita. Complete.

Beginning:

श्रीगणपतये नमः ।

विबुधकुलसमृद्धिः सुस्थिरा येन क्लप्ता
प्रणमदभयदाने यस्य दीक्षा प्रतीता ।
जनकनृपतिकन्याधन्यपार्श्वः स देवः
सह जिनरपतीन्दोः श्रेयसे भूयसेऽस्तु ॥

विश्वख्यातैकराजामितसुकृतपरीपाकभूतो नुतश्रीः
कौसल्यायामिवाभूद्रघुकुलतिलको योऽत्र दीपाम्बिकायाम् ।
स श्रीमद्भोसलाख्यामलकुलजलधेरिन्दुरिन्धानतेजः-
सान्द्रः शाहावनीन्द्रो जगति विजयतां मूर्तिमान्राजधर्मः ॥ २ ॥

रामभद्रचरणारविन्दयो-
राश्रयः प्रबलितश्चिकीर्षति ।
भूमिनाथकविचक्रवर्त्यसौ
शाहधर्मविजयोक्तिसाहसम् ॥

अस्माभिः पञ्चविंशे वयसि मदवशे पण्डितंमन्यमुख्यै-
स्तत्राद्दक्षातिचित्रक्रमकवनपथव्यापृतैस्तापितासि ।
तत्पुण्यश्लोकशाहाधिपचरितसुधापूरगाढावगाहै-
र्निःशेषं यातु शान्ति भुवनजननि वाग्देवि मे संप्रसीद ॥

इच्छामात्रात्त्वयमिदमुपानम्रतां याति येषां
हृद्योल्लेखः सरलचरणाः कोमलं संविधानम् ।
आचन्द्रार्कं सरसकवयः क्षेममेते भजन्तां
पृथ्वीचक्रं कुकविनिहितं शश्वदुज्जीवयन्ति ॥

शङ्कासङ्कुलभीरितैः सुमहता यत्नेन पद्याधमै-
र्द्वित्रैरेव दुरन्वयैः प्रतिमुहुर्विस्मृत्य चेतो धृतैः ।
भूयो वश्यगिरां महामतिमतामुद्गीर्णकर्णज्वरैः
श्रेयः साम्नुचितं भजन्ति कतिचिद्धिङ्मूर्खभावं विधेः ॥

साहित्यरत्नकोशाय शब्दब्रह्मस्वरूपिणे ।
रामभद्राय मखिने रामभक्त्यब्धये नमः ॥

End:

किं बहुना । तस्य ।किल भोसलकुलकलशासिन्धुकुमुद-
बन्धोरपरिमितान् अखिलजगत्प्रतीतान् सकलजनानन्द-
नचणान् सद्गुणगणान् वर्णयितुमलब्धवर्णः सहस्रमुखोऽपि
वैदुष्यशालिप्रमुखो विशेषस्तपोविशेषेण विमुक्तसंख्यानि
मुखानि विगतेयत्तामपि विद्वत्तामवाप्तुकामो नूनं पवना-
शन एव रसातलगर्तेऽवर्तत ॥

सायं मुहुः सुमनसामुपसेवनीयो
हृद्यैः करैः कुवलयस्य विकासकारी ।

सर्वज्ञमौलिमणिरत्न समाः सहस्रं
सन्मण्डलो जयतु शाहमहीमहेन्दुः ॥

अळिकुलभाभमूर्तिरवनीतनयासहितो
विहितनिशाचरव्रजनिरासशरासधारः ।
सकलवरप्रदः स रघुवंशवतंसविभुः
सहजिनरेश्वरस्य यशसां गुरुतां कुरुताम् ॥

Colophon: Leaf No. 11.

इति श्रीमद्विश्वविदितभोसलकुलपयोधिसम्भवशहजिराजचन्द्रसन्दर्शन-
मात्रसमुद्वेलकृतसारस्वतसागरस्य नल्लादीक्षितस्य कृतौ धर्म-
विजये प्रथमस्तबकः संपूर्णः ॥

Leaf last.

इत्यभिनवभोजराजशाहमहीमहेन्द्रसुन्दरमुखचन्द्रसन्दर्शनमहिमसान्द्री-
कृतवाग्विलासस्य रामभद्राध्वरिवरप्रियशिष्यस्य तदीयवंशजन्मनो
भूमिनाथविद्वत्कवेः कृतौ धर्मविजये चतुर्थः स्तबकः ॥

Subject: Dharmavijaya, 1—4 stabakas.

Remarks:—The Ms. is in good condition. There is a paper transcript of this Ms. available in this library. See T. V. No. 69.

Nallādīkṣita, author of this work was a near kinsman and student of the famous Rāmabhadra Dīkṣita. He seems to have been otherwise known as Bhūminātha Kavi. The work deals with the life of his patron, the famous Śāhaji who reigned at Tanjore between 1684—1710 A. D. Fittingly enough the author says that Śāhaji was a modern Bhoja, king of Dhārā. This work is not available in print.

॥ भोसलवंशावलिः ॥

4232. BHOSALAVAMŚĀVALIḤ.

Burnell's Catalogue No. 5021. Page 161. Right column. Substance—Paper. Size—$9\frac{1}{5} \times 4\frac{4}{5}$ inches. Sheets—4. Lines— 12 to a Page. Script—Devanāgarī. No. of Granthas—63. Author—Gaṅgādhara. Complete.

Beginning:

श्रीगणेशाय नमः ॥

आसीदाशावकाशप्रसृतसितयशा दक्षिणाशाविभूषः
शौर्यस्त्रीकेळिसौधायितकरकमलोदग्रराजत्कृपाणः ।
नानादेशोपसीदद्बुधजननिकरस्तूयमानावदान-
श्चण्डांशोरन्ववाये त्रिभुवनमहिते श्रीविराटक्षितीन्द्रः ॥ १ ॥

सौन्दर्यसिन्धुरिति सारसलोचनाभिः
सौजन्यभूमिरिति साधुजनावलीभिः ।
वैदग्ध्यभूमिरिति पण्डितमण्डलीभिः
आलक्ष्यते स्म कलितावतारस्सुधीमान् ॥ २ ॥

तदन्ववाये प्रथितप्रभावः
श्रीमानभूदेकनराधिपो यः ।
औदार्यशौर्यादिगुणैरवन्यां
पुरातनक्षोणिभृतोऽत्यशेत ॥ ३ ॥

त्यागे दधीचिशिबिकर्णमुखाः प्रतीताः
शौर्येऽर्जुनप्रभृतयो धरणीमहेन्द्राः ।

आसन्कृतादिषु युगेषु कलौ तु तेषां
तेषां च यो धुरमगाहत पूतकीर्तिः ॥

तस्मादजायत निजायतनं गुणानां
आजानबोधविमलः परसोजिनामा ।
यस्य प्रतापदहनं करवालधूमः
प्राप्तो विपक्षमनुमापयतीह चित्रम् ॥

End:

गद्यप्रबन्धैरपि पद्यबन्धैः
चम्पूप्रबन्धैरपि हृद्यबन्धैः ।
शास्त्रप्रसङ्गैर्विविधैः दिनानि
नयत्यसौ शाहमहीबलारिः ॥ ३३ ॥
हृद्ये सारस्वताब्धिन्यनवरतरसह्लादिनीनिर्गताभिः
शृङ्गारोत्कृष्टतत्तद्रसमयविसरत्सारणीधोरणीभिः ।
व्यासे वैरिश्रवामामृदुलपदतलन्यासधन्ये महीन्दो-
रालोकालोकभूमीधरमधिभुवनं कोऽध्वनीनो विनास्मात् ॥

Colophon:—Nil.

Subject :—The story of the Bhosalavaṃśa.

Remarks:—After the end of the last verse (34th verse) we find the following :—

श्रीसाहजिभूपतिवंशवर्णना रामस्य पूर्वैरिव भूसुरेन्द्रैः।
गङ्गाधरार्यैर्विहिता मखीन्द्रैः रामेण सेयं लिखिता त्वदाज्ञया ॥ १ ॥

श्रीशारदाप्रसादेन चतुरङ्गीयसद्मसु ।
सर्वेषु रामचन्द्रेण भ्राम्यतेऽश्वोऽतिवेगतः ॥ २ ॥

श्री वें प्र म ग ण ते चं मा यतस्सदा ॥

॥ मतुरभ्रा ॥ सुषादेवेम्यद्रेश्वोनतिगीस्सुचरारम्० ३ ॥ अत्र तृतीयस्य पद्यस्य प्रथमद्वितीयतृतीयचतुर्थपादाः प्रथमद्वितीयतृतीयचतुर्थ-पङ्क्तिषु चतुरङ्गीयासु यथाक्रमं लेख्याः ॥ तथा अष्टमपङ्क्तिमारभ्य पञ्चमान्तं अपसव्येन लेख्याः । एवं च चतुष्षष्टिगृहाः परिपूर्णा भवन्ति । ततश्च श्रीशारदाप्रसादेनेति द्वितीयं पद्यमुच्चार्य प्रथमः श्रीवर्णो यत्र तत्राश्वः स्थापनीयः । तदुत्तरं शारदादयो यत्र वर्णा वर्तन्ते तत्र तत्र क्रमेणाश्वश्चालनीयः । एवं प्रकारेणो(णे)दं पद्यमा-वर्तितं चेदश्वः चतुःषष्टि ३४ (६४) गृहेष्वपि गच्छति । यथा० उपरिलिखि.. द्रष्टव्यम् ।

इदं श्रीमल्लक्ष्मी ...कोल्लापुरकरगिण्डी

वेङ्कटभट्टसूरि............पद्यम् ॥

श्री	वें	प्र	स	ग	ण	ते	चं
सा	य	त	स	दा	म	तु	भ्रा
सु	शा	दे	वे	प्र	म्य	द्रे	श्वो
न	ति	गी	र	सु	च	रा	रं
रं	रा	च	सु	र	गि	ती	न
श्वो	द्रे	म्य	प्रं	वे	दे	शा	सु
भ्रा	तु	म	दा	स	त	य	सा
चं	ते	ण	ग	स	प्र	वें	श्री

Though the work is known as Bhosalavaṃśāvali, one need not be under the notion that the work gives a complete genealogical list of all the kings of the Bhosala family. The work deals in the main with Śāhaji (1684-1710) alone. The author Gaṅgādhara should have been his contemporary, and naturally a protege of his. This work has not been printed so far.

The letters found in the columns given above represent the game of chess as was practised in ancient India. The so-called

Aśvagati is sought to be indicated therein but there seems to be some mistake. A paper transcript of this Ms. is available in this library. See T. V. No. 419.

॥ कोसलभोसलीयम् ॥

4233. KOSALABHOSALĪYAM.

Burnell's Catalogue No. 10270. Page 163. Right column Substance—Palm leaf Size—$14\frac{1}{4} \times 1\frac{1}{4}$ inches. Leaves—28 (1-28). Lines—4 to a Page Script—Telugu. No of Granthas—380. Author—Śeṣācalapati. Incomplete.

Beginning:

श्रियं लसत्कौस्तुभबिम्बितात्म-
विलोकनोदञ्चदुरास्थितच्छिाम् ।
स श्रीनिवासः कलयन् कृतार्थां
श्रीशाहनेतुः श्रियमातनोतु ॥

सा कान्ता वागेकवर्णाप्युदीर्णा
नानावर्णाकारहृद्यानवद्या ।
अस्मिन्जिह्वारङ्गवेद्यां पदोद्य-
न्मञ्जिरिश्रीशिञ्जितान्यातनोतु ॥

यदेकरूपञ्च तदेकवाक्यं
यदेककण्ठञ्च यदेकभावम् ।
तत्त्वं शिवाख्यं तदुपास्याधाम
नानार्थसिद्धिञ्च कृतौ भजामि ॥

श्रीवाल्मीकिव्यासमुख्यस्तवाख्य-
श्रीहर्षादिस्तोत्रमुख्यस्फुरद्भुः ।

आत्मारामे भाति मे कालिदासः
स्तोत्राकारं तत्फलञ्चान्वभूवम् ॥

सायासं कवनं ततोऽपि कठिनं काव्यं ततो रूपकं
तस्माद्धन्यमतः पदध्वनिरसौ वाग्वैखरीजीवितम् ।
तद्रामायणभासिमज्जयकथां जल्पान्ध्रवाक्पाणिने
श्रीशेषाचलपत्यमात्यकुशलोऽस्तीत्याह शाहाधिपः ॥

अन्यादृशेहशपदामहिमाभिरामं
रामं द्वितीयमिवतुर्यमिदं युगञ्च ।
धन्यं विधातुमुदितं भुविशाहवीरं
धीरं मदुक्तिकुसुमैः परिपूजयामि ॥

शाहेन्द्रदत्तशिबिकाकनकाभिषेक-
सम्भावनारुणभिदप्रतिकारहेतोः ।
यत्साहसं विरचये ननु तत्र वाणी
त्वत्तोऽधिकं प्रतिभुवं कलये न नूनम् ॥

करोमि यत्कोसलभौमलेन्द्र-
चरित्रमर्थद्वितयैकपद्यम् ।
विपश्चितां शाहविभोश्च तस्मा-
दनुग्रहायापि परिग्रहाय ॥

साकेतनामलसिता नगरी विभाति
नीराजिताम्बरमणिर्निजसालरत्नैः ।
श्वसन्ति यत्पदमुदञ्चितभोगभाग्य-
युक्तं जनामहिमधाम लसद्यशश्च ॥ ६ ॥

End:

परः प्रजानां परिपोषणादौ

पितामहास्त्रेण दिशः प्रकाश्य ।

दशास्यहर्ताजनि सिन्धुदेशे-

ष्वयं समुत्साहविभुः ससैन्यः ॥ ४० ॥

Colophon: (Leaf No. 11).

श्रीभोजो निजगोत्रकारणभरद्वाजो निवृत्त्यन्वया-

यः श्रीवेङ्कटपत्यमात्यतिलकाज्जातोऽक्कदेवी विभोः ।

श्रीशेषाचलपत्यभिख्यकृतिनस्तस्यान्ध्रवाक्पाणिनेः

काव्ये भोसलकोसलेन्द्रचरिते सर्गो द्वितीयोऽभवत् ॥

Subject: Kosalabhosalīya 1-6 sargas.

Remarks:—The Ms. is in good condition. The same work is again repeated from the 28th to the 32nd leaf. A paper transcript of this work is available in this library. See T. V. No. 482.

This work too like the previous one, seems to have been composed by a contemporary and protege of the hero of the composition, Śāharāja. The author is Śeṣācalapati and it is very probable that he too was a grantee of the village of Śāhajirājapuram. The work deals with the life and doings of his patron, Śāhaji.

Though the name of the work is Kosalabhosalīya, the work deals, in the main, with Śāhaji. This work is not available in print.

॥ शाहराजाष्टपदी ॥

4234. ŚĀHARĀJĀṢṬAPADĪ.

Burnell's Catalogue No. 5018. Page 161. Left column.

Substance—Paper. Size—$9\frac{1}{2} \times 5\frac{1}{8}$ inches. Sheets—20 (3-22). Lines—8 to a page. Script—Devanāgarī. No. of Granthas—275. Author—Śrīnivāsa. Complete.

Beginning:

....भासमाननिजपदपीठिका ॥ ३ ॥

शरणगतैरथषाष्टिहायन, सुकरिघटातुरगोचमावालि, विविधमणीकनकाद्युपायन, शतनिकरेण सदार्पितेन च, निबिडीकृतनिजकोशक, जगतीतलविदितातुलशुभतरभोसलगोत्रनायक, मरसगुणावलिमौक्तिकाकरनृपतिलकैकमहीक्षितोवर, सुतशुभचोलमहीप्रभो निजकरसादितसुरसालक, तरसाजितरिपुसाहस, शहजिमहीप महाप्रभो, अखिलकविजनकैरवरात्रिनायक, वितरणकेलिजिताकज, अमरतरुवरधेनुमणे, त्वया लसदलकाभिधनगरेम हाम्रकुरे बहुमकरे कृतवास धीरतर शृणु मे वचः ॥ ४ ॥

End:

किंगद्गदकथितैरिममत्रसङ्कल्पितललितैरथ तवतुङ्गस्तनभरसङ्गस्फुटलसदङ्गः, प्रसरदनङ्गतापरहितो बिम्बस्फुटमधुरा, धारमिहचुम्बत्वलमितरा, सुलभमयं भद्रवचनगुंभश्रुतिकुम्भकुम्भस्तानिपरिरम्भणानि सहसा, किञ्चिद्गलितमये,

वसनमुदञ्चद्रतिसमयेऽपनयतु किञ्च स्फुटमणितञ्च प्र-
कुरु रुतञ्च द्रुतमिह मञ्जुवेणिललिते नायको भवतु ससु-
खोऽधुना ॥ ४ ॥

Colophon: Nil

Snbject: Śāharājāṣṭpadī.

Remarks:—The Ms. is in a decaying condition.

This short pamphlet contains certain phrases in praise of Śāhaji, set to a particular kind of tune. The author is one Śrinivāsa. The work is full of scriptorial blunders. The work has not been printed.

॥ शाहराजसभासरोवर्णिनी ॥

4235. SĀHARĀJASABHASAROVARNANĪ.

Burnell's Catalogue No. 5022. Page 161. Right column. Substance—Paper. Size—10×4¼ inches. Sheets —4. Lines— 9 to a Page. Script—Devanāgarī. No. of Granthas—54. Author— Lakṣmaṇa. Complete.

Beginning:

जयति जितनरेन्द्रः काशिकाधीशचन्द्रः
सुमतिकुमुदचन्द्रः स्फारसत्कीर्तिसान्द्रः ।
प्रवितरणवितन्द्रः पूर्णभोगामरेन्द्रः
स्फुटमितर उपेन्द्रः शाहविश्वम्भरेन्द्रः ॥

अपि च विचक्षणवरसुरवृक्षः, वचसि च सुचतुरधिषणसदृक्षः ।
सचिवचयशशभृदचरमपक्षः, प्रचितक्षितितलरक्षणदक्षः ॥

सुरुचिरतरकरुणाकरवीक्षः, दुर्धरशरधरपरहररूक्षः ।
कलितकुलीलकलिक्षतिदीक्षः, वरजनतर्जनदुर्जनशिक्षः ॥

End:

अपि च नतममुदयभरणमेधितखलसंहरणसमेततनुम-
नोगतपरमेहितपूर्तिविचितनमेलितहिमगिरितनयाहेलितशृ-
ङ्गारभरसहेलितभासितकाशिपुरेश्वरनिर्भरभजनपरे ॥

शाहेन्द्रो महितः श्रयन्ति विबुधाः शाहेन्द्रिरं नो समः
शाहेन्द्रेण च रोचतेऽखिलकला शाहेन्द्रिराय क्षितौ ।
शाहेन्द्रात्सुकृतं कलौ वरगुणाः शाहेन्द्रिरस्यैव त-
च्छाहेन्द्रे तनया भवन्त्विति परं त्वाशासनीयं बुधैः ॥

Colophon:

इति श्रीविश्वेश्वरशास्त्रिसुतलक्ष्मणविरचिता शाहराजसभासरोवर्णिनी
कलिकोत्कलिकाख्या चूर्णिका सम्पूर्णा ॥
श्रीवाग्देव्यै नमः ॥

Subject: Śāharājasabhāsarovarṇinī.

Remarks:— The Ms. is in a fairly good condition.

This work of Lakṣmaṇa, son of one Viśveśvara Śāstrin very much resembles the previous work No. 4234. This work has not been printed so far.

॥ शाहराजनक्षत्रमाला ॥

4236. ŚĀHARĀJANAKṢATRAMĀLĀ.

Burnell's Catalogue No. 10304. Page 61. Right column.

Substance—Palm leaf. Size—16⅞×1¼ inches. and 13½×⅞ inches. Leaves—24. Lines—3 to 4 to a Page. Script—Telugu. No. of Granthas—175. Author—Nārāyaṇa. ? Complete.

Beginning:

भूयाद्भूतलभूषणस्य भवतो भूयाद्भुजाग्रे जयो
वेलाशैलशिलालवालवलया निर्याति वीर्याङ्कुरे ।
श्रीशाहावनिश्वरहा······मञ्जूपालजालोज्वल-
त्कोटीराग्रमणीभटस्फुटमहः सन्दोहसन्दोहदे ॥

आकर्णय देव समाम्रेडितसाम्राज्यचातुर्यतुर्ययुगसमाक्रा-न्तचतुरन्तमहचिक्रान्तरानिरन्तरचाकितधर्माभयदानदीक्षि-तक्षिततरकलिबलविस्रमरदुरितस्वैरसञ्चार ।

End:

श्रीशाहक्षोणिपालप्रभुवररुचिमन्नायकद्योतमाना
हृद्या सद्वृत्तमुक्ताफलघटितगुणस्यूतिसन्दर्शनीया ।
विद्वन्नारायणेनप्रविहितरचनाभासुरालङ्क्रियाभिः
सैषा नक्षत्रमाला विलसतु विदुषां कण्ठभूषायमाणा ॥ ३० ॥
रक्षाकर्माणि दीक्षिते त्वयि ब···भद्रेण निद्रास्पृहां
प्रा···नप्रणयोद्धतप्रणयिनो नर्माणि निर्माति यः ।
विद्वन्मण्डलमण्डने भति(प्रभैवति) श्रीशाहपृथ्वीपते
हृष्यन्ती विकिरत्यसौ प्रतिपदं लक्ष्मीः कटाक्षाङ्कुरान् ॥

Colophon: Nil.

Subject: Śāharājanakṣatramālā.

Remarks:—The Ms is in a fairly good condition. The Ms. is full of scriptorial blunders.

This work of Nārāyaṇa consists of 27 verses in praise of his patron Śāhaji and three more verses in relation to himself and his connections with the king. The work has not been printed so far.

॥ सुमतीन्द्रजयघोषणा ॥

4237. SUMATĪNDRAJAYAGHOṢAṆĀ.

Burnell's Catalogue No. 5017. Page 163 Left column. Substance—Paper. Size—$7\frac{1}{4}\times4\frac{3}{4}$ inches. Sheets—21. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—320. Author—Sumatīndra. Complete.

Beginning:

॥ श्रीगणाधिपतये नमः ॥

जयघोषणालक्षणम् ॥

गद्यैः प्रत्येकपद्यान्तैः चतुर्भिर्वर्णयेत्क्रमात् ।
अवधित्वेन पूर्वादिचतुर्दिक्सीमपर्वतान् ॥ १ ॥

ततः सप्तविभक्तयङ्कैः सप्तभिर्गौडरीतिकैः ।
पद्यगद्यद्वयं सर्वे जनाः शृणुत मद्वचः ॥ २ ॥

शौर्यादिगुणवानेष एवेति भुवि घुष्यताम् ।
घुष्यतामिति शब्दान्तैर्नेतुः शौर्यादयो गुणाः ॥ ३ ॥

घुष्यन्ते यत्र साटोपं सा भवेज्जयघोषणा ।
अस्यामाद्यन्तयोः कार्यं पद्यमाशीसमन्वितम् ॥ ४ ॥

दिशि यस्यामयं नेता तामारभ्यैव घोषयेत् ।
नेतुर्नामाङ्कितः श्लोको नायकोऽत्र महीपतिः ॥ ५ ॥

श्रीगणेशाय नमः ॥

जैत्रश्रीरधिकाधिरोहतु भुजाखड्गाभकद्गासिकां
श्रीशाहावनिभर्तुरुल्लसदसिस्वार्होपबर्होज्ज्वलाम् ।
दोस्तेजोऽस्वसमस्तवैरितिमिरे जामीव(?)भूमीसखी
खेलन्ती वसुधावरोधसदने वेलाद्रिसालाञ्चिते ॥

प्रथममथकतिपयशुभशकुनकथितविजयागमेनहरिहरिदाभि-
मुखप्रचालितेन

* * * *

आगौरीगुरुशैलमा च मलयादापूर्वपश्चाद्रिरं
सर्वौघप्रकटाभिषेणनयुजा श्रीशाहभूमीभुजा ।
आक्रान्तं नृपमौलिभिः सह महाभद्रासनं सन्मणी-
जुष्टं धृष्टमिति स्फुटं ननु जना भो घुष्यतां घुष्यताम् ॥

End:

अवेलोऽयं दुग्धाम्बुधिरनुपशल्यो हिमगिरिः
स्थिरो ज्योत्स्नापूरो घनहिमभरो शीतपरुषः ।
अबन्धश्चोल्लोचो लसति जगदण्डे जयरमा
गृहे शाहक्षोणीवर तव भरः कोऽपि यशसाम् ॥

Colophon:

इति चाटुश्लोकाः समाप्ताः ॥

Subject: Sumatīndrajayaghoṣaṇā.

1	जयघोषणा	Sheet	1—10
2	विरुदावली 1—4 Skandhas.	,,	10—15
3	गाथा	,,	15—19
4	अनन्तरप्रसङ्गः	,,	19—20
5	चाटुश्लोकाः	,,	20—21.

Remarks:—The Ms. is in good condition. The work is in praise of king Śāhaji I who reigned between 1684—1710 A.D, The work is not available in print. The work is full of errors.

॥ सुमतीन्द्रजयघोषणा ॥

4238. SUMATĪNDRAJAYAGHOṢAṆĀ.

Burnell's Catalogue No. 10306. Page 163. Left column. Substance—Palm leaf. Size—10×1½ inches. Leaves—13. Lines—4 or 5 to a Page. Script—Grantha. No. of Granthas—170. Author—Sumatīndra. Jayaghoṣaṇā only.

Beginning:

जैत्रश्रीरधिकाधिरोहतु॰ Same as No. 4237.

End:

एषा मङ्गलभाषणा गुणवती शब्दार्थनिर्दूषणा
भावोद्यद्रसपोषणा कविसदःकर्णावलीभूषणा ।
रत्नैरिद्धविशेषणा पदमयैर्भूयोजयाऽन्वेषणा
भूजिष्णोर्जयघोषणा विजयतां शाहप्रभोस्तोषणा ॥

Colophon: Nil

Subject: Sumatīndrajayaghoṣaṇā.

Remarks:—The Ms. is in good condition.

॥ कलिविडम्बनम् ॥

4239. KALIVIḌAMBANAM.

Burnell's Catalogue No. 5039.

Substance—Paper. Size—$9\frac{1}{2} \times 4$ inches. Sheets—**12.** Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—250. Author—? Complete.

Beginning:

श्रीमहागणपतये नमः ॥

शश्वद्वीथीविटङ्काधिपचरणसरोजातभृङ्गायमान-

स्वान्तस्वैरप्रमोदामृतरसजलधौ गाहमानो महात्मा ।

धन्यः श्रीशाहराजो जगति विजयते भद्रपीठाधिरूढः

प्रौढो निःशेषविद्यागुरुरिव विदुषां पोषकः सार्वभौमः ॥ १ ॥

शृङ्गारोज्ज्वलकाव्यनाटकमहागीतप्रबन्धाधिकं

यो निर्मात्यनिशं स्वभावमधुरं नानार्थरत्नाकरम् ।

सर्वेषां हृदयङ्गमं सुविदुषां वाणीविलासास्पदं

तं प्रस्तौम्यवनीशशाहजिविभुं नान्यं महीनायकम् ॥ २ ॥

* * *

राजद्वारं गभीरं बहुतरमिह कः किं किमुद्दिश्य कुर्यात्

तत्तन्न ज्ञायते तत्स्वमधिकमधुना घोरगोत्रप्रकारम् ।

आनीयादभ्रमूल्यान्यपि वयमसकृद्भेषजान्येव यूयं
स्वास्वामस्त्वेति नित्यं प्रकथितमिनभो(?) तद्वुदत्सोदरेण ॥

अस्माभिर्न मिलन् यदीह निवसेत् वैद्यः स एकः पृथक्
का वा हानिरनेन सम्भवति नः तस्यैव किन्तु प्रभो ।
सङ्घे शक्तिरिति ब्रुवन्ति हि कलौ सत्यं त्वसत्यं भवेत्
सत्यं स्यादपसत्यमित्यकथयद्दुष्टः स दष्टोष्ठकः ॥ ८ ॥

तदुक्तेः भिषजः अस्य प्रत्युत्तरदानाभिप्रायमाह—

यत्पाञ्चभौतिकमिदं सकलं जगच्च
यद्येकमप्यहह सत्यमितः प्रभिन्नम् ।
किन्त्वाद्वितीयममलं परमप्रमेयं
जानासि शाहनृपते तदिदं त्वमेव ॥ ९ ॥

रुद्रदे(?)कपिचण्डेनाप्येतदुक्तं नराधिप ।
ततो विज्ञापनं कर्तुं ग्रन्थरूपेण तेऽनघ ॥ १० ॥

* * *

ततस्त्वहं गुप्तिगोपाः निशिन्दा च महामते ।
महल्दारी च यन्ता च पञ्चैते वयमादरात् ॥
सम्यक्परीक्ष्यौषधानि क्षोदयित्वा ह्युलूखले ।

End:

राजन् शाहमहीपते यदि भिषक् प्रामाणिकः स्यात्कलौ
सत्यं तस्य न वेतनं समधिकं सौख्यं न तज्जीवनम् ।

यद्यप्येवमसन्निधौ तव सहावासस्तु नीचैरिह

सारं स्मारमिदं महीशशरणं त्वामत्र मत्वागमम् ॥

भूलोकेन्द्रमुपाश्रयन्नहमिह श्रीशाहभूपालक

त्वां कारुण्यरसैकमूर्तिमसकृन्नीचैश्च नीचोक्तिभिः ।

मध्ये शालमधिष्ठितैरिनवसुश्रीकाराचित्तैः सदा

मत्तैर्भीतिमुपागतोऽस्मि कृपया मां पाहि पृथ्वीपते ॥

Colophon:

इति श्रीकमलालयमाहात्म्ये गजशालाकलिविडम्बनं नाम

प्रथमोऽध्यायः ।

Subject: Kaliviḍambana. A petition to the king Śāhaji represented by an elephant physician who was in charge of the elephants at Tiruvālūr.

Remarks:—The Ms. is in a fairly good condition.

This work contains a complaint lodged against the authorities who were in charge of the king's elephants. The mahouts complain to the king that the elephants are not well cared for and that the officers steal away much of what should, by order of the state, be apportioned to the maintenance of the elephants. This is therefore a petition and is addressed to Śāhaji. The work has not been printed.

॥ भोसलवंशावलीचम्पूः ॥

4240. BHOSALAVAMŚĀVALĪCAMPŪḤ.

Burnell's Catalogue No. 5020. Page 160. Right column.

Substance—Paper. Size—$9\frac{7}{10} \times 4$ inches. Sheets—28.

Lines—9 to a Page Script—Devanāgarī. No. of Granthas—459. Author—(Naidhruva) Venkaṭeśakavi. Complete 1st Āśvāsa only.

Beginning:

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥

श्रीसीतारमणेन सज्जनपरित्राणाय दुष्कर्मकृ-
त्संहाराय समस्तधर्मचरितस्थित्यै गृहीतं धनुः ।
दत्तं कुम्भभवेन पङ्क्तिमुखभित्स्यादित्युदीर्णाशिषा
सोऽयं श्रीशरभोजिराजनृपतेर्दद्याच्छ्रियं निस्तुलाम् ॥ १ ॥

अम्भोराशिसुता निजां मणिवरे दृष्ट्वाकृतिं बिंबिता-
मन्यां वक्षसि लालयत्ययमिति क्रुद्धावतीर्योरसः ।
पार्श्वे नम्रमुखं स्थिता पदनखे दृष्ट्वा तु बिंबं विभो-
र्नम्रोसाविति मानवेगविगमाज्जातस्मिता पातु वः ॥ २ ॥

अम्भोधेर्मथने दहंस्त्रिजगतीं जातः परैर्दुर्दमो
देवैर्द्राकबलीकृतो बलवता येनैव हालाहलः ।
शैलाधीशसुतापतिः स भगवान्साम्राज्यमव्याहतं
तन्याच्छ्रीशरभोजिराजनृपतेः सर्वज्ञचूडामणेः ॥ ३ ॥

देवश्चन्द्रकलाधरो यदि जगत्सेव्यः प्रमाणं श्रुतिः
तत्सिन्धौ यदि तत्प्रकाशनपरास्सन्त्येव चेद्भूसुराः ।
तानेतानपहाय कुत्र निपतेच्छ्रीराघवार्यात्मज-
श्रीमद्वेङ्कटनामलाञ्छनकवेस्स्निग्धप्रणामाञ्जलिः ॥ ४ ॥

वाणीपादयुगं प्रणम्य कलये चम्पूप्रबन्धं कवि-

श्लाघ्यं श्रीशरभोजिराजचरितव्याख्यानमर्थोज्ज्वलम् ।

कन्दर्पप्रमदाकराब्जकलशीमाध्वीकसेकस्फुर-

न्मृद्वीकाफलमाधुरीसहचरी यत्रास्ति वाग्वैखरी ॥ ५ ॥

अस्ति प्रभुः कश्चिदशेषलोक-

स्वामित्वलाभेन समस्तसेव्यः ।

जगज्जनन्या जलराशिपुत्र्या

कृतप्रतिष्ठो गृहमेधितायाम् ॥ ६ ॥

वर्णानशेषान्वपुषा सिसृक्षोः

क्षात्रं कुलं जातममुष्य बाह्वोः ।

सुधाशनारातिसुदृक्कपोल-

पत्राङ्कुरग्लानिकरप्रतापान् ॥ ७ ॥

साहस्रांशवमैन्दवं च महती ये द्वे कुले विश्रुते

तत्र श्रीरघुवंशनाम्नि महिते मित्रान्वये भोसलः ।

राजाभूत्सुमतिः समग्रविभवैः आखण्डलप्रक्रियः

क्षोणीरक्षणदक्षिणो क्षितिभुजामग्रेसरः केसरी ॥ ८ ॥

उन्मत्तकैर्मानुषलोकभाग्यैः

चित्रैश्चरित्रैरनघैः प्रजानाम् ।

लक्ष्मीपतिर्भोसलराजनाम्ना

जज्ञे जगद्रक्षणजागरूकः ॥ ९ ॥

End:

विष्णुयशोजाततया
कलिनिग्रहकृच्चरित्रयोगाच्च ।
कल्कीव भाति भूमौ
भोसलकुलशरभशौरिरियम् ॥

संरक्षन्निगमं सुगोत्रवहनो व्यक्तक्षमः संश्रित-
प्रह्लादो बलिजित्कृतार्जुनयशो वृद्धिश्च रक्षोदयः ।
संप्राप्तो बलभद्रतां विजयवान् जेता कलिं चर्चया
व्याख्यात्येष हि भोसलेन्द्रनृपतिः श्रीशावतारान्दश ॥

इति भगवदवतारतया कवीन्द्रैः वर्ण्यमानो विद्वद्भिः 'आचन्द्रतारकं विजयस्व' इति त्रिसन्ध्यं प्रार्थ्यमानः शरभोजिमहाराजो मूर्तिमान् धर्म इव आचन्द्रार्कं विजयताम् ॥

काले वर्षति वासवो वसुमती सस्योज्ज्वला जायते
षट्कर्माणि वितन्वते क्षितिसुरा वर्णैस्त्रिभिः पूजिताः ।
धर्मश्रीः कलिदुर्जया विजयते सर्वत्र संचारिणी
वीरश्रीशरभोजिराजनृपतौ विश्वंभरां बिभ्रति ॥

श्रीमन्नैध्रुववेङ्कटेशकविना साहित्यभोजेन सत्
वीरश्रीशरभोजिराजचरितं शब्दार्थचित्रं नवम् ।
सन्तश्चेतसि सर्वमङ्गलयुतं चम्पूप्रबन्धं रसै-
रास्वाद्यं दधतामयं च लभतामाचन्द्रतारस्थिरम् ॥

Colophon:

इति भोसलवंशावलिचम्पुप्रबन्धे श्रीशरभोजिराजचरितवर्णनं नाम प्रथमाश्वासः समाप्तः ॥

श्रीसांबसदाशिवार्पणमस्तु ॥

Subject: History of the Bhosalavaṃśa—The Maharaṭha Rulers of Tanjore.

Remarks:—The Bhosalavaṃśāvali summarises the story of the ancestors of Serfoji I and deals with his life in full. Naidhruva Veṅkaṭeśa, the author was a protege of Serfojee I, who ruled between 1711—28 and he belonged to the Naidhruvakāśyapagotra. The work has not been printed so far.

॥ शरभराजविलासः ॥

4241. ŚARABHARĀJAVILĀSAḤ.

Burnell's Catalogue No. 4994. Page 162. Right column. Substance—Paper. Size—$9\frac{7}{16}\times 4$ inches. Sheets—45. Lines—7 or 8 to a Page. Script—Devanāgarī. No. of Granthas—688. Author—Jagannātha. Complete.

Beginning:

श्रीदक्षिणामूर्तये नमः । श्रीदेव्यै नमः । श्रीगुरुभ्यो नमः ।

अस्तु चिरन्तनसूक्ति-
प्रस्तुतचरणांबुजप्रभावं नः ।
निस्तुलमभीष्टसिध्यै
वस्तु गिरीशाङ्कभूषणीभूतम् ॥ १ ॥

प्रसीदतु मे भगवान्निजकरकमलाग्रजाग्रदवबोधमुद्रासंदर्श नदूरीकृतदुरशमतमाभ्यन्तरतमःपटलैः कुम्भसंभवप्रमुखैर्म-

हामुनिभिरहर्निशमभिष्टूयमानमहिमा श्रीमान्वटतरुमूलगेही देवः ॥

जयन्ति खलु माहात्मपथा जातजनघनाज्ञानतिमिरमुष्टिन्धयनखेन्दुकिरणशालिचरणाः श्रीमद्दक्षिणामूर्तिमूर्त्यन्तरायमाणावतरणाः कामाक्षिसूरिनामानः श्रीदेशिकचरणाः। सन्तु नाम निकामं केऽप्यपूर्वकल्पनमसंप्रदायं इति अशेषकविजनानुमतं छायानुसरणं प्रहाणमिति पश्चाशता वर्णैरेव सहस्रशः परिवर्तमानैरनेकधा विवर्तमानायां महाद्भुतेन निजानुभावेन प्रतिपुरुषविशेषमभिनवतयैवाविर्भवन्त्या भगवत्या गिरां देव्याः क्वाचित्कं कादाचित्कं च संवादं चौर्यमिति जल्पन्तः स्वयमनेकशतप्रबन्धायमानपदद्वयमात्रमेलनसाहसाः परमश्रमाभात्रफलभागिनः पुरोभागिनः ॥

End:

अतिशयितसुमित्रापुत्रसौभ्रात्रेण छायाबिम्बेनेव स्वमनुसरता श्रीतुलजाजीभूपनाम्ना सह भ्रात्रा उपभुञ्जानः चिराय साम्राज्यसुखानि शश्वदाचरन् विश्वजनीनान्येव कृत्यानि प्रवर्तयन्ननवरतमिष्टापूर्तानि, मानयन् महतः, अनुगृह्णानो दीनान्, निगृह्णानः खलान्, अतृप्त इव संगृह्णानो गुणिनः, सकललोकानन्दनश्रुतः, श्रुतानुगुणदर्शनः, दर्शनानुगुणफलोदयोऽसौ जगति विजयते विजयतेजाः प्रतिनृपतिसिन्धुरंहः प्रशमनशरभः शरभमहाराजः ॥

शरभनृपालविलासः सैष जगन्नाथपण्डितनिबद्धः ।
रसिकेभ्यः स्वदतामिह रसलेशेनापि वकुलदलिभ्यः ॥

कल्यब्देषु गतेष्वक्षिकरादिक्सिन्धुसंख्यया (४८२२) ।
वत्सरे शुभकृन्नाम्नि व्यरचीदं निबन्धनम् ॥

पदप्रौढिभागन्वयौदर्यशाली
समर्थो जनानन्दकृत्सद्गुणौघः ।
विजेजीयतां विश्वमातुः प्रसादात्
प्रबन्धः प्रबन्धाप्यसौ नायकश्च ॥

अस्तु चिरन्तनसूक्तिप्रस्तुतचरणाम्बुजप्रभावं नः ।
निस्तुलमभीष्टसिद्ध्यै वस्तु गिरीशाङ्कभूषणीभूतम् ॥

श्रीदक्षिणामूर्तये नमः । श्रीगुरुभ्यो नमः ।
श्रीदेव्यै नमः ॥

Colophon: Nil

Subject: History of the Maharaṭha kings of Tanjore.

Remarks :—The Ms. is in good condition.

Jagannātha, who was attached to court of Serfojee (1711-1728) has immortalised the name of his patron in this work. This Jagannātha should not be confused with his namesake, the author of the Rasagangādhara and other works. This work was composed in Kali 4822, corresponding to A. D. 1722. The work is not available in print.

॥ साहित्यमञ्जूषा ॥

4242. SĀHITYAMAÑJŪṢĀ.

Burnell's Catalogue No. 7127.

Substance—Paper. Size—$9\frac{1}{8}\times4\frac{3}{8}$ inches. Sheets—8.

Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—27. Author—Sadāji. Incomplete.

Beginning:

श्रीगणेशाय नमः ।

अथ कवेराश्रयकथनम् ।

श्रीमान्कौशिकगोत्रजश्च सुयशाः जित्वा भवान्या वरात्
आप्रालेयनगात्रसागरतटां तं चक्रवालं भुवः ।
दध्रे यो यवनद्विषेषु हरितां राजन्यवंशाग्रणीः
आसीच्छत्रपतिः स्वयाम्बकचयस्वर्दुः शिवाजिर्नृपः ॥

End:

नरसिंह्मः कुलदैवतमाराध्य इभाननो महालक्ष्मीः ।
करवीरस्था त्रिजगज्जननी तृष्यत्वनेन काव्येन ॥

Colophon: Nil.

Subject: A description of Śivāji and his family.

Remarks:—

सदाजिसंज्ञः किल शालिवाह-
शकेश्ववेदाश्वधरासिते (१७४७) त्विषे ।
शुक्ले तृतीयाख्यतिथौ च काव्य-
वारे समाप्तामकरोदिमां मुदा ॥

This gives the date of the composition of the work as Śaka 1747 1825 A.D. The Ms. is well preserved. Dr. Burnell has numbered this Ms. but has not included it in his "Classified Index".

The Serfojee of whom this work treats, was the second Serfojee that reigned between 1800—1832. Sadāji, the author was his contemporary. This work has not been printed so far.

॥ नृसिंहराजपरश्लोकाः ॥

4243. NṚSIMHARĀJAPARAŚLOKĀḤ.

Burnell's Catalogue No. 5033.

Substance—Paper. Size—9×3½ inches. Sheets—4. Lines—8 or 9 to a Page. Script—Devanāgarī. No. of Granthas—43. Author—? Complete.

Beginning :

श्रीगणेशाय नमः ॥

यः फल्गूकृतफाल्गुनो रणभुवि प्रौढप्रतापानल-

ज्वालाभिः प्रतिपक्षपक्षविपिनश्रेणीं ददाह क्षणात् ।

योभूद्भूसुरभूरुहोऽत्र भगवद्दासो निवासःश्रियां

तस्मादाविरभूत्प्रभूतमहिमा श्रीमानसिंहो नृपः ॥ १ ॥

सङ्ग्रामोद्दामधामप्रतिभटपृतनाकण्ठरक्तोपरक्ता

येनाकीर्यस्वसेनाश्चतुरुदधिजलैः क्षालिता खड्गधारा ।

गाढं शस्त्राभिघातादरिमदकरिणां दानमाच्छिद्य सद्यो

हस्ते न्यस्तं च येन क्षपितरिपुकुले दक्षिणे दक्षिणेन ॥

स्वत्खड्गाघातजातश्लथरिपुवनितामुक्तबाष्पांबुधारा

सारादारादुदारा दिशि दिशि सरितो नोद्भटाश्चेद्भवेयुः ।

कल्पान्तक्रूरसूरप्रकटविजयिनो विस्फुरत्त्वत्प्रतापा-

त्पाराधारानपारानपि सपदि पराशुष्यतः पूरयेत्कः ॥ ३ ॥

श्रीमान् श्रीमानसिंहक्षितिपतिजलधेरुद्भवो भावसिंहः

पूर्णः पीयूषभानुर्वितरणकिरणध्वस्तदैन्यान्धकारः ।

स्फारस्फारातुषाराचलसुरतटिनीहंसहारानुकाराः
कीर्तिज्योत्स्नाः पिबन्ति प्रतिदिशमनिशं यस्य विद्वच्चकोराः ॥ ४ ॥

End:

ऐश्वर्यं नहुषस्य विष्णुविषयश्रद्धांबरीषस्य सा
पाण्डित्यं धनुषश्च पाण्डुजनुषो गाम्भीर्यमम्भोनिधेः ।
दातृत्वं बलिकर्णयोरिह जगत्येकत्र चेत्स्यात्तदा
तस्य श्रीयुतभावसिंहनृपतेः साम्यं समुन्मीलतु ॥ १६ ॥

काव्यालापकलाकलापकलनावैदग्ध्यदी... गुरोः
भूमीकल्पतरोरशेषजनतासङ्गीतकीर्तेरिह ।
तस्याज्ञामधिगत्य यः कविकुलानन्दाय संपादितः
सन्दर्भस्तममत्सराः कृतधियः कुर्वन्तु कर्णातिथिम् ॥ १७ ॥

दाने कर्णोऽसि नित्यं द्विषदपसरणे फाल्गुनस्त्वं प्रतापे
तीक्ष्णांशुर्याचकानां बहुतरविभवैस्तोषणे कल्पवृक्षः ।
सिन्धुर्गम्भीरतायां चतुरसुनयनातोषणे कामदेवः
त्वं जीया हायनानां शतमिह भुवने वीरसिंहक्षितीश ॥

कर्णस्त्वचं शिबिर्मांसं जीवं जीमूतवाहनः ।
ददौ दधीचिरस्थीनि किमदेयं महात्मनाम् ॥ २ ॥

स्थानं कल्पतरोस्सुधाखनिजनिश्चिन्तामणेः कौपभूः
शय्यागारमजस्य मातृसदनं लक्ष्म्या प्रपाम्भोमुचाम् ।
और्वस्या वरणं गिरेश्च शरणं दुर्गं महद्दारुणं
भूमेः प्रावरणं कथं कथमहो रत्नाकरो वर्ण्यते ॥ १ ॥

Colophon: Nil.

Subject: Praise of Nṛsihmarāja.

Remarks:—The Ms. is in fairly good condition.

A paper transcript of this work is available in this Library. See T. V. No. 419.

The work is not available in print.

॥ सीतारामबुधोदयः ॥

4244. SĪTĀRĀMABUDHODAYAḤ.

Not noticed by Burnell. Ms. No. 15372 b.

Substance—Palm leaf, Size—18×1 inches. Leaves—4 (1-4). Lines—7 to a Page. Script—Grantha. No. of Granthas—75. Author—Rāmasudhīḥ. Complete.

Beginning:

चतुर्भुजं महाकायं सर्वाभरणभूषितम् ।
वन्दारुवृन्दमन्दारं वन्दे विघ्नविनायकम् ॥

यन्मौलिभूषणवशादभ्रनांशु........स्वल्पे.......
...............सद्भिरखिलैरपि वन्दनीयः ।
भाति प्रवृद्धकिरणोऽपि न पूर्णचन्द्रः
सोयं शिवः शिवमचञ्चलमातनोतु ॥

यत्पादपङ्कजध्यानसुधामधुरया गिरा ।
जयन्ति कवयः सर्वे सा मे स्फुरतु भारती ॥

नृत्यच्छंभुजटाकलापविलुठद्गङ्गातरङ्गैर्मि.......
शाकेश्रि(?)रणक्षमा विजयते यस्योक्तिपारंपरी ।

भूता यस्य समस्तशास्त्रजलधिः शेषाद्रिविद्वन्मणिः
वन्दे विश्व...द्रमनिशं विद्यागुरुं तादृशम् ॥

प्रणम्य विदुषां वृन्दं सीतारामबुधोदयम् ।
प्रबन्धं कुरुते रामसुधीः श्रुतिमनोहरम् ॥

End:

ततः परं देवेन्द्रोऽपि शिरःकंपं कृत्वा तत्रत्यान् नारदप्रमुखान् नमस्कृत्य तैरनुज्ञातस्सन् जलक्रीडां कर्तुं नन्दनवनमाससाद ॥

राजा जयतु सर्वेषां पालकश्चिरजीविनः ।
भवन्तु प्राणिनः सर्वे सुखिनः शिवमस्तु नः ॥

Colophon : Nil.

Subject: The history of one Sītārāma.

A certain Rāmakṛṣṇa had three sons (i.e.) Raghunātha, Sītārāma and Śri Raṅga. The doings of Sītārāma is the subject of this work. The work is not available in print.

Remarks :—The Ms. is in a decaying condition. The other work contained in this Ms. is some āhnikaprayoga.

॥ पाषण्डमण्डनम् ॥

4245. PĀṢAṆḌAMAṆḌANAM.

N. S. Collection No. 92. Substance—Paper. Size—$10\frac{1}{2} \times 4\frac{7}{8}$ inches. Sheets—7. Lines—8 to 9 to a Page. Script—Grantha. No. of Granthas—60. Author—Sūryanārāyaṇadīkṣita. Complete.

Beginning:

श्रीगणेशाय नमः ॥ पाषण्डमण्डनम् ।

मञ्जुलमन्दस्मितयुतमुखकमलामोहनिवहसंहर्त्री ।
बन्धूकबन्धुकान्तिर्बालाम्बा भवतु भावपरिपूर्त्यै ॥ १ ॥

गौरीमायूरपुरात् पुरतोऽष्टक्रोशदूरमात्रमिते ।
कावेरीपुष्पपुरीनिकटे ग्रामोऽस्ति बाणगिर्याख्यः ॥

यत्सविधे सह्यभवा सादरमाविशति सुभगकल्लोलम् ।
यत्र च विलसति नितरां रत्नच्छायावनेश्वरो देवः ॥

बाणगिरिनामकेऽस्मिन्ग्रामे कावेर्युपान्तिके भाति ।
यतिजननिवासभूता मठिका विबुधजनसेविता रम्या ॥

तत्रावसद्यतीन्द्रः साक्षाद्व्यास इव सर्ववेदज्ञः ।
आद्यः स्वयंप्रकाशः शास्त्राद्यध्यापने सदा निरतः ॥ ५ ॥

* * *

तस्यासीच्छिष्यवरः सुब्रह्मण्याख्यविद्वदवतंसः ।
सकलजनमाननीयो मीमांसाद्वितयपारगो धीमान् ॥ ९ ॥

End:

श्रेयस्कराणि चिरकालवयःप्रदानि
यान्यौत्तरेतरजनाभिहतानि काले ।
वाक्यानि सन्ति न तथा हृदयङ्गमानि
दत्तानि चौषधवराणि यथा मुमूर्षोः ॥ ३२ ॥

स्वजनं हिनस्ति हस्ती स्वोत्तरदेशीययादवशवर्ती ।
स्वबलं न वेत्ति किञ्चिन्मूढमतिश्चोलवडभ इव ॥ ३३ ॥

Colophon:

इति श्रीमन्नैध्रुवकाश्यपकुलजलधिमुक्ताफलेन सुरपुर(காக்குடி)ग्रामाभिजनश्रीचिदम्बरेश्वरयज्वपौत्रेण प्रबन्धशतविद्योतितश्रीसुब्रह्मण्ययायजूकपुत्रेण कावेरीपुष्पपुरीनिवासिना श्रीमद्राजाधिराजश्रीशरभोजिमहाराजमान्यश्रीमदय्यावैय्याश्रितेन **श्रीसूर्यनारायणदीक्षितेन** विरचितं पाषण्डमण्डनम् समाप्तम् ।

कावेरीपट्टणनिवासिनः सुन्दरदीक्षितस्येदम् ॥

श्रीसंगमेश्वराय नमः ॥ श्रीछायावनेश्वराय नमः ॥

Subject: Pāṣaṇḍamaṇḍana.

Remarks:—The Ms. is in good condition.

The work is a personal history of one Sūryanārāyaṇa Dīkṣita who was living at Kāveripaṭṭaṇam in the 19th century. The work is not available in print.

॥ पाषण्डमण्डनम् ॥

4246. PĀṢAṆḌAMAṆḌANAM.

N. S. Collection No. 93. Substance—Paper. Size—6 × 5 inches. Sheets—9. Lines—10 to 12 to a Page. Script—Devanāgarī. No. of Granthas—600. Author—Sūryanārayaṇadīkṣita. Complete.

Beginning, end, colophon and subject—Same as No. 4245.

Remarks:—The Ms. is in good condition.

ERRATA ET ADDENDA of VOL. VII.

Page	Line	for	Read
XI.	2	734	374
XII.	5	add Miscellaneous	706
,,	6	25601	25947
2864	8	जृम्भितानन्द	जृम्भितानन्त
2865	21	विजह्ये	विजह्रे
2866	13	तस्मदुचित	तस्मादुचित
2872	25	मणीभि	मणिभि
2878	11	र्देशो	निर्देशो
2886	6	शलै	शैल
2887	9 and 10	स्नन	स्नान
2888	2	द्वताय	द्वितीय
,,	10	अपूजयन्	अपूजयत्
2889	15	भवान्	भवत्
2892	10	मुषितामन्दरागै:	मिषतामन्तरङ्गै:
,,	12	प्रक्तनी	प्राक्तनी
,,	17	Sandesa	Sandeśa
2894	3	स्तर	स्तार
2895	Last line	लहरी	लहरीं
2896	10	रामिमिध	रामाभिध
2900	14	शैविलिति	शैवलिनी

Page	Line	for	read
2900	16	वांदिसदेतर्हि	वादिन्तदेतर्हि
2902	9	गर्व	गर्ष
,,	14	लुम्बसि	लुम्पासि
2908	15	शृङ्ग	भृङ्ग
2916	5	कर्क्षन्ती	कर्षन्ती
2923	23	शकः	शठः
,,	24	अक्षेपो	आक्षेपो
2932	15	त्रित्ते	चित्ते
2941	22	हारा	हार
2942	13	कलाङ्कि	कलङ्कि
2943	10	ही	ह्री
2944	3	नारा	नाग
2951	13	श्मयः	रश्मयः
2.55	2	कृपे	कृषे
2957	18	योगिनां	योगितां
,,	19	निरन्तरोपा	निरन्तरोप
2958	7	सोप	स्वोप
,,	14	जलधि	जलधिः
,,	16	भूर्ति	भूमि
2964	17	समुद्र	समद्र
2968	15	दधिषं	दधि
2969	15	सरणमायित	सरणमेत
2972	4	निषुण	निपुण

Page	Line	for	read
2972	4	नामधायेन	नामधेयेन
2990	17	मिलास	विलास
2995	13	Add	3699 after 'Number'
3004	19	कुसार	कुमार
3006	17	ञ्याख्यानयारेनु	ञ्याख्यानयोरनु
,,	Last line	ध्वनीः	ध्वनिः
3016	3	गधा	गदा
,,	8	सन्तर्क	सत्तर्क
3021	14	कालां	कालम्
3027	Last line	गममा	गमा
3028	4	गुरूः	गुरुः
3034	12	सुध	सुधा
3061	2	मुनीन	मुनीन्
3062	11	भारुत	मारुत
3077	22	नाम्रि	नाम्नि
3099	8	विबभ्रुः	विवव्रुः
3111	13	समूहः	समूहेः
3141	15-16	Yuddhakāṇḍa	Uttarakāṇḍa.
3142	13	do.	do.
,,	15	do.	do.
3156	9	पूर्णे	पूर्णो
3158	14	4400	4150
3161	9	प्रोधा	प्रोथ
3178	22	पुत्रि	पुत्री

Page	Line	for	read
3186	12	भिषजे	भेषजे
3189	9	रन्विष्य	रन्विष्य
3195	Last line	रम्यमा	रभ्यमा
3196	,,	विकोऽयं	विवेकोऽयं
3207	12	चतुष्पुरुष	चतुःपुरुष
3209	6	विकसन्कान्ति	विकसत्कान्ति
3214	13	तथा	तत्र
3215	11	प्रावर्तिष्ट	प्रावर्तिषत
3225	Add under remarks. P. S. We have noticed a copy of this Ms. in the government Oriental Mss. library Madras. under R. No. 3790.		
3226	19	गाढ़	गाढ़
3233	17	वर्तु	कर्तु
3235	18	मुपैति	हुपैति
3236	12	कषायितेन	कषार्पितेन
3238	8	प्रेमाद्र	प्रेमार्द्र
3249	17	न्मुक्च:	न्मुग्ध:
3250	14	कर्त्रा	कर्तुः
,,	16	पद्मासनस्थाप्यकृत	पद्मासनस्याप्यकृत
3268	7	मुक्दाम	मुक्तादाम
3269	22	प्रबलित	प्रबलतं
3271	7	यशासां	यशसां
,,	15	नाद	नाथ

APPENDIX. A.

INDEX OF AUTHORS (Vols. VI & VII.)

APPENDIX. B.

INDEX OF OWNERS OF MSS. (Vols. VI & VII)

Names.		Numbers.
Narasaya, the younger brother of Bālakavi & the Havaldar of Ekaji		3880
Nāgambhaṭṭa	...	4149
Nāgeśvara	...	3293
Nīlakaṇṭhapūṇḍe	...	3178, 3180 & 3376
Bāla	...	3603
Bābajīnāyaka proddhar	...	4175
Babājīnāyakapuṇḍe	...	3929
Bābāji Nāyak	...	4164
Bālambaṭṭa	...	3885
Bālāji Gaṅgādhara Paṇḍita	...	2784
Mannam Bhaṭṭa.	...	3664, 3666, 3668, 3669, 4055 & 4061
Mallāribhaṭṭa	...	3961
Muttaṇṇā	...	2779
Mallāri	...	3727
Mahādeva	...	3298
(Lāṇḍage Mānya) Mahādeva	...	3299
Yañjeśvarabhaṭṭasūnu	...	3412
Vāsudeva	...	3885
Viśvanātha bhaṭṭagosvāmin	...	3562
Raghupati Ayyangar	...	3908
Raṅgaṇṇabhaṭṭagosvāmin	...	3183
Raṅgaṇṇabhaṭṭa	...	2945
Raṅgabhaṭṭagosvāmin	...	3328, 3539
(Varageḍi) Raṅgācārya	...	4118
Ratnākarasūnu	...	3108
Rāmakṛṣṇa son of Gopāla	...	3887
Rāmaṇṇa	...	3957

Names		Numbers
Rāmājī Vaidya son of Anantabhiṣak residing at Puṇyastambha	...	4041
Śaṅkaranānāsāmi	...	3980
Śaṅkarājī son of Śiva	...	3930
Śarabhaji	...	3920 & 3971
Śāmāji Bālāji	...	3518
Śivabhaṭṭa	...	3540
Śeṣādri Dīkṣita	...	3697
Sabhāpti Yajvan	...	4025
Sundaradīkṣita a resident of Kāveri-patnam	...	4246
Subbābhaṭṭa	...	3073
Somanātha Śāstrin	...	3076

APPENDIX C.

INDEX OF SCRIBES OF MSS. (Vols. VI & VII).

NAMES.	NUMBERS.
Virūpākṣa ...	2913
Viśvanātha ...	3454, 3690
Viśvanātha bhaṭṭa ...	3651
Veṅkaṭanārāyaṇa ...	3993
Veṅkaṭasubbaya ...	3706
Veṅkaṭeśa ...	3708
Veṅkaṭaśāstrin ...	4208
Veṅkāji Paṇḍita ...	3507
Śaṅkara ...	3405
Śaṅkara son of Rāghavabhaṭṭasūri ...	4110
Śivadāsa ...	2941-2943
(Lāṇḍage) Somanāthabhaṭṭa ...	3320
Śrīdāsa ...	3625
Śrīnivāsacakrapāṇi ...	3302, 3872
Sakhambhaṭṭa ...	2804
Sakkabhaṭṭa ...	2778
Sadāśiva son of Rāma. ...	3966
Sadāśivavṛṣabhaṭṭa ...	4149

APPENDIX D.

INDEX TO DATED MSS. (VOLS. VI & VII.)

	Dates	Numbers
A. D.	1577	3996
	1592	3887
	1600	3885
	1620	3100
	1636	2781
	1636	4041
	1654	3099
	1670	2780
	1678	4178
	1694	2779
	1694	3194
	1702	3978
A. D.	1754	4196
	1768	3178
	1771	3920
	1787	3903
	1784	3922
	1812	2778
	1812	3045
	1812	4030
	1824	3366
	1824	3591
	1833	3870
	1835	3980

APPENDIX. E.

INDEX TO WORKS NOTICED (VOLS. VI & VII.)

* The asterisks indicate that the work is not available in print.

NAMES		NUMBERS
* Meghasandeśavyākhyā (Sthiradeva's)	...	3885
* Yamakārṇavaḥ savyākhyaḥ	...	3720
Yudhiṣṭhiravijayaḥ	...	3832
Yudhiṣṭhiravijayapadapāṭhaḥ	...	3833
Yudhiṣṭhiravijayavyākhyānam	...	3834
* Raghunāthacaritam	...	3721
* Raghunāthābhyudayaḥ	...	3722
Raghuvamśaḥ	...	2777-2989
Raghuvamśavyākhyā	...	2990-3044
Rākṣasakāvyam	...	3835 & 3836
Rākṣasakāvyam saṭīkam	...	3837 & 3838
* Rāghavacaritam	...	3723
Rāghavapāṇḍavīyam	...	3724-3729
Rāghavapāṇḍavīyavyākhyānam	...	3730
* Rājārāmacaritam	...	4229
Rādhāvinodakāvyam	...	3839 & 3840
Do. savyākhyam	...	3841
Rādhāvinodakāvyavyākhyā	...	3842
Rāmakṛṣṇavilomakāvyam	...	3847
* Rāmacandrodayaḥ	...	3731 & 3732
* Rāmacandrodayavyākhyā	...	3733-3735
Rāmāyaṇacampūḥ	...	4107-4138
* Do.	...	4139
* Do.	...	4140
* Do.	...	4143-4144
* Rāmāyaṇacampūvyākhyā	...	4145
* Rāmāyaṇasaṅgrahaḥ	...	3848
* Rāmāyaṇāryā	...	3849
* Lakṣaṇaśatakam	...	3962

The following publications are available for sale from the Hony. Secretary, Tanjore Mahārāja Serfoji's Sarasvatī Mahāl Library Tanjore.

1. A Descriptive Catalogue of the Sanskrit Manuscripts in the Tanjore Mahārāja Serfoji's Sarasvatī Mahāl Library, Tanjore.

Vol. I.	Vedas.	Price.	Rs. 2—0—0
Vol. II.	Vedas (Contd.)	,,	Rs. 2—0—0
Vol. III.	Vedas (Contd.) Vedāṅgas.	,,	Rs. 2—0—0
Vol. IV.	Vedāṅgas (Contd.) Kalpa—Śrauta.	,,	Rs. 2—0—0
Vol. V.	Do. (Concluded)	,,	Rs. 2—0—0
Vol. VI.	Kāvyas	,,	Rs. 2—0—0
Vol. VII.	Do. (Concluded.)	,,	Rs. 2—0—0

2. A Descriptive Catalogue of Tamil Manuscripts of the above Library.

Vol. I.	Price.	Rs. 2—0—0
Vol. II.	,,	Rs. 1—8—0
Vol. III.	,,	Rs. 1—8—0

3. A Descriptive Catalogue of Marathi Manuscripts and Books of the above Library.

Vol. I. Vedānta, Purāṇa and Rāmāyaṇa. Price. Re. 1—0—0

4. A Catalogue of French, Latin, Italian, and Greek Books of the above Library. Price. Re. 0—4—0